तेभ्य एव वर्गप्रथमेभ्यः परो हकारः पूर्वचतुर्थमापद्यते न वा वाग्धीनं, वाग्हीनं, अज्झलौ, अज्हलौ, षड्ढलानि, षड्हलानि; तद्धितं; तद्हितं; ककुभ्हासः, ककुब्हासः। हकार इति किं? तत् कृतम्। तेभ्यो ग्रहणं स्वरयवरपरनिवृत्त्यर्थं; तेन वाग्घ्लादयति। ऐवेति तृतीयमतव्यवच्छेदार्थम्।

५०. **पररूपं तकारो लचटवर्गेषु**

तकार पदान्तो लचटवर्गेषु परतः पररूपमापद्यते तल्लुनाति, तच्चरति, तच्छदयति, तज्जयति, तज्झासयति, तञ्ञकारेण, तट्टीकनं, तट्ठकारेण, तड्डीनं, तड्ढौकते, तण्णकारेण पदान्ते धुटां प्रथमे सति—तज्जयः दृशल्लेखा, ज्ञानभुड्ढौकनमिति। लचटवर्गेष्विति किं? तत् पचति।

५१. **चं शे**

तकारः पदान्तः शे परे चमापद्यते। तच्श्लक्ष्णः, तच्श्मशानम्। अच्छत्वपक्षे वचनमिदम्।

५२, **ङणना ह्रस्वोपधा स्वरे द्विः**

ङणना पदान्ता ह्रस्वोपधा स्वरे परे द्विर्भवन्ति। क्रुङ्ङत्र, सुगण्णत्र, पचन्नत्र। ङणना इति किं? किमत्र। पदान्ता इति किं? वृत्रहनौ। ह्रस्वोपधा इति किं? प्राङास्ते।

५३. **नो हन्तश्चछयोः शकारमनुस्वारपूर्व्वम्**

नकारः पदान्तश्चछयोः परयोः शकारमापद्यते अनुस्वारपूर्व्वम् भवांश्चरति, भवांश्छादयति, भवांश्च्यवते भवांश्छ्यति। व्यवस्थितवास्मरणात्-प्रशान्, चरति, एतमुत्तरत्रापि। तथान्तो विरतिरिति, तेन त्वन्तरसि।

५४. **टठयोः षकारम्**

नकार पदान्तष्टठयोः परयोः षकारमापद्यते अनुस्वार पूर्व्वम् । भवांष्टीकते, भवांष्ठकारेण ।

५५. **तथयोः सकारम्**

नकार पदान्ततस्थनथयोः परयोः सकारमापद्यते अनुस्वारपूर्व्वम् । भवांस्तरति, भवांस्थुडति । पुंस्कोकिलः, पुंस्खननं, पुंश्चकोरः पुंश्छत्रं, पुंष्टिटिभः, सुपुंश्चरति पुंसोऽशिटय्घापविषये संयोगान्तलोपस्यानित्यत्वात् यथा प्राप्तमेव । अशिडिति किं ? पुंसवः ।

५६. **ले लम्**

नकारः पदान्तो ले परे लभापद्यते अनुस्वार हीनम् । भवाल्लुनाति भवाँल्लिखति । कारहीनत्वादननुनासिकम् ।

५७. **जझञशकारेषु ञकारम्**

नकारः पदान्तो जझञशकारेषु परतो जकारमापद्यते । भवाञ्जयति-भवाञ्झषति, भवाञ् ञकारेण भवाञ् शेते । पदमध्ये चटवर्गादिश इति जझञशकारेषु ञकारविधानम् ।

५८. **शिन्चौ वा**

नकारः पदान्तः शि परे न्चौ वा प्राप्नोति ञाकारं वा भवाञ् छूरः, भवाञ् शूरः कुर्वञ् शूरः; प्रशाञ् छयनम्, प्रशाञ् चशयनम्, प्रशाञ् शयनम्: प्रशाञ् शमनम् णत्व गत्व न स्यात्, अनुस्वारो वर्गान्तश्च स्यादेव । वात्र समुच्चये ।

५९. **डढणपरस्तु णकारम्**

डढणा परे यस्मादिति डढणपरो नकारो णमापद्यते । भवाण्डीनम्, भवाण्णकारेण । तु शब्दो वानिवृत्यर्थः ।

६०. **मोऽनुस्वारं व्यञ्जने**

मकारो पुनरन्तो व्यञ्जने परे अनुस्वारमापद्यते । त्वं यासि, त्वं रमसे । अन्त इति कि ? गम्यसे । अनुस्वार इति संज्ञापूर्व्वको विधिरनित्य, तेन-सम्राट्, सम्राजो ।

६१. **वर्गे तवर्गं पञ्चमं वा**

अन्तोऽनुस्वारो वर्गे परे तवर्गपञ्चमं वापद्यते । त्वङ्करोषि, त्वं करोषि; त्वञ्चरसि, त्वं चरसि, पुम्भ्याम्, पुंभ्याम् । वर्ग इति किम् ? त्वं लुनासि ।

इति दौर्गसिंह्यां वृत्तौ सन्धौ चतुर्थः पाठः समाप्तः

पञ्चमः पादः

६२. **विसर्जनीयश्चे छेवा शम्**

निसर्जनीयश्चे बा छेवा परे शमापद्यते। कश्चरति, कश्छादयति।

६३. **टे ठे वा षम्**

विसर्जनीयष्टे वा ठे वा परे षमापद्यते। कष्टीकते, कष्ठकारेण। प्रत्येकं वात्र समुच्चये बालावबोधार्थम।

६४. **ते थे वा सम्**

विसर्जनीयस्ते वा थे परे समापद्यते। कस्तरति, कस्थुडति। कारस्करादय० इति संज्ञा शब्दा इव लोकत. सिद्धाः।

६५. **कखयोर्जिह्वामूलीयं न वा**

विसर्जनीय कखयोः परयोर्जिह्वामूलीयमापद्यते न वा। क+करोति, कः करोति, क+खनति, कः खनति।

६६. **पफयोरुपध्मानीय न वा**

विसर्जनीयपफयो परयोरुपध्मानीयमापद्यते न वा। कः पचति, क पचति, कःफलति, कः फलति। व्यवस्थितविभाषयाऽ घोषेऽशिट्परे न शादयः। पुरुषः-त्सरुकः, वासःक्षौमम्, अद्भिप्सातम्।

६७. **शे षे से वा वा पररूपम्**

विसर्ज्जनीय : शे वा षे वा से वा परे पररूपमापद्यते न वा। कश्शेते, कः शेते; कष् षण्मः, कः षण्मः; कस्साधु, कः साधुः,। चटतानित्य करणाद् विसर्ज्जनीया-देशस्याघोषे प्रथमा न स्यात्, कश्चरतीत्यादिष्वप्येवम्।

६८. **ओमकारयोर्म्मध्ये**

द्वयोरकारयोर्म्मध्ये विसर्ज्जनोय ओमापद्यते। कोऽत्र, कोऽर्थः। पुनरत्रेति रप्रकृतिरिति परस्थाब्रवः स्यात्।

६९. **अघोषवतोश्च**

अकारघोषवतोर्म्मध्ये विसर्ज्जनीय ओमापद्यते। को गच्छति, को धावति। अघोषवतोरिति किम्। कः शेते।

७०. **अपरो लोप्यो ऽन्यस्वरे यं वा**

अकरात् परो विसर्ज्जनीयो लोप्यो भवति उक्तादन्यस्वरे यं वापद्यते। क इह, क यिह; क उपरि। अपर इति किम्? अग्निरत्र। वात्रसमुच्चये। ईषत् पृष्टतरोऽत्र यकारः।

७१. आभोभ्यामेवमेव स्वरे

आकार भोशब्दाभ्यां परो विसर्ज्जनीय एवमेव भवति स्वरे परे। देवा आहुः, देवा याहुः, भो अत्र, भो यत्रः, भो इत्यामन्त्रणौकारोपलक्षणं, तेन केचित्—भगो अत्र, भगो यत्र। अघो अत्र, अघो यत्र। आर्दीषत् पृष्टतरश्चौकारादीषत् पृष्टतर एवात्र यकारः। एवमेव ग्रहणं नित्यलोप निरासार्थम्।

७२. घोषवति लोपम्

आकार भोशब्दाभ्यां परो विसर्ज्जनीयो लोपमापद्यते घोषवति परे। देवाः गताः, भो यामि, भगो व्रज, अघो यज। लो ग्रहणं यं वेति निवृत्यर्थम्।

७३. नामि परो रम्

नामिनः परो विसर्ज्जनीयो रमापद्यते निरपेक्षः। सुमीः, सुतुः इरुरर्थवचन-मिदम्।

७४. घोषवत्स्वरपरः

नामिनः परो विसर्ज्जनीयो घोषवत्स्वरपरो रमापद्यते। अग्निर्गच्छति, अग्निरत्र, पटुर्वदति, पटुरत्र।

७५. र प्रकृतिरनामिपरोऽपि

रेफप्रकृतिर्विसर्ज्जनीयो नामिनः परोऽनामिनः परोऽपि घोषवत् स्वरपरो ऽघोषपरोऽपि रमापद्यते। गीर्पतिः, गी≍पतिर्व्वा, धूर्पतिः, धू≍पतिर्व्वा। स्वरघोष-वतोर्नित्यं—पितरत्र, पितर्यातः। अरेफप्रकृतिरपि—हे प्रचेता राजन्, हे प्रचेता राज-न्नीति वा। ऊधब्बुधः, अह्नोऽरेफ,—अहर्पतिः, अहर्गणः, अहरत्र। रेफे तु—अहोरात्रम्ः, अहोरूपम्ः, अहोरथन्तरं साम।

७६. एषसपरो व्यञ्जने लोप्यः

एषसाभ्यां परो विसर्ज्जनीयो लोप्यो भवति व्यञ्जने परे। एष चरति, स टीकते, एष शेते, स पचति। परत्वात् पूर्वान् बाधते। अप्याधिकारात्, सरूपग्रहणाद् वा—एषकः करोति, सकः करोति; अनेषो गच्छति, असोगच्छति; अकि नञ् समासे न स्यात्।

७७. न विसर्ज्जनीयलोपे पुनः सन्धिः

विसर्ज्जनीय लोपे कृते पुनः सन्धिर्न भवति। अन्यलोपे तु भवत्येव। क इह, देवा आहुः, भो अत्र। विसर्ज्जनीयाधिकारे पुनर्विसर्ज्जनीयग्रणमुत्तरत्र विसर्ज्जनीया-धिकार निवृत्यर्थं, तेन—एषच्छात्रेण, द्विर्भावः सिद्धः।

७८. रो रे लोपं स्वरश्चपूर्व्वो दीर्घः

रो रे परे लोपमापद्यते, स्वरश्चपूर्व्वो दीर्घो भवति। अग्नी रथेन, पुना रात्रिः, उच्चै रौति।

७९. **द्विर्भावं स्वरपरश्छकारः**

स्वरात् परश्छकारो द्विर्भावमापद्यते। वृक्षच्छाया, इच्छति, गच्छति। अप्यधिकारात् दीर्घात् पदान्ताद् वा—कुटीच्छाया, कुटीछाया। आङ्माभ्यां नित्यं—आच्छाया, माच्छिदत्॥

इति दौर्गसिंह्यां वृत्तौ सन्धौ पञ्चमः पादः समाप्तः

चतुष्टय-वृत्तिः

नामप्रकरणम्

प्रथमः पादः

१. **धातुविभक्तिवर्ज्जमर्थवल्लिङ्गम्**

अर्थोऽभिधेयम् । धातुविभक्तिवर्ज्जमर्थवल्लिङ्गसंज्ञं भवति । वृक्षः, कुम्भम् कुमारी, डित्थः, राजपुरुषः, औपगवः, कारकः । धातुविभक्तिवर्ज्जमिति किम् ? अहन् । वृक्षान् । अर्थवदिति किम् ? वृक्ष इति व ऋ कषामेकैकशो माभूत, राजनित्युन्मत्तवचनस्य च । लिङ्गप्रदेशाः लिङ्गान्तनकारस्यत्येवमादयः ।

२. **तस्मात् परा विभक्तयः**

सि, औ, जस् ; अम्, औ, शस् ; टा, भ्याम्, भिस् ; ङे, भ्याम् भ्यस् ; ङसि, भ्याम्, भ्यस् ; ङस् ओस् आम् ; ङि ओस् सुप् । तस्माल्लिङ्गात् परा, स्यादयो विभक्तयो भवन्ति । दृशन्, (दृषत्) दृशद् ; दृशदौ, दृशदः । दृशदं, दृशदौ दृशदः । दृशदा, दृशद्भ्याम्, दृशद्भिरित्यादिः । एव कुमारी, कुमार्यो, कुमार्यः खट्वा, खट्वे, खट्वाः । अर्थस्य विभञ्जनाद् विभक्तयः इति ।

३. **पञ्चादौ घुट्**

स्यादीनामादौ पञ्च वचनानि घुटसंज्ञकानि भवन्ति । सि, औ, जस्, अम्, औ । घुटप्रदेशाः—घुटि चासम्बुद्धावित्येवमादयः ।

४. **जस्शसो नपुंसके**

नपुंसकलिङ्गे जस्शसो घुटसंज्ञकौ भवतः । सामानि तिष्ठन्ति, सामनि पश्य । नपुंसके जसेरघुडिति नियमाद्-वारिणी, जतूनि ।

५. **आमन्त्रिते सि सम्बुद्धिः**

सिद्धस्याभिमुखीकरणमामन्त्रितम् । तस्मिन्नर्थे विहितः सि सम्बुद्धिसंज्ञो भवति । हे अम्ब, हे वृक्ष । सम्बुद्धिप्रदेशाः—"सम्बुद्धौ चे" इत्येवमादयः ।

६. **आगम उदनुबन्धः स्वरादन्त्यात् परः**

प्रकृतिप्रत्यययोरनुपघाती आगमः । आगम उदनबन्धोऽन्त्यात् स्वरात् परः परिभाष्यते । पयानि, पयांसि । आगम इति किं ? विद्युतवान् । उदनुबन्ध आगमस्य लिङ्गम् ।

७. **तृतीयादौ तु परादिः .**

आगम उदनुबन्धस्तृतीयादौ विभक्तौ परादिर्भवति । सर्वस्यै, सर्वेषां, वृक्षाणाम् । तु शब्दस्तृतीयाद्यधिकार निवृत्यर्थः ।

८. **इवुवग्नि**

इकार उकारश्चाग्नि संज्ञो भवति । अग्निम, पटुम् । इदुदिति किं ? सेनान्यम्, यवल्वम् । अग्निप्रदेशाः "अग्नेरमोऽकारः" इत्येवमादयः ।

९. **ईवूतस्त्र्याख्यो नदी**

ईदूदित्येवं स्त्र्याख्यो नदीसंज्ञो भवतः । नद्यै, वध्वै । तपरकरणमसन्देहार्थम् । स्त्र्याख्यमिति किं ? सेनान्य, यवल्वे । नदीप्रदेशाः "नद्या ऐ आसासामि" त्येवमादयः ।

१०. **आ श्रद्धा**

आकारो यः स्त्र्याख्यः स श्रद्धासंज्ञोभवति । श्रद्धा, माला । स्त्र्याख्य इति किम् ? कीलालपाः । श्रद्धाप्रदेशाः—"श्रद्धायाः सिलोपमि" त्येवमादयः ।

११ **अन्त्यात् पूर्व उपधा**

लिङ्गस्य धातोर्वा अन्त्याद्वर्णाद्यः पूर्वो वर्णः स उपधासंज्ञोभवति । राजन्—अकारः, भिद्—इकार, वृत्—ऋकार [वृ—वकार] । उपधाप्रदेशाः—"अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्स्वि" त्येवमादयः ।

१२. **व्यञ्जनान्तोऽनुषङ्ग**

लिङ्गस्यधातोर्वा अन्त्याद्व्यञ्जनाद्यः पूर्वो नकारः सोऽनुषङ्ग संज्ञो भवति । विदुषः, स्रस्यते । न इति किम् ? ऊर्गभ्याम् । अनुषङ्गप्रदेशाः —"अनुषङ्गश्चाकुञ्चेदि" त्येवमादयः ।

१३. **घुड् व्यञ्जनमनन्तस्थानुनासिकम्**

अन्तस्थानुनासिकवर्जितं व्यञ्जनं घुट् संज्ञभवति । पयांसि, अपक्त, अन्तस्थानुनासिक वर्जमिति किं ? चत्वारि, अमंस्त । घुट्प्रदेशा।—"घुट्श्च घुटेत्येवमादयः" ।

१४. **अकारो दीर्घं घोषवति**

अकारो लिङ्गान्तो घोषवति विभक्तौ दीर्घमापद्यते । आभ्यां, वृक्षाय, वृक्षाणाम्, घोषवतीति किं ? वृक्षः ।

१५ **जसि**

अकारो लिङ्गान्तो जसि परे दीर्घमापद्यते । वृक्षाः अकारेलोपे प्राप्ते वचनम् ।

१६. शसि सस्य च नः

अकारो लिङ्गान्त शसि परे दीर्घमापद्यते, सस्य च नो भवति। वृक्षान्। स्याद्यधिकारः किम् ? अल्पशः।

१७. अकारे लोपम्

विभक्तौ लिङ्गस्याकारो लोपमापद्यते अकारे सामान्ये। वृक्षः, युष्मत्, यः सः उशना।

१८. भिसैस् वा

अकारान्ताल्लिङ्गात् परो भिसैस् वा भवति। वृक्षैः। वा शब्दः पक्षान्तरं सूचयति—एस् ऐस् वा; ऐसकरणादतिजरसैरिति केचित्।

१९. धुटि बहुत्वे त्वे

अकारो लिङ्गान्तो बहुत्वे धुटि परे एकारो भवति। एषु, वृक्षेभ्यः। परत्वादत्वं स्यात। धुटीति किम् ? वृक्षाणाम्, तु शब्दो विभाषानिवृत्यर्थः।

२०। ओसि च

अकारो लिङ्गान्त ओसि परे एकारो भवति। वृक्षयोः।

३१. ङसिरात्

अकारान्ताल्लिङ्गात् परो ङसिराद् भवति वृक्षात्। दीर्घोच्चारणमातितजरसात्।

२२. ङस् स्यः

अकारान्ताल्लिङ्गात् परो ङस् स्यो भवति। वृक्षस्य।

२४. इन टा

अकारान्ताल्लिङ्गात् परष्टा इनो भवति। वृक्षेण। टेनेतिसिद्धे इनोच्चारणमग्रत इन एव। तेनातिजरसिन कुलेन। पृथग्योगो बालावबोधार्थः।

२४. ङेर्यः

अकारान्ताल्लिङ्गात् परस्य ङेवचनस्य य आदेशोभवति। वृक्षाय।

२५. स्मै सर्वनाम्नः

अकारान्तात् सर्वनाम्नो लिङ्गात् परस्य ङेवचनस्य स्मैर्भवति। सर्वस्मै, विश्वस्मै। सर्व्वेषां नामेति किं ! विश्वोनाम कश्चित्, विश्वमतिक्रान्तः—विश्वाय, अतिविश्वाय। तीयाद्वा वक्तव्यम् —द्वितीयस्मै, द्वितीयाय, तृतीयस्मै, तृतीयाय। किन्तत् सर्व्वनाम् ? सर्व्व विश्व, उभ, उभय, अन्य, अन्यतर, इतर, उतर, उतम वत्त्व नेम सिम पूर्व्वापरावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायाम्, स्वमज्ञाति, धनाख्यायाम्, अन्तरं बहिर्योगोपसंख्यानयोः, वृत्। त्यद् तद् यद् एतद् अदस् इदम् किम् एक द्वि युष्मत् असमद् भवन्त।

२६. **ङसि स्मात्**

अकारान्तात् सर्व्वनाम्नो लिङ्गात् परो ङसि स्माद् भवति। सर्व्वस्मात्। **विश्वस्मात** ? अकारान्तादित किं। भवतः।

२७. **ङिः स्मिन्**

अकारान्तात् सर्व्वनाम्नो लिङ्गात् परो ङि स्मिन् भवति। सर्व्वस्मिन्, विश्वस्मिन्। सर्व्वेषां नामेति किं ? ममे देशे यजति।

२८. **विभाष्येते पूर्व्वादेः**

पूर्व्वादेर्गणात् परयोर्ङसिङ्योः स्थाने स्मात् स्मिनौ विभाष्येते, प्राप्ते विभाषा। पूर्व्वस्मात्, पूर्व्वात्, पूर्वस्मिन्, पूर्वे। तीयाद्वा वक्तव्यम्—द्वितीयस्मात्; द्वितीयात्; द्वितोयस्मिन्, द्वितीये, तृतीयस्मात्, तृतीयात्, तृतीयस्मिन्, तृतीये।

२६. **सुरामि सर्व्वतः**

अकारान्तात् सर्व्वनाम्नो लिङ्गात् सर्व्वत आमिपरे सुरागमो भवति। सर्व्वेषां, यासां, तासाम्। उकारः परादित्वार्थः। प्रतिपदोक्तग्रहणात्—त्वां, युवाम्।

३०. **जस् सर्व्व इः**

अकारान्तात् सर्वनाम्नो लिङ्गात् परो जस् सर्व्व इर्भवति। सर्व्वे, विश्वे। अकारान्तादिति किं ? सर्व्वाः।

३१. **अल्पादेर्व्वा**

अल्पादेर्गणात् परो जस् सर्व्वं इर्भवति वा। अल्पे, अल्पाः, प्रथमे, प्रथमाः;। उभय इति नित्यं भाषायाम्। अल्प-प्रथम-चरम-तय-अय-कतिपय-नेमार्द्धाः, पूर्व्वादयश्च।

३२. **द्वन्द्वस्थाच्च**

द्वन्द्वस्थाच्च सर्वनाम्नो लिङ्गात् परो जस् सर्व्वं इर्भवति वा। कतरकतमे, कतरकतमाः दन्त, (द्वन्द्व) कतमे, दन्त (द्वन्द्व) कतमे, दन्त (द्वन्द्व) कतमाः।

३३. **नान्यत् सार्व्वनामिकम्**

चकारोऽनुवर्तते। द्वन्द्वस्थस्य सर्वनाम्नो लिङ्गास्योक्तमन्यच्च सार्व्वमनामिकं कार्यं न भवति। पूर्व्वापराय, पूर्व्वापरात्, दक्षिणोत्तरपूर्व्वाणाम्।

३४, **तृतीया समासे च**

ततीयायाः समासे असमासे चोक्तमन्यच्च सार्व्वनामिकं कार्य्यं न भवति। मासेन पूर्व्वाय, मासपूर्व्वाय। मासेनावराः, मासावराः। श्रुतत्वात् सर्व्वनाम्नैव समासे इह स्यादक्—त्वयका कृतं, मयका कृतम्।

३५. **बहुव्रीहौ**

बहुव्रीहौ समासे सार्व्वनामिकं कार्यं न भवति, त्वत्कपितृकः, मत्कपितृकः—अक् न स्यात् । वस्त्रान्तरवसनान्तराः अप्रधानादेव द्वन्द्वस्थाच्चेति वा न स्यात् ।

३६. **दिशां वा**

दिशां बहुव्रीहौ समासे सार्व्वनामिकं कार्यं भवति वा । उत्तरपूर्वस्यै, उत्तर-पूर्व्वायै । दिशां बहुव्रीहौ इति किम् ? **दक्षिणपूर्वायै मुग्धायै** ।

३७. **श्रद्धायाः सिर्लोपम्**

श्रद्धासंज्ञात् परः सिर्लोपमापद्यते । श्रद्धा, माला, श्रद्धाया इति किं ? कीला-लपाः । सिरदिति कृते जरा जरस् स्यात् ।

३८. **टौसोरे**

टौसोः परयोः श्रद्धायाएत्वम्भवति । तुलया, तुलयोः ।

३९. **सम्बुद्धौ च**

श्रद्धायाः सम्बुद्धौ चैत्वम्भवति । हे श्रद्धे, हे माले ।

४०. **ह्रस्वोऽम्बार्थानाम्**

अम्बार्थानां श्रद्धासंज्ञकानां सम्बुद्धौ ह्रस्वो भवति । हे अम्ब, हे अक्क । अम्बार्थानामिति सिद्धे ह्रस्व इति संज्ञापूर्व्वकत्वात् सुखार्थम् । बहुस्वरत्वात् डलकवतां न स्यात्—हेअम्बाडे (डे), हे अम्बाले, हे अम्बिके ।

४१. **औरिम्**

श्रद्धायाः पर औरिमापद्यते । श्रद्धे, माले । दीर्घं किं ? जरसी इति केचित् ।

४२ **ङवन्ति यै-यास्-यास्-याम्**

श्रद्धायाः परानि ङवन्ति वचनानि यै-यास्-यास्-याम् 'इति यथा संख्यं भवन्ति । श्रद्धायै, श्रद्धायाः, श्रद्धायाः श्रद्धायाम् । मालायै, मालायाः, मालायाः, मालायाम् ।

४३. **सर्वनाम्नस्तु ससवोऽह्रस्वपूर्वाच्च**

सर्वनाम्नः श्रद्धायाः परानि ङवन्ति वचनानि यै-यास्-यास्-यामिति यथासंख्यं सह मुना भवन्ति ह्रस्वपूर्व्वाच्च । उदनुबन्धः परादित्वार्थः । सर्व्वस्यै, सर्व्वस्याः, सर्व्वस्याम् । तु शब्द स्वागमाधिकारनिवृत्त्यर्थः ।

४४. **द्वितीयातृतीयाभ्यां वा**

अप्राप्ते विभाषा । द्वितीयातृतीयाभ्यां पराणि ङवन्ति वचनानि यै-यास्-यास्-यामिति यथा संख्यं सुना भवन्ति ह्रस्वपूर्व्वाश्च वा । द्वितीयस्यै, द्वितीयायै, तृतीयस्यै, तृतीयायै । तीयाद्वेति सिद्धे द्वितीया तृतीयाभ्यामिति स्पष्टार्थम् ।

४५. नद्या ऐ आसासाम्

वा न स्मर्यते। नदीसंज्ञकात् पराणि ङवन्ति वचनानि ऐ आस्, आस् आम् इति यथासंख्यं भवन्ति। नद्यै, नद्याः, नद्याः, नद्याम्। वध्वै, वध्वाः, वध्वाः, वध्वाम्।

४६. सम्बुद्धौ ह्रस्वः

नद्याः सम्बुद्धौ ह्रस्वो भवति। हे नदि, हे वधु। नद्या इति किम्? हे ग्रामणीः, हे खलपूः।

४७. अम्शसोरादिर्लोपम्

नद्याः परयोरम्शसोरादिर्लोपमापद्यते। नदीं, नदीः। वधूं, वधूः।

४८. ईकारान्तात् सिः

नदी संज्ञकेकारान्तात् परः सिर्लोपमापद्यते। नदी, मही, ईकारान्तोऽस्मादिति किं? लक्ष्मीः।

४९. व्यञ्जनाच्च

व्यञ्जनसंज्ञकात् परः सिर्लोपमापद्यते। वाक्, तड़ित्। संयोगान्तलोपे सिद्धञ्चेन्नादेर्घुंटो लोपः स्यात्। लिङ्गञ्चानुवर्त्तते।

५०. अग्नेरमोऽकारः

अग्निसंज्ञकात् परोऽमोरकारो लोपमापद्यते। अग्निं, पटुम्।

५१. औकारः पूर्व्वम्

अग्ने पर औकारः पूर्व्वस्वरमापद्यते। अग्नी, पटू, बुद्धी, धेनू।

५२. शसोऽकारः सश्च नोऽस्त्रियाम्

अग्ने परः शसोऽकारः पूर्व्वस्वरमापद्यते, सश्च नो भवत्यस्त्रियाम्। अग्नीन्, पटून्। अस्त्रियामिति किं? बुद्धीः, धेनूः।

५३. टा ना

अग्ने परस्य टावचनस्य नादेशो भवत्यस्त्रियाम्। अग्निना, पटुना। अस्त्रियामिति किं? बुद्ध्या, धेन्वा।

५४. अदोऽमुश्च

अदसोऽमुरादेशो भवत्यस्त्रियां टावचनस्य च नादेशः। अमुना। अस्त्रियामिति किम्? अमुया।

५५. इरेदुरोज्जसि

लिङ्गस्येरेद्भवत्युरोच्च जसि परे। अग्नयः, पटवः, बुद्धयः, धेनवः।

५६. **सम्बुद्धौ च**

सम्बुद्धौ लिङ्गस्येरेद्भवत्युरोच्च । हे अग्ने, हे धेनो । अग्ने सम्बुद्धावित्येके—हे नदि, हे वधू ।

५७ **ङे**

ङयि परतो लिङ्गस्येरेद्भवत्युरोच्च । अग्नये, पटवे, बुद्धये, धेनवे । ङे इत्यविकृत निर्देशात्—बुद्धयै, धेन्वै ।

५८. **ङसिङसोरलोपश्च**

अग्नि-संज्ञकात् परस्य ङसिङसोरकारस्य लोपो भवति, इरेच्च, उरोच्च । [इरेद्भवत्युरोच्च] अग्नेः, अग्नेः, धेनोः, धेनोः ।

५९. **गोश्च**

गोशब्दात् परस्य ङसिङसोरकारस्य लोपो भवति । गोः, गोः ।

६०. **ङिरौसपूर्व्वः**

अग्निसंज्ञकात् परो ङि सह पूर्व्वेण औभंवति । अग्नौ, धेनौ ।

६१। **सखिपत्योर्ङिः**

सखिपतिभ्यां परो ङिरौभवति । सख्यौ, पत्यौ । पुनर्ङिग्रहणं सपूर्व्वनिवृत्त्यर्थम् ।

६२. **ङसङिसोरुमः**

सखिपतिभ्यां परो ङसिङसोरकार उमापद्यते । सख्युः, सख्युः, पत्युः, पत्युः ।

६३. **ऋदन्तात् सपूर्व्वं**

ऋदन्तात् लिङ्गात् परो ङसिङसोरकारः सह पूर्व्वेण स्वरेण उमापद्यते । पितुः, पितुः, मातुः, मातुः, ऋदन्तादिति किं ? स्त्रो धातोः ।

६४. **आ सौ सिलोपश्च**

ऋदन्तस्य लिङ्गस्याभवति सौ परे सिलोपश्च । पिता, माता ।

६५. **अग्निवच्छसि**

ऋदन्तस्य लिङ्गस्याग्निवद्भवति शसि परे । पितॄन् । तत्रास्त्रियामिति प्रतिषेधो मातॄः ।

६६. **अङौ**

ऋदन्तस्य लिङ्गस्याभंवति ङौ परे । पितरि, मातरि । योगविभागात् पितरमपर्यायमः ।

६७. **घुटि च**

ऋदन्तस्य लिङ्गस्यार्भवति घुटि परे। पितरौ, पितरः। घुटीति किं ? पितॄन्। पृथग्योग उत्तरार्थः।

६८. **धातोस्तृशब्दस्यार्**

धातोर्विहितस्य तृशब्दस्य ऋत आर्भवति घुटि परे। अरोऽपवादः। कर्त्तारौ, कर्त्तारः। धातोर्विहितस्येति किं ? यातरौ, यातरः,—यतेऋंन् दीर्घश्च। तृशब्दस्येति किं ? तृचा सिद्धम्। शसादौ तु तृजन्तस्य तुजन्तस्य च प्रयोगः। क्रोष्टून् ननान्दरौ, ननान्दरः। नञि च नन्देः। क्रुशस्तन् घुटि स्त्रियाञ्च नास्त्यौणादिकत्वात्। क्रोष्टा, क्रोष्ट्री-क्रोष्टॄन्; क्रोष्ट्रा, क्रोष्टुना इत्येवमादयः।

६९. **स्वस्रादीनाञ्च**

स्वस्रादीनाञ्च ऋत आर्भवति घुटि परे। स्वसारौ, नप्तारौ।

"स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च।
होता पोता प्रशास्ता च अष्टौ स्वस्रादयः स्मृताः॥"

७०. **आ च न सम्बुद्धौ**

ऋदन्तस्य लिङ्गस्यार् आ च न भवति सम्बुद्धौ अर्थात् अर् एव। हे कर्त्तः, हे स्वसः।

७१. **ह्रस्वनदी श्रद्धाभ्यः सिर्लोपम्**

ह्रस्वनदी श्रद्धाभ्यः परः सम्बुद्धिः सिर्लोपमापद्यते, हे वृक्ष, हे अग्ने, हे नदि, हे वधु, हे श्रद्धे, हे माले। सम्बुद्धिरिति किं वृक्षः। नदीश्रद्धाग्रहणमुत्तरार्थमिहार्थञ्च।

७२. **आमि च नुः**

ह्रस्वनदीश्रद्धाभ्य आमि परे नुरागमो भवति। वृक्षाणाम्, अग्नीनाम्, धेनूनाम्, वधूनाम्, श्रद्धानाम्, मालानाम्। श्रद्धासहचरितस्यामो ग्रहणाद् वा—नद्याम्, य्वाम्।

७३. **त्रेस्त्रयश्च**

त्रेस्त्रयादेशो भवति नुरागमश्चामि परे। त्रयाणाम्, परमत्रयाणाम्।

७४. **चतुरः**

चत्वार् इत्येतस्यामि परे नुरागमो भवति। चतुर्णाम्। अप्रधानादेवातिचतुराम्।

७५. **संख्यायाः ष्णान्तायाः**

संख्याया षकारनकारान्तायाश्चामि परे नुरागमो भवति। षण्णाम्। पञ्चानाम्। अन्तग्रहणाद् भूतपूर्व्वनान्ताया अपि—अष्टानाम्, संख्याया इति किम् ? विप्रुषाम्, यज्वनाम्।

७६. **कतेश्च जस्शसोर्लुक्**

कते संख्यायाः षकारनकारान्तायाश्च जस्शसोर्लुग् भवति । कति, कति, षट्, षट्, पञ्च, पञ्च ।

७७. **नियो ङिराम्**

नियः परो ङिराम्भवति । नियाम्, ग्रामण्याम् ।

इति दौर्गसिंहवृत्तौ नाम्नि चतुष्टये प्रथमः पादः समाप्तः

द्वितीयः पादः

७८. **न सखिष्टादावग्निः**

सखिस्थः सखिष्टादौ स्वरे नाग्निर्भवति, सख्या, सख्ये ।

७९. **पतिरसमासे**

पतिस्थः पतिष्टादौ स्वरे नाग्निर्भवति असमासे । पत्या, पत्ये । असमास इति किम् । नरपतिना ।

८०. **स्त्री नदी वत्**

स्त्रीशब्दो नदीवद् भवति विभक्त्यौ । हे स्त्रि, हे स्त्रियै, स्त्रीणाम् । विकल्प मपि बाधते ।

८१. **स्त्र्याख्या वियुवौ वामि**

स्त्र्याख्या त्रिषुवस्थानावामि परे नदीवद् भवतो वा । स्त्रीणाम्, स्त्रियाम्, भ्रूणाम्, भ्रुवाम् । स्त्र्याख्याविति किम् । यवक्रियाम्, कटप्रुवाम् ।

८२. **ह्रस्वश्च ङवति**

ह्रस्वश्च इदुदेव, स्त्र्याख्या विषुवस्थानो च ङवति परे नदीवद् भवतो वा । बुद्ध्यै, बुद्धये, धेन्वै, धेनवे, श्रियै, श्रिये, भ्रुवै, भ्रुवे । पट्वै स्त्रियै वेति केचित् । ङवतीति किम् ? हे श्रीः, हे भ्रूः । अप्रसिद्धमुपमेयमिति ।

८३. **नपुंसकात् स्यमोर्लोपो न च तदुक्तम्**

नपुंसकलिङ्गात् स्यमोर्लोपो भवति तदुक्तञ्च कार्यं न भवति । पयः, पयः, तत्, सुसखि, सुसखि । नपुंसकादिति किम् । सुपया गौः ।

८४. **अकाराद् असम्बुद्धौ मुश्च**

अकारान्ता न्नपुंसक लिङ्गात् परयो स्यमोर्लोपो भवति मुरागमश्चासम्बुद्धौ । कुम्भम्, अतिजरम् । असम्बुद्धाविति किं : हे कुम्भ ।

८५. **अन्यादेस्तु तुः**

अन्यादेर्गणान्नपुंसकलिङ्गात् परयोः स्यमोर्लोपो भवति तुरागमश्च । अन्यत्, अन्यतरत्, इतरत्, कतरत्, कतमत्, तुशब्दोऽसम्बुद्धिनिवृत्त्यर्थः । हे अन्यत् ।

८६. **औरीम्**

सर्व्वस्मान्नपुंसकलिङ्गात् पर औरीमापद्यते । कुम्भे, पयसी ।

८७. **जस्शसो शिः**

सर्व्वस्मान्नपुंसकलिङ्गात् परयोः सर्व्वयोर्जस्शसो स्थाने शिर्भवति । पद्मानि, पयांसि ।

८८. **घुट् स्वराद्घुटि नुः**

घुटः पूर्व्वः स्वरात् परो नपुंसकलिङ्गस्य घुटि परे नुरागमो भवति । पयानि, पयांसि, सुकर्त्तृणि, सुसखीनि । कथं सुवल्गि, गोमन्ति, सुवलगि । घुटो व्यवहितत्वात् । गोरक्षीति घुड्जातित्वाददोषः । बहूर्जि बहुर्ज्जीति वा वक्तव्यम् ।

८९. **नामिनः स्वरे**

नाम्यन्तान्नपुंसकलिङ्गात् स्वरे परे नुरागमो भवति । वारिणी, वारिणे । नामिनः स्वर इति किं । कुलयोः ।

९०. **अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ ।**

नाम्यन्तानां नपुंसक लिङ्गानामस्थ्यादीनां टादौ स्वरेऽन्तोऽन् भवति । अस्थ्ना, दध्ना, सक्थ्ना, अक्ष्णा, अत्यस्थ्ना, अतिदध्ना छात्रेण । अकारोच्चारणं किम् । अस्थ्नि, अस्थनि वा स्यात् ।

९१. **भाषितपुंस्कं पुंवद् वा**

भाषितपुंस्कं नाम्यन्तं नपुंसकलिङ्गं टादौ स्वरे पुंवद्भवति वा । कर्त्रा, कर्त्तृणा कुलेन । मृदवे, मृदुने वस्त्राय । भाषितपुंसकमिति किम् । वारिणे । नाम्यन्तमिति किं ? सोमपेन कुलेन । नपुंसकमिति किं ? कल्याण्यै । भाषितपुंसकोऽर्थ इति किं ? पीलुने फलाय ।

९२. **दीर्घमामि सनौ**

नाम्यन्तं लिङ्गं सनावामि परे दीर्घमापद्यते । अग्नीनां, धेनूनां, कर्त्तॄणाम् । सनोग्रहणमुत्तरार्थमिह कृते च न्वागमे दीर्घार्थञ्च ।

९३. **नान्तस्य चोपधायाः**

नान्तस्य लिङ्गस्योपधाया दीर्घो भवति सनावामि परे । पञ्चानां, सप्तानाम्, सनाविति किं ? वर्म्मनाम् ।

९४. **घुटि चासम्बुद्धौ**

नान्तस्यलिङ्गस्योपधाया दीर्घो भवति घुट्यसम्बुद्धौ । राजा, राजानो, सामानि, नान्तस्येति किं ? जनं, जनो । असम्बुद्धाविति किं ? हे राजन् ।

९५. सान्तमहतोर्नोपधायाः

सान्तमहन्त इत्येतयोर्नकारस्योपधाया दीर्घो भवति घुट्यसम्बुद्धौ । श्रेयान्, श्रेयांसौ, महान्, महान्तौ । असम्बुद्धाविति किं ? हे श्रेयन्, हे महन् । सान्तस्येति किं ? हंसं, हंसौ । साहचर्याद् धातोर्न स्यात्-सुहिन्, सुहिंसौ ।

९६. अपश्च

अप इत्येतस्य नोपधायाश्च दीर्घो भवति घुट्यसम्बुद्धौ । आपः, स्वाम्पि, तड़ागानि । असम्बुद्धाविति किं ? ह शुच्यप् ।

९७. अन्त्वसन्तस्य चाधातोः सौ

अन्तु अस् इत्येवमन्तस्याधातोः श्रुतस्यातः सावसम्बुद्धौ दीर्घो भवति । भवान्, गोमान् सुश्रोताः । पुंस्यपि दीर्घाहो निदाघः । अधातोरिति किम् । पिण्डग्र चर्म्मवः । असम्बुद्धाविति किम् ? हे सुश्रोतः ।

९८. इन्-हन्-पूषार्यम्णां शौ च

इन् हन् पूषन् अर्यमन् इत्येतेषामुपधाया दीर्घो भवति सौ शौ च परे असम्बुद्धौ । सुदण्डीनि, सुवृत्रहाणि, सुपूषाणि, स्वर्यमाणि । दण्डी, वृत्रहा, पूषा, अर्य्यमा । असम्बुद्धाविति किम् ? हे दण्डिन् । सौ शावेवेति नियमात्- दण्डिनौ, वृत्रहणौ, पूषणौ, अर्य्यमणौ । अस्मादेव हन उपधाया दीर्घात् क्विपि न दीर्घः ।

९९. उशनः पुरुदंशोऽनेहसां सावनन्तः

उशनस्, पुरुदंशस् अनेहस् इत्येतेषामन्तोऽन् भवति सावसम्बुद्धौ । उशना, पुरुदंशा, अनेहा । असम्बुद्धाविति किम् ? हे पुरुदंशः, अनेहः, हे उशनः, हे उशनन्, हे उशन्, नञोऽनित्यत्वात् । अकार उत्तरार्थः ।

१००. सख्युश्च

सख्युरन्तोऽन् भवति सावसम्बुद्धौ । यथा असम्बुद्धाविति किम् ? हे सखे ।

१०१. घुटि त्वै

सख्युरन्त ऐर्भवति घुटि परे । सखायौ सखायः । घुटीति किम् ? सखीन् । तुशब्द उत्तरत्रासम्बुद्धि निवृत्त्यर्थः ।

१०२. दिव उद्व्यञ्जने

दिवो वकारस्योद्भवति व्यञ्जने परे । द्युभ्याम्, द्युषु, द्युगतः । द्युत्वम् । ये न स्यात्—दिव्यम् ।

१०३. औ सौ

दिवो वकारस्यौर्भवति सौ परे । द्यौ; हे द्यौः ।

१०४. वाम्या

दिवो वकारस्या भवति वा अमि परे । द्याम्, दिवम्, अतिद्याम्, अतिदिवम् ।

१०५, युजेरसमासे नुर्घुटि

युजिरः क्विबन्तस्यासमासे नुर्भवति घुटि परे । युङ्, युञ्जौ, युञ्जः । असमास इति किम् ? अश्वयुक् ।

१०६. अभ्यस्तादन्तिरनकारः

द्वयमभ्यस्तम्, जक्षादिश्चेति वक्ष्यति । अभ्यस्तात् परोऽन्तिरनकारको भवति घुटि परे । ददत्, दधत्, जक्षत्, जाग्रत् । अभ्यस्तादिति किं ? लिहन् ।

१०७. वा नपुंसके

अभ्यस्तात् परोऽन्तिरनकारको नवति वा नपुंसके घुटि परे । ददति, ददन्ति; जक्षति, जक्षन्ति, जाग्रति, जाग्रन्ति कुलानि ।

१०८. तुदभादिभ्यः ईकारे

तुद इत्यदन्तोऽनुक्रियते । तुदभादिभ्यः परोऽन्तिरनकारको भवति ईकारे परे । तुदती, तुदन्ती स्त्री । तुदती, तुदन्ती कूले । भाती, भान्तीः स्त्री । भाती, भान्ती कूले । तुदभादिभ्य इति किं ? पचन्ती, दीव्यन्ती ।

१०९. हनेर्हेर्घिरुपधालोपे

हनेरुपधाया लोपे कृते हे स्थाने घिर्भवति । वृत्रघ्नः, वृत्रघ्ना । उपधालोपे इति किम् ? वृत्रहयति ।

११०. गोरौ घुटि

गोर्मुख्यस्यौर्भवति घुटि परे । गौ, गावौ, गावः । गोर्घुटीति किम् ? हे चित्रगो, हे चित्रगवः ।

१११. अम्शसोरा

गोशब्दान्तस्य आ भवति अम्शसो परयोः । गां, गाः । दीर्घः किम् ? पुंसि स्त्रियामादा न स्यात् ।

११२. पन्थिमन्थि ऋभुक्षीणां सौ

पथ्यादीनामन्त आ भवति सौ परे । पन्थाः, हे पन्थाः, मन्थाः, हे मन्थाः, ऋभुक्षाः, हे ऋभुक्षाः ।

११३. अनन्तो घुटि

पथ्यादीनामन्तोऽन् भवति घुटि परे । पन्थानौ, मन्थानौ, ऋभुक्षाणौ ।

११४. अघुट् स्वरेलोपम्

पथ्यदीनामन्तोऽघुट्स्वरे लोपमापद्यते । पथः, पथाः, मथः, मथा, ऋभुक्षः ऋभुक्षा ।

११५. व्यञ्जने चैषां निः

एषां पथ्यादीनामघुट्स्वरे व्यञ्जने च निर्लोपमापद्यते। पथः, पथिकः, पथयति, मथः, मथिकः, मथयति। पथिभ्यां, पथित्वं, मथिभ्यां, मथित्वम्। एषां ग्रहणमघुट्-स्वर व्यञ्जनमात्रनिलोपार्थं, तेन—पथिगतः, पथ्युत्तमः; मथिगत, मथ्युत्तमः।

११६. अनुषङ्गश्चाक्रुञ्चेत्

क्रुञ्चश्च इच्च क्रुञ्चेदिति लुप्त विभक्तिकं पदम्। अनुषङ्गसंज्ञको नकारो लोपमापद्यते अघुट्स्वरव्यञ्जनयोः। क्रुञ्चेरिदनुबन्धस्य च न भवति। विदुषः, विदुषा, विदुषी, वैदुष्यम्। महतः, महतो, महद्भ्यां, महत्सु महत्ता। अक्रुञ्चेदिति किं ? क्रुञ्चः, क्रुङ्भ्यां, सुकंस, सुकम्भ्याम्।

११७. पुंसोऽन्शब्दलोपः

पुंमनस् इत्येतस्य अन्शब्दस्य लोपो भवति अघुट्स्वरव्यञ्जनयोः पुंसः, पुंसा, पुम्भ्याम्, पौस्नं, पुंस्त्वम्। अघुट्स्वरव्यञ्जनयोरिति कि ? पुमांसो।

११८. चतुरो वाशब्दस्योत्वम्

चत्वारः, चतुरः।

११९. अनडुहश्च

अनड्वाह, अनडुहा, अनडुद्भ्याम्, आनडुहिकः, अनडुह्यम्, अनडुही: अन-ड्वाही स्त्री वेत्येके।

१२०. सौ नुः

अनड्वाह् इत्येतस्य सौ परे नुरागमो भवति। अनड्वान्। साविति किम्। अनड्वाहो।

१२१. सम्बुद्धावुभयोर्ह्रस्वः

उभयोश्चतुरनडुहोः सम्बुद्धौ ह्रस्वो भवति। हे प्रिय चत्वः, हे अनड्वन्।

१२२. अदसः पदे मः

अदसः पदे सति दस्य मो भवति विभक्तौ। अमुष्मात्, अमुष्मिन्। विभक्ता-विति किम् ? अदस्यति, अदस्त्वम्, अदःपुत्रः। अदमुयङ्, अमुद्रयङ्, अमुमुयङ् अदद्रयङ् इति वक्तव्यम्।

१२३. अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम्

अघुट् स्वरादौ प्रत्यये परे सेट्कस्यापि असेट्कस्यापि वन्सेर्वशब्दस्योत्वं भवति। पेचुषः, पेचुषा, पेचुषी, पैचुषम्। विदुषः, विदुषा, वैदुषम्। घे च वक्तव्यम, पैचुष्यम्, वैदुष्यम्।

१२४. श्वयुवमघोनाञ्च

श्वन्, युवन् मघवन् इत्येतेषां वशब्दस्योत्वं भवति अघुट्स्वरादौ प्रत्यये परे। शुनः, शुना, शुनी यूनः, यूना (यूनो), मघोनः, मघोना, मघोनी। अण्यधिकारात्—

शौवनं, मासं, यौवनं वर्त्तते, माघवनः स्थालीपाकः। तद्धिते लक्षतः—उपशुनं, शुनः संकोचः—शौवः।

१२५. वाहेर्वाशब्दस्यौ

वाहेर्वाशब्दस्यौर्भवति अघुट्स्वरादौ प्रत्यये परे। प्रष्ठौहः' प्रष्ठौहा, प्रष्ठौही प्राष्ठौह्यम्।

१२६. अन्चेरलोपः पूर्वस्य च दीर्घः

अन्चेरकारस्य लोपो भवति अघुट्स्वरादौ प्रत्यये परे, पूर्व्वस्य च दीर्घ आन्तरतम्यात्। प्रतीचः, प्रतीचा, प्रतीची, प्रातीच्यम्। गोऽचः, गोऽचा, गोऽची, गोऽच्यम्।

१२७. तिर्यङ् तिरश्चिः

तिर्यन्च् इत्ययं तिरश्चिर्भवति अघुट्स्वरादौ। तिरश्चः, तिरश्चा, तिरश्ची, तैरश्च्यम्।

१२८. उदङ् उदीचिः

उदन्च् इत्ययमुदीचिर्भवति अघुट्स्वरादौ। उदीचः, उदीचा, उदीची, औदीच्यम्।

१२९. पादः पद् समासान्तः

समासान्त पाच्छब्द पदमापद्यते अघुट्स्वरादौ। व्याघ्रपदः, व्याघ्रपदा, व्याघ्रपदी, वैयाघ्रपद्यम्। एकपदः, सुपदः, कुम्भपदी। असमासान्त इत्यपि—पदः पश्य। पादसमानार्थः पादप्यस्तीति मतम्।

१३०. अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्व्वविधौ

अनोऽकारस्य लोपो भवति अघुट्स्वरादौ स चेदवमसंयोगात् परो भवति स चालुप्तवद्भवति पूर्व्वस्य वर्णस्य विधौ कर्त्तव्ये। राज्ञः, राज्ञा, दध्नः, दध्ना, प्रतिदीव्नः, प्रतिदीव्ना। अवमसंयोगादिति किं? पर्व्वणः, चर्म्मणः।

१३१. ईङ्योर्वा

ईङ्योः परयोरवमसंयोगात् परस्यानोऽकारस्य लोपो भवति वा। स चालुप्तवद्भवति पूर्व्वस्य वर्णस्य विधौ कर्त्तव्ये साम्नी, सामनी। राज्ञि, राजनि। ङिसाहचर्याद् राज्ञीति नित्यम्। अवमसंयोगादिति किं? पर्व्वणी, चर्म्मणी।

१३२. आ धातोरघुट्स्वरे

धातोराकारस्य लोपो भवति अघुट्स्वरे। कीलालपः कीलालपाः। पुनरघुट्स्वरग्रहणं सम्बुद्धाधिकारनिवृत्त्यर्थं, तेन-शङ्खध्मः।

१३३. **ईदूतोरियुवौ स्वरे**

धातोरीगेदूतोरियुवौ भवतः यथासंख्यं विभक्तिस्वरे। नियौ, नियः, लुवौ, लुवः। विभक्ताविति किं ? न्यर्थः, ल्वर्थः। स्वायम्भुवमिति वक्तव्यम्।

१३४. **सुधीः**

सुधीशब्द इयं प्राप्नोति विभक्तिस्वरे। सुधियौ, सुधियः। सुधीरिति किं ? प्रध्यौ, प्रध्यः।

१३५. **भूरवर्षाभूरपुनर्भूः**

भूरुवं प्राप्नोति विभक्ति स्वरे अवर्षाभूरपुनर्भूः। मित्रभुवौ, मित्रभुवः, अतिभुवौ, अतिभुव.। अवर्षाभूरपुनर्भूरिति किं वर्षाभ्वौ, पुनर्भ्वौ।

१३६. **अनेकाक्षरयोस्त्वसंयोगाद्यवौ**

अनेकाक्षरयोर्लिङ्गयोरीदूतौ तयोर्धातोरसंयोगात् परयोर्यवौ भवतः यथासंख्य विभक्तिस्वरे। ग्रामण्यौ, ग्रामण्यः, यवल्वौ, यवल्वः। अनेकाक्षरयोरिति किं ? नियौ, लुवौ। असंयोगादिति किं ? यवक्रियौ, यवक्रियः; कटप्रुवौ, कटप्रुवः। अव्ययकारकाभ्यामेवायंविधिः।

१३७. **भ्रूर्धातुवत्**

भ्रूशब्दो धातुवद्भवति विभक्तिस्वरे। भ्रुवौ, भ्रुवः। अतिदेशोऽयम्।

१३८. **स्त्री च**

स्त्रीशब्दो धातुवद्भवति विभक्तिस्वरे। स्त्रियौ, स्त्रियः।

१३९. **वामशसोः**

स्त्रीशब्दो धातुवद् भवति वा अमशसो परयोः। स्त्रियम्, स्त्रीम्, स्त्रियः, स्त्रीः।

१४०. **भवतो वादेरुत्वं सम्बुद्धौ**

भवतोऽवयवस्य वादेरुत्वं भवति वा सम्बुद्धौ। हे भोः, हे भवन्। सन्निपातलक्षणत्वात् सम्बुद्धौ लोपो न स्यात्।

१४१. **अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्व्वोऽक्कः**

अव्ययानां सर्वनाम्नाञ्चान्त्यात् स्वरात् पूर्व्वोऽक् प्रत्ययो भवति वा कप्रत्ययश्च बहुलम्। उच्चकैः, उच्चैः, नीचकैः, नीचैः सर्व्वकः, सर्व्वः, विश्वकः, विश्व, युष्मकाभिः, युष्माभिः, अस्मकाभिः, अस्माभिः। विभक्तेश्च पूर्व्वं इष्यते—त्वयका, मयका। आख्यातस्य च—पचतकि, पचति, भिन्धकि, भिन्धि। कः प्रत्ययश्च। यावक,, मनिकः। अज्ञाने कुत्सायाञ्च—अश्वकः। दयायाम्—वत्सकः। एहकि,

एहि। इह नु ते धानाकाः, गृहाद् दूरं मा गाः। अल्पे—तैलकं, ह्रस्वे, वृक्षकः। संज्ञायाम् देवदत्तकः।

१४२· के प्रत्यये स्त्रीकृताकारपरे पूर्व्वोऽकार इकारम्

के प्रत्यये स्त्रीकृताकारपरे पूर्व्वोऽकार इकारमापद्यते। सर्व्विका, उष्ट्रिका, पाचिका, पाठिका। क इति किम् ? चेतुना। प्रत्यय इति किं ? तका। स्त्रीति किं ? पाचकाभ्याम्। कृत इति किं ? पुत्रकाम्या। बहुलाधिकारात्—यका, सका। जीविका, नन्दका आशिष्यका।

इति दौर्गसिह्यां वृत्तौ नाम्नि चतुष्टये द्वितीयः पादः समाप्त :

तृतीयः पाद :

१४३। युष्मदस्मदोः पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ

युष्मदस्मदो पदं पदात् परं षष्ठीचतुर्थीद्वितीयासु बहुत्वे निष्पन्नं यथासंख्यं वस्नसौ प्राप्नोति वा। पुत्रो युष्माकम्, पुत्रोऽस्माकम्—पुत्रो वः। पुत्रो नः। पुत्रो युष्मभ्यं, पुत्रोऽस्मभ्यम्। पुत्रो वः, पुत्रो नः। पुत्रो युष्मान्, पुत्रोऽस्मान्—पुत्रो वः, पुत्रो नः। युष्मदस्मदाविति किं ? पुत्रस्तेषाम्। पदादिति किं ? युष्माकम्, अस्माकम्।

१४४. वां नौ द्वित्वे

युष्मदस्मदोः पदं पदात् परं षष्ठीचतुर्थीद्वितीयासु द्वित्वे निष्पन्नं यथा संख्यं वांनावित्येतौ प्राप्नोति वा। ग्रामो युवयोः, ग्राम आवयोः, ग्रामो वां, ग्रामो नौ एवं दीयते, पातु। आस्विति किं ? भद्रौ युवां, भद्रावावाम्।

१४५. त्वन्मदोरेकत्वे ते-मे-त्वा-मा-तु-द्वितीयायाम्

एकत्वे वर्त्तमानयोर्युष्मदस्मदोस्त्वन्मद्भूतयोः पदं पदात् परं षष्ठीचतुर्थीद्वितीयास्वेकत्वे निष्पन्नं यथासंख्यं ते मे इत्येतौ प्राप्नोति वा। त्वा मा तु द्वितीयायाम्। पुत्रस्तव, पुत्रो मम, पुत्रस्ते, पुत्रो मे। एवं दास्यति। पुत्रस्त्वा, पुत्रो मा पातु।

१४६. न पादादौ

पादस्यादौ वर्त्तमानानां युष्मदस्मदादीनां पदमेतानादेशान्न प्राप्नोति।
"रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं पापनाशनः।"
पादादाविति किम् ? पान्तु वो नरसिंहस्येत्यादि।

१४७. चादियोगे च

चादिना योगे वर्त्तमानानां युष्मदस्मदादीनां पदमेतानादेशान्न प्राप्नोति। पुत्रो युष्माकञ्च, पुत्रोऽस्माकञ्च। एवमादि च वा अह एव। गौणयोगे न स्यात्—ग्रामश्च ते स्वं, नगरञ्चमे स्वम्।

१४८. एषां विभक्तावन्त लोपः

विभक्तौ परतो वर्त्तमानानामेषामन्तस्य लोपो प्राप्नोति। युष्मभ्यम्, अस्मभ्यम्, अतियुष्मभ्यम्, अत्यस्मभ्यम्, अतित्वान्, अतिमान्, त्वयि, मयि, अतित्वयि, अतिमयि। विभक्ताविति किं? युष्मत्पुत्रः, त्वदीयः।

१४९. युवावौ द्विवाचिषु

युष्मदस्मदोर्दिवाचिषु परतो युवावौ भवतो यथासंख्यम्। युवाभ्याम्, आवाभ्याम्, अतियुवाभिः, अत्यावाभिः। श्रुतयोर्द्विवाचिस्विति किं? त्वां युष्मानतिक्रान्तौ—अतित्वाम्, अतियुष्माम्। युवयोः पुत्रः—युष्मत्पुत्रः, युवयोर्वयं-युष्मदीयः। प्रत्ययलोपलक्षणेनान्तलोपात्।

१५०. अमौ चाम्

युष्मदस्मदादिभ्यः परोऽमा चाम् भवति। त्वाम्, माम्, युवाम्, आवाम्। द्विवाच्यधिकाराद् वा साहचर्यं न स्यात्।

१५१ आन् शस्

युस्मदस्मदादिभ्यः परः शस् आन् भवति। युष्मान्, अस्मान्, अतित्वान् अतिमान्।

१५२. त्वमहं सौ सविभक्तयोः

त्वन्मदोर्युष्मदस्मदोश्च सौ सविभक्तयोस्त्वमहमित्येतौ भवतः यथासंख्यम्। त्वम्, अहम्, अतित्वम्, अत्यहम्। सविभक्तयोरिति किम्? अधित्वत्, अधिमत् लुक्।

१५३. यूयं वयं जसि

त्वन्मदोर्युष्मदस्मदोश्च जसि सविभक्तयोर्यूयं वयमित्येतौ भवतः यथासंख्यम्। यूयम्, वयम्, अतियूयम्, अतिवयम्।

१५४. तुभ्यं मह्यं ङयि

त्वन्मदोर्युष्मदस्मदोश्च ङयि सविभक्तयोस्तुभ्यं मह्यमित्येतौ भवतः। यथासंख्यम्। तुभ्यम्, मह्यम, अतितुभ्यम्, अतिमह्यम्।

१५५. तव मम ङसि

त्वन्मदोर्युष्मदस्मदोश्च ङसि सविभक्तयोस्तवमम इत्येतौ भवतः यथा-

संख्यम् । तव, मम, अतितव, अतिमम । युवावादिषु कृतेषु पश्चादक्—युवकाभ्याम्, आवकाभ्याम् ।

१५६. अत् पञ्चम्यद्वित्वे

युष्मदस्मदादिभ्योऽद्वित्वे वर्त्तमाना पञ्चम्यद् भवति । त्वत्, मत्, युष्मत्, अस्मत्, अतियुवत्, अत्यावत् । अद्वित्वे इति किं ? युवाभ्याम्, आवाभ्याम् ।

१५७. भ्यसभ्यम्

युष्मदस्मदादिभ्यः परो भ्यम् अभ्यम् भवति । युष्मभ्यम्, अस्मभ्यम्, अतितुभ्यम्, अतिमह्यम् । अकारोच्चारणं किं ? घुटयैत्वं मा भूत् ।

१५८. सामाकम्

आभ्यां परः स्वागमयुक्त आम् आकम् भवति । युष्माकम्, अस्माकम् । सामिति किं ? प्रिययुष्मयाम्, अतित्वयाम् ।

१५९. एत्वमस्थानिनि

स्थानं प्रसङ्गो वा । अप्रसङ्गिन्यनादेशिनि स्यादौ एषामन्तस्यैत्वं भवति । त्वया, मया, युवयोः, आवयोः, त्वयि, मयि, अतित्वयि, अतिमयि । अस्थानिनि इति किं ? युष्मान्, अस्मान्, अतित्वान्, अतिमान् ।

१६०. आत्वं व्यञ्जनादौ

एषामन्तस्यात्वं भवति अस्थानिनि व्यञ्जनादौ स्यादौ । युवाभ्याम् । आवाभ्याम्, अतियुवाभिः, अत्यावाभिः, अतित्वासु, अतिमासु । आदिग्रहणं साक्षात् प्रतिपत्त्यर्थं, तेन—युष्मत्पुत्र, अधित्वत्, अधिमत्, लुक् ।

१६१. रैः

रै शब्द आत्वं प्राप्नोति व्यञ्जनादौ स्यादौ । राः, राभ्याम्, अतिराभ्याम्, कुलाभ्याम् । स्यादाविति किम् ? अतिरि, कुलम् ।

१६२. अष्टनः सर्व्वासु

अष्टनोऽन्तस्यात्वं भवति सर्व्वासु विभक्तिषु । अष्टाभिः, अष्टाभ्यः, अष्टासु, प्रियाष्टाः, प्रियाष्टौ ।

१६३. औ तस्माज्जस्शसोः

तस्मादष्टनः कृताकारात् परयोः सर्व्वयोर्जस्शसो स्थाने और्भवति । अष्टौ, अष्टौ, तस्माद्ग्रहणमात्वस्यानित्यार्थं तेनाष्टाभिः, अष्टसु, वा स्यात् ।

१६४. **अर्व्वणस्त्वसावनञ्**

अर्वन् शब्दोऽर्व्वन्तिर्भवति असौ प्रत्यये परे, चेदनञ् । अर्व्वन्तौ, अर्व्वन्तः, अर्व्वत्सु, अर्व्वतम्, अर्व्वत्यम्, अर्व्वती । असाविति किं ? अर्वा । अनञि इति किम् ? अनर्व्वाणौ ।

१६५. **सौ च मघवान् मघवा वा**

विभक्तौ सौ च परतो मघवन् शब्दो मघवन्तुर्भवति वा । मघवान्, मघवन्तौ, मघवन्तः, मघवत्सु । तद्धिते स्वरे ये च स्त्रीकारे च माघवतम्, मघवती । पक्षे-मघवा, मघवानौ, इत्यादि ।

१६६. **जरा जरस् स्वरे वा**

जराशब्दो जरस् भवति वा विभक्तिस्वरे । जरे, जरयोः, जराः, जरसः । गणपाठाच्चोपजरसमिति नित्यम् ।

१६७. **त्रिचतुरोः स्त्रियां तिसृचतसृ विभक्तौ**

स्त्रियां वर्तमानयोस्त्रिचतुरोस्तिसृ चतसृ इत्येतौ भवतः विभक्तौ यथा संख्यम् । तिस्रः, चतस्रः, तिसृभिः, चतसृभिः, प्रियतिसृ, प्रियचतसृ कुलं वा ।

१६८. **तौ रं स्वरे**

तौ तिसृचतस्रौ रं प्राप्नुतः विभक्तिस्वरे । तिस्रः, चतस्रः, बाधकबाधनार्थोऽयं योगः ।

१६९. **न नामि दीर्घम्**

तौ तिसृचतस्रौ दीर्घं न प्राप्नुतः सनावामि परे । तिसृणाम्, चतसृणाम् ।

१७०. **नृ वा**

नृशब्दो दीर्घं प्राप्नोति वा सनावामि परे । नृणाम्, नृणाम् ।

१७१. **त्यदादीनामविभक्तौ**

त्यदादीनामन्तस्याकारो भवति विभक्तौ । स्यः, त्यौ, सः, तौ, यत्र, तत्र । सर्व्वनामान्तर्गणो द्विपर्यन्त इह त्यदादिः । विभक्ताविति किं ? त्यदीयः ।

१७२. **किमः कः**

किम् शब्दः को भवति विभक्तौ । कः, कौ, कदा, विभक्ताविति किं ! किंवान् ।

१७३. **दोऽद्वेर्मः**

त्यदादीनां दकारस्य मकारो भवति विभक्तावद्वेः । इमौ, इमकौ । अद्वेरिति किं ? द्वौ ।

१७४. सौ सः

त्वदादीनां दकारस्य सकारो भवति सौ विभक्तौ। असौ, असकौ। साक्षात्सा-विति किम् ? असौ पुत्रोऽस्येति—अदः पुत्रः।

१७५. तस्य च

त्यदादीनां तकारस्य सकारो भवति सौ विभक्तौ। स्यः, स्यकः, सः, सकः। साक्षात्साविति किम् ? तत्पुत्रः।

१७६. इदमियमयं पुंसि

इदमियं भवति अयंञ्च पुंसि सौ विभक्तौ। इयम् स्त्री। अयं पुमान्। इदं कुलमिति तदुक्तप्रतिषेधात्। सौ विभक्ताविति किम् ? इदम्पुत्रः।

१७७. अद्व्यञ्जनेऽनक्

इदमग्वर्ज्जितोऽद्भवति व्यञ्जनादौ विभक्तौ। आभ्याम्, एभिः। अनगिति किम् ? इमकः। साक्षात्विभक्ताविति किम् ? अस्य पुत्रः—इदम्पुत्रः।

१७८. टौसोरन्

इदमोऽग्वर्ज्जितस्य टौसोर्विभक्तयोरनादेशो भवति। अनेन, अनयोः। अनगिति किम् ? इमकेन, इमकयोः।

१७९. एतस्य चान्वादेशे द्वितीयायाञ्चैन

एतस्य इदमश्च टौसोर्विभक्तौ द्वितीयायाञ्च कथितस्यैवानुकथनविषये एनादेशो भवति। एतं व्याकरणमध्यापय, अथो एनं वेदमध्यापय। इमं घटमानय, अथो एनं परिवर्त्तय। एतेन रात्रिरधीता, अथो अनेन अहरप्यधीतम्। एतयोः शोभनं शीलम्, एनयोश्च प्रभूतं स्वम् इत्यादि योज्यम्।

१८०. तस्माद्भिस् भिर्

तस्मादिदमः कृताकारात् परो भिस् भिर् भवति। एभिः। केचित्स्माविति किम् ? इमैः।

१८१. अदसश्च

अदसोऽग्वर्जितात् परो भिस् भिर् भवति। अमीभिः। अनगिति किम्। अमुकैः। चकार उत्तरत्रानग् निवृत्त्यर्थः।

१८२. सावौ सिलोपश्च

अदसोऽन्त्यस्यौर्भवति सौ परे सिलोपश्च। असौ, असकौ, साक्षात्साविति किम् ? असौ पुत्रोऽस्येति-अदःपुत्रः।

१८३. उत्वं मात्

अदसो मात् परस्य वर्णमात्रस्योत्वं भवति। अमुम्, अमू, अमून्। मादिति किम्? अमुकाभ्याम्।

१८४. एद्बहुत्वे त्वी

अदसो मात् परो बहुत्वे निष्पन्न एत ईर्भवति। अमी, अमीभ्यः। बहुत्वे इति किम्? अमू। मादिति किम्? अमुकेभ्यः। तुशब्दश्च उत्तरत्र बहुत्वनिवृत्त्यर्थः।

१८५. अपां भे दः

अपां विभक्तौ भे दो भवति। अद्भि, स्वद्भ्याम्। विभक्ताविति किं? अब्भारः।

१८६. विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनाञ्च

विरामे व्यञ्जनादिषु च अनड्वाह, नहिवन्सीनाञ्च लिङ्गानामन्तस्य दो भवति। (स्वनडुत्) स्वनडुद्भ्याम्, उपानत्, उपानद्भ्याम्, (सुविद्वत्) सुविद्वद्भ्याम्। व्यञ्जनमिह सामान्यं, तेन उपानह्यम्।

१८७. स्रसिध्वसोश्च

स्रसिध्वसोर्लिङ्गयोरन्तस्य विरामे व्यञ्जनादिषु च दो भवति। उखास्रत्, उखास्रद्भ्याम्, उखास्रत्कल्पः। पर्णध्वत्, पर्णध्वद्भ्याम्, पर्णध्वद्भ्यः।

१८८. हशषछान्तेजादीनां डः।

हशषछान्तानां यजादीनाञ्च लिङ्गानामन्तस्य विरामे व्यञ्जनादिषु च डो भवति। मधुलिट्, मधुलिड्याम्, मधुलिट्पाशः। सुविट्, सुविड्भ्याम्, सुविट्तरः। षट्, षट्, षड्भिः, षट्त्वम्। शब्दप्राड्भ्याम्, शब्दप्राट्त्वम्। देवट्, देवड्भ्याम्, देवट्त्वम्, रज्जुसृट्, रज्जुसृड्भ्याम्, रज्जुसृट्त्वम्। यज्, सृज्-मृज्-राज्, भ्रज्-भ्रस्ज्-व्रश्च्, परिव्राज् एते यजादयः।

१८९. दादेर्हं गः।

लिङ्गस्य हस्य दादेर्विरामे व्यञ्जनादिषु च गो भवति, गोधुक्, गोधुग्भ्याम् गोधुक्तमः।

१९०. चवर्गदृगादीनाञ्च।

चवर्गान्तस्य दृग इत्येवमादीनाञ्च लिङ्गानामन्तस्य विरामे व्यञ्जनादिषु च गो भवति। वाक्, वाग्भ्याम्, वाक्त्वम्, वाक्कल्पः। तिर्यङ्, तिर्यङ्भ्याम्, तिर्यङ्त्वम्। दृक्, दृग्भ्याम्। दृश्, स्पृश् मृश, दधृष् उष्णिह्, ऋत्विज्, सृज्, असृज्, एते दृगादयः।

१९१. **मुहादीनां वा** । (वा द्रुहमुहष्णुहष्णिहाम् । पा० ८-२-३३)

मुहादीनां लिङ्गामन्तस्य विरामे व्यञ्जनादिषु च गो भवति वा । मुक्, मुगभ्याम्, मुक्त्वम् । मुट, मुड्भ्याम्, मुट्त्वम्, मुह् द्रुह्, ष्णुह, ष्णिह्, नश्, एते मुहादयः ।

१९२. **हचतुर्थान्तस्य धातोस्तृतीयादेरादि चतुर्थत्वमकृत्वत्** ।

(एकाचो बशोभष् । झषन्तस्य स्ध्वोः । पा० ८-२-३७)

धातोरवयस्य चतुर्थान्तस्य तृतीयादेरादिचतुर्थत्वं भवति विरामे व्यजजनादिषु च, तच्चाकृतवत् । निघुट्, निघुड्भ्याम्, निघुटत्वम् । ज्ञानभूत्, ज्ञानाभुदभ्याम् । गर्दभयतेः, क्विप्-गर्दप्, गर्दब्भ्याम्, गर्दभ्त्वम् । धातोरिति किं ? दामलिट् । तृतीयादेरिति किं ? विक्रुत् । अकृतवदिति ? गोधुक् ।

१९३. **सजुषाशिषो रः** । (ससजुषो रुः । पा० ८-२-६६)

सजुषाशिषोरन्तस्य विरामे व्यञ्जनादिषु च रो भवति । सजूः, सजूर्भ्याम्, सजूषुः, सजूस्ना । आशीः, आशीर्भ्याम्, आषीःषु, आशीस्ता ।

१९४. **इवरोरीरूरौ** । (हलि च । उपधायां च । पा० ८-२-७७-७८)

धातोरि-रु-रो-री-रूवौ भवतः यथासंख्यं विरामव्यञ्जादिषु च । गीः, गीर्भ्याम्, गीर्षु, गीस्ताः, धूः, धूर्भ्याम्, धूर्षु, धूस्तरा ।

१९५. **अह्नः सः** । (अहन् । पा० ८-२-६८)

अहन् इत्येतस्य विरामे व्यजनादिषु च सो भवति । अहः, अहोभ्याम्, अहःसु, अहस्त्वम् ।

१९६. **संयोगान्तस्य लोपः** । (पा० ८-२-२३)

संयोगान्तस्य लोपो भवति विरामे व्यञ्जनादिषु च । विद्वान्, कटचिकीः, पुंभ्याम्, पुंसु ।

१९७. **संयोगादेर्धुटः**

संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादिषु च । मस्जेः साधुमक्, साधुमगभ्याम्, साधुमक्त्वम् । तक्षेः—साधुतट्, साधुतड्भ्याम्, साधुतटत्वम्, विरामव्यञ्जनादिषु । इति किम् । गोरक्षौ । पुनः संयोगग्रहणमिह पूर्व्वस्मिश्चानिवृत्यर्थम् । तेन मांसपिपक् । पूर्व्वस्मिश्च रात् सस्यैव लोपः—ऊर्क्, ऊर्ग्भ्याम् ।

१९८. **लिङ्गान्तनकारस्य** ।(न लोपः प्रातिपदिकान्तस्य । पा० ८-२-६)

लिङ्गान्तनकारस्य लोपो भवति विरामे व्यञ्जनादिषु च । सखा, राजभ्याम्,

राजभिः, राजसु, राजत्वम्, लिङ्गान्तनकारस्येति किम् ? अहन्। पुनर्लिङ्गग्रहणमुत्तरत्र सामान्यार्थम्।

१९९. **न सम्बुद्धौ**। (न ङि संबुद्धयोः। पा० ८-२-८)

लिङ्गान्तनकारस्य लोपो न भवति सम्बुद्धौ। हे राजन्। पृथक्करणाद् नपुंसकस्य वा—हे साम, हे सामन्।

२००. **न संयोगान्तवलुप्तवच्च पूर्व्वविधौ**।

नकारसंयोगान्तो लुप्तावप्यलुप्तवद् भवतः पूर्व्वविधौ लिङ्गान्तदीर्घादिके कर्त्तव्ये। राजभ्याम्, राजभिः, राजसु, विद्वान्, सुकन्भ्याम्।

२०१. **इसुस्दोषां घोषवति रः**।

इसन्तस्य उसन्तस्य दोषशब्दस्य च रो भवति घोषवति विभक्तौ। सर्पिर्भ्याम्, धनुर्भ्याम्, दोर्भ्याम्। घोषवतीति किं ? सर्पिःषु, धनुःषु, दोःषु। भे र इति सिद्धे घोषवतीत्युत्तरार्थञ्च।

२०२. **घुटां तृतीयः**। (झलां जशोऽन्ते पा० ८-२-३९)

घुटां वर्णानां तृतीयो भवति घोषवति सामान्ये। योषिद्भ्याम्, चित्रगिभिः, मज्जति, लज्जते, भृज्जति।

२०३. **अघोषे प्रथमः**। (खरि च। पा० ८-४-५५)

अघोषे घुटां वर्णानां प्रथमा भवति। षट्सु, ज्ञानभुत्सु, इच्छति, गच्छति।

२०४. **वा विरामे**। (वावसाने। पा० ८-४-५६)

विरामे घुटां वर्णानां प्रथमस्तृतीयो वा भवति। विषप्, विषब्, वाक्, वाग्।

२०५. **रेफसोर्विसर्जनीयः**। (खरवसानयोर्विसर्जनीयः। पा० ८-३-१५)

रेफसकारयोर्विसर्ज्जनीयो भवति विरामे शब्दच्छेदे घोषवत्यघोषे च। गीः, धूः, वृक्षः, पयोभ्याम्, पयःसु। वाधिकाराद्विभक्तिव्यञ्जने रेफस्य न स्यात्। गीर्षु, धूर्षु।

भवति च—सजूःषु, आशीःषु।

२०६. **रयमोर्लोपे ऽपि**।

इति दौर्गसिंह्यां वृत्तौ नाम्नि चतुष्टये तृतीयः पादः समाप्तः।

अथ-कारक प्रकरणम् ।

२०७. अव्ययीभावादकारान्तात्-विभक्तीनामपञ्चम्या ।

अव्ययीभावसमासादकारान्ताद् विभक्तीनां स्थानेऽम् भवतिऽपञ्चम्याः। उपकुम्भम् । अव्ययीभावादिति किं ? कष्टश्रितः । विभक्तीनामिति किम् । उपकुम्भता । अपञ्चम्या इति किम् ? उपकुम्भात् ।

२०८. वा तृतीया सप्तम्योः ।

अव्ययीभावसमासादकारान्तात् परयोस्तृतीयासप्तम्योः स्थानेऽम् भवति वा उपकुम्भम्, उपकुम्भेन, उपकुम्भम्, उपकुम्भे ।

२०९ अन्यस्माल्लुक् ।

अकारान्तद्योऽन्योऽव्ययीभावसमासस्तस्माद् विभक्तीनां लुग् भवति । उपवधु । उपकर्त्तृ ।

२१० अव्ययाच्च ।

अव्ययमसंख्यम् । अव्ययाच्च विभक्तीनां लुग्भवति । श्वः, प्रातः, च, वा, अह । एवमन्येऽपि । पदसंज्ञार्थमिदम् ।

२११. रुद्रानां बहुत्वेऽस्त्रियामपत्य प्रत्ययस्य ।

जनपदसमानशब्दानां क्षत्रियाणां रुद्रसंज्ञा । रुद्रानां बहुत्वे विहितस्या-पत्यप्रत्ययस्याभिधेयस्य लुग् भवति । पञ्चालस्यापत्यानि—पञ्चालाः, एवं विदेहाः, अङ्गाः, वङ्गाः, कलिङ्गाः, मगधाः, सु (सू) मनसाः—अनो लुक् । प्रत्यग्रथाः, कलकूटाः, अश्वकाः - इनो लुक् । बहुत्व इति किम् ? आङ्ग, आङ्गौ, प्रियबाङ्गा इति समासोऽत्र बहुत्वे न प्रत्ययः । अस्त्रियामिति किम् ? कालिङ्ग्यः । अपत्यप्रत्ययस्येति किम् ? पञ्चालानामिमे भृत्याः—पाञ्चालाः ।

२१२. गर्गयस्कबिदादीनाञ्च ।

गर्गादीनां यस्कादीनां बिदादीनाञ्च बहुत्वे विहितस्यापप्रत्ययस्यास्त्र्याभिधे-यस्य लुग् भवति । गर्गाः, वत्साः—ण्यस्य लुक् । यस्काः, लज्जाः—अनो लुक् । बिदाः, उर्व्वा—अत्राप्यणो लुक् । यस्कादयो नानापत्यप्रत्ययान्ताः, बिदादयोऽपि पौत्राद्यणन्ताः । प्रियगर्गः, प्रिययस्कः, प्रियबिदः—प्रत्ययोऽत्र बहुत्वे, लुक् स्यादेव । गार्ग्यकुलं गर्गकुलमिति—गार्ग्यस्य हि यत् कुलं, गर्गस्य गर्गाणामपि तत्कुलमित्य-भेदेनोच्यते ।

२१३. भृग्वत्र्यङ्गिरः कुत्सवशिष्ठगोतमेभ्यश्च ।

भृग्वादिभ्यो बहुत्वे विहितस्यापत्ययस्यस्त्र्याभिधेयस्य लुग् भवति । अत्रेरेयण् ।

इतरेभ्य: ऋषिभ्योऽण् । भृगव:, अत्रय:, अङ्गिरसा:, कुत्सा:, वशिष्ठा:, गोतमा: । अस्त्रियामिति किम् ? भार्गव्य: ।

२१४. **यतोऽपैति भयमादत्ते वा तदपादानम्** ।

यस्मादपैति, यस्माद् भयं भवति, यस्मादादत्ते वा तत्कारकमपादानसंज्ञ: भवति । वृक्षात् पर्णं पतति, व्याघ्राद् बिभेति, चौराद्वुद्विजते, उपाध्यायादधीते, उपाध्यायादागमयति । यत्र इत्येवधिमात्रार्थं तेन धावतोऽश्वात् पतित: । तथा अधर्माज्जुगुप्सते, अधर्माद् विरमति, धर्मात् प्रमाद्यति । अध्ययनात् पराजयते, उपाध्ययादन्तर्धत्ते, शृंगाच्छरो जायते । हिमवतो गङ्गा प्रभवति । आसनात्प्रेक्षते । कुतो भवान् ? पाटलिपुत्रान् ।

२१५. **ईप्सितञ्च रक्षार्थानाम्** ।

रक्षार्थानां धातुनां प्रयोगे यदीप्सितमनीप्सितञ्च तत्कारकमपादानसंज्ञ: भवति । यवेभ्यो गां रक्षति, यवेभ्य: गां निषेधति, शालिभ्य: शुकान् वारयति, अहिभ्य आत्मानं रक्षति, कूपादन्धं वारयत्यपि । ईप्सित कर्म्मसंज्ञा बाधते । अपादान-प्रदेशा:—अपादाने पञ्चमीत्येवमादय: ।

२१६. **यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानम्** ।

तस्मैदातुमिच्छा रोचते, यस्मै धारयते वा, तत्कारकं सम्प्रदानसंज्ञ: भवति । ब्राह्मणाय गां ददाति । देवदत्ताय स्वदते । विष्णुमित्राय गां धारयते । कथं छात्राय श्लाघते, छात्राय ह्नुते, छात्राय तिष्ठते कुमारी, छात्राय शपते, पुष्पेभ्य: स्पृहयति, छात्राय राध्यति, छात्रायेक्षते, छात्राय प्रतिश्रृणोवि छात्राय श्रृणोतीति ? तादर्थ्य-चतुर्थ्या सिद्धम् । छात्राय क्रुध्यति, मित्राय द्रुह्यति, मित्रायेर्ष्यते, मित्रायसूयति-यस्मै कुप्यतीति वक्तव्यम् । दातुमिच्छति किम् ? राज्ञो दण्डं ददाति । सम्प्रदान प्रदेशा:—सम्प्रदाने चतुर्थीत्येवमादय: ।

२१७. **य आधारस्तदधिकरणम्** ।

आध्रियन्ते क्रिया यस्मिन्नत्याधार: । आधारो यस्तदधिकरणसंज्ञं भवति । कते आस्ते, तिलेषु तैलं, दिवि देवा: । तथा गङ्गायां घोष:, अंगुल्यग्रे करिशतम् । अधिकरणप्रदेशा: – अधिकरणे सप्तमीत्येवमादय: ।

२१८. **येन क्रियते तत्करणम्** ।

कर्त्रा येन क्रियते तत्कारकं करणसंज्ञं भवति । दात्रेण धान्यं लुनाति । मनसा मेरुं गच्छति । तथा पशुना रुद्रं यजते । प्रकृत्याभिरूप: । प्रायेण याज्ञिक: । गोत्रेण गार्ग्य: । समेन धावति । विषमेन धवति । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् क्रीणाति । शतेन परिक्रीत: । शताय परिक्रीत: । त्वं मासं कर्म्म करिष्यसीति प्रधान-क्रियापेक्षं तादर्थ्यम् । करणप्रदेशा:—करणे तृतीयात्येवमादय: ।

२१९. यत्क्रियते तत् कर्म्म (कर्म) ।

कर्त्रा यत् क्रियते तत् कारकं कर्म्मसंज्ञं भवति । कटं करोति । ओदनं पचति । आदित्यं पश्यति ।—तथा अहिं लङ्घयति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । तथा स्तोकं पचति । गां दोग्धि पयः । पौरवं गां याचते । गामवरुणद्धि व्रजम् । छात्रं पन्थानं पृच्छति । पौरवं गा भिक्षते । वृक्षमवचिनोति फलानि । शिष्यं धर्म्मं ब्रूते । शिष्यं धर्म्ममनुशास्ति । अजां नयति ग्रामम् । ग्रामं वहति भारम् । हरते कुम्भं भारम् । ग्रामं छात्रशतं जयति । गर्गान् शतं दण्डयति । ग्राममधिशेते । ग्राममधितिष्ठति । वृक्षमध्यास्ते । धर्मंमभिनिविशते । त्रिरात्रमुपवसति । पर्वतमधिवसति । आवसथमावसति । अक्षान् दीव्यति, अक्षैर्दीव्यतीति करणविवक्षा । मासं गुड़धानाः । क्रोशं कुटिला नदी । भवतेर्गम्यमानत्वात् । कर्म्मप्रदेशाः— कर्मणी द्वितीयेत्येवमादयः ।

२२०. यः करोति स कर्त्ता ।

यः क्रियां करोति स कर्त्तृसंज्ञो भवति । छात्रेण हन्यते । चैत्रेण कृतम् ।

२२१. कारयति यः स हेतुश्च ।

तमेव कर्त्तारं य कारयति स हेतुसंज्ञो भवति । चकारात् कर्त्तृसंज्ञकश्च हारयति, पाययति । हेतुकर्त्तृप्रदेशा :— धातोश्च हेतावित्येवमादयः । क्रियानिमित्तं कारकं लोकतः सिद्धम् ।

२२२. तेषां परमुभय प्राप्तौ ।

तेषां कारकाणामुभय प्राप्तौ सत्यां यत् परं तद् भवति । ग्रामाय दत्वा तीर्थं गतः, सम्प्रदानमेव । कांस्यपात्र्यां भुङ्क्ते, अधिकरणमेव । मृ[illegible] धनुषा शरान् क्षिपति, करणमेव । तरुं त्यजति खगः, कर्म्मैव, तथा गां दोग्धि पयः । त्यजति दण्डं दण्डीति कर्त्तैव । एवमन्येऽपि ।

२२३. प्रथमाविभक्ति लिङ्गार्थवचने ।

अव्यतिरिक्तं लिङ्गार्थवचने प्रथमाविभक्तिर्भवति । उच्चैः, नीचैः, वृक्षः, कुम्भम्, कुमारी । द्रोणः, खारी, आढकः, हस्तः, वितस्तिः, दीर्घम्, काष्ठम्, घृतम्, पलम्, · एकः द्वौ बहवः । सर्वेऽप्यमी लिङ्गार्था अन्वयित्वात् एकमर्थं द्वौ बहून् वा वक्ति 'इत्यन्वर्थं संज्ञाया एकस्मिन्नर्थे एकवचनम् । द्वयोर्द्विवचनं बहुषु बहुवचनं । सम्पन्नो यव इति जातावेकवचनम् । सम्पन्ना यवा इति व्यक्तिवेदेषु वहुवचनम् । वयमिति बाह्याध्यात्मिकेषु भावेषु, यथा गुरुषु । अहमिति पुनरभेद विवक्षायामेकवचनम् ।

२२४. **आमन्त्रिते च ।**

आमन्त्रिते चार्थे प्रथमा विभक्तिर्भवति हे पुत्र । हा पुत्र, धिक् पुत्रौ, हे पुत्राः । षष्ठ्यपवादोऽयम् ।

२२५. **शेषाः कर्मकरणसंप्रदानापादानस्वाम्याद्यधिकरणेषु ।**

शेषा द्वितीयाद्याः षड्विभक्तयः कर्म्मादिष्वर्थेषु षट्सु यथासंख्यं भवन्ति । कर्म्मणि—कष्टं करोति । करणे-परशुना छिनत्ति । सम्प्रदाने-गुरुवे गां ददाति । अपादाने-वृकाद्भयम् । स्वाम्यादौ— देवदत्तस्य स्वामी, यज्ञदत्तस्य स्वं, विष्णुमित्रस्य सम्बन्धः । अधिकरणे—कटे आस्ते, अधीती व्याकरणे । तथा साधुर्मातरि, असाधुः पितरीत्यादयः । निमित्तात् कर्मसंयोगे सप्तमी वाच्या । :—

चर्म्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः ।।

२२६. **पर्यपाङ्‌योगे पञ्चमी ।**

परि-अप्-आङ् एभिर्योगे लिङ्गात् पञ्चमी भवति । इहापपरी वर्जने । आङ्-मर्यादाभिविध्योः । परि त्रिगर्तेभ्यः वृष्टोदेवः । अपपाटलिपुत्रात् वृष्टो देवः .

२२७. **दिगितरर्तेऽन्यैश्च ।**

दिश् इतर ऋते अन्य एभिर्योगे लिङ्गात् पञ्चमी भवति । पूर्व्वो ग्रामात्, उत्तरो ग्रामात्, पूर्व्वो ग्रीष्माद्, वसन्तः, इयमस्याः पूर्व्वो दिक्, इतरो देवदत्तात्, ऋते देवदत्तात् । ऋते देवदत्तमिति द्वितीयापीष्टा । अन्यो देवदत्तात्, भिन्नो देवदत्तात् ।

२२८. **द्वितीयैनेन ।**

एनप्रत्ययान्तेन योगे लिङ्गाद् द्वितीया भवति । दक्षिणेन ग्रामम्, उत्तरेण हिमवन्तम्,—अदूरे एनोऽपञ्चम्याः । चकाराधिकारात्—निकषा समया हा धिक् अन्तरा अन्तरेण युक्ताद् द्वितीया,—निकषा ग्रामम्, समया ग्रामम्, हा देवदत्तम्, धिक् देवदत्तम्, अन्तरा गार्हपत्यमाहवनीयश्च वेदिः, अन्तरेण पुरुषकारं न किञ्चिल्लभ्यते ।

२२९. **कर्म प्रवचनीयैश्च ।**

कर्मप्रवचनीयैर्योगे लिङ्गाद् द्वितीया भवति । वृक्षमभि विद्योतते विद्युत्, वृक्षं वृक्षमभि तिष्ठति, साधुदेवदत्तो मातरमभिः, यदत्र मां प्रतिस्यात्, वृक्षमनु विद्योतते विद्युत्, पर्वतमनुवसिता सेना, अन्वर्ज्जुनं योद्धारः, उपार्ज्जुनं योद्धारः ।

लक्षणेत्थम्भूताख्यानभागवीप्सास्वभिप्रतिपर्यनवः ।
अनुरेषु सहार्थे च हीने उपश्च कथ्यते ।।"

आविक्रयार्थोप संयोगे सप्तमी वाच्या,—उपकार्यां द्रोणः। स्वाम्यर्थाधियोगे च— अधि ब्रह्मदत्तेषु पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्त इति।

२३०. गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि।

गत्यार्थानां धातूनां चेष्टाक्रियाणां कर्मण्यध्ववर्जिते द्वितीया चतुर्थ्यौ भवतः। ग्रामं गच्छति, ग्रामाय गच्छति। ग्रामं व्रजति, ग्रामाय व्रजति। चेष्टायामिति किं? मनसा मेरुं गच्छति। अनध्वनीति किम्? अध्वानं गच्छति, पन्थानं गच्छति, पन्थानं व्रजति। मुख्योऽत्राध्वा गृह्यते।

२३१. मन्यकर्म्मणि चानादरेऽप्राणिनि।

मन्यते कर्मणि प्राणिवर्जिते द्वितीयाचतुर्थ्यौ भवतः अनादरे गम्यमाने। न त्वा तृणं मन्ये, न त्वा तृणाय मन्ये। न त्वा बुसं मन्ये। न त्वा बुसाय मन्ये। अनादरे इति किम्? अश्मानं दृषदं मन्ये। प्राणिसंज्ञा नावादेरिति—न त्वा नावं मन्ये, न त्वा काकं मन्ये, अन्नं मन्ये, न त्वा शृगालं मन्ये। इह स्यादेव— न त्वा श्वानं मन्ये, शुने मन्ये। यदि युष्मदः स्याच्चतुर्थी तदानादरो न गम्यते।

२३२. नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी।

नम आदिभिर्योगे लिङ्गाच्चतुर्थी भवति। नमो देवेभ्यः, स्वस्ति प्रजाभ्यः, स्वाहा अग्नये, स्वधापितृभ्यः, अलं मल्लो मल्लाय, समर्थो मल्लो मल्लाय, वषडिन्द्राय।

२३३. तादर्थ्ये।

सोऽर्थोऽस्येति तस्मै इदमिति वा तदर्थम्। तदर्थभावे द्योत्ये लिङ्गाच्चतुर्थी भवति। यूपाय दारु। रन्धनाय स्थाली। भद्राय निगल्हते। युद्धाय संनह्यते। पत्ये शेते। तथा मूत्राय संपद्यते यवागूः। मूत्राय संकल्पते। वाताय कपिलिका विद्युत्।

२३४. तुमर्थाच्च भाववाचिनः।

तुमा समानार्थभाववाचिप्रत्ययान्ताल्लिङ्गात् चतुर्थी भवति। तुमर्थादिति किम्? पाकस्य त्यागस्य। राघेभ्यो व्रजति—तादर्थ्यचतुर्थ्या सिद्धम्।

२३५. तृतीया सहयोगे।

सहार्थेन योगे लिङ्गात् तृतीया भवति। पुत्रेण सहागतः। पुत्रेण सह स्थूलः। सह गोमान्। पुत्रेण साकम्। पुत्रेण सार्द्धम्। पुत्रेण समम्। तथा पुत्रेणागतः। स्थूलो गोमानिति तृतीयापि षष्ठीवद प्रधानादेव।

२३६. हेत्वर्थे।

हेत्वर्थे वर्त्तमानाल्लिङ्गात्तृतीया भवति। अन्नेन वसति। धनेन कुलम्। योग्यतामात्रविवक्षया करणे न सिध्यतीति वचनम्।

२३७. **कुत्सिते ऽङ्गे ।**

कुत्सिते अङ्गे वर्त्तमानाल्लिङ्गात् तृतीया भवति । अक्ष्णा काणः, पादेन खञ्जः, पृष्ठेन कुब्जः । अक्षि काणमस्येति प्रधानत्वात् प्रथमैव ।

२३८. **विशेषणे ।**

विशेषणे वर्त्तमानाल्लिाङ्गात्तृतीया भवति । जटाभिस्तापसमद्राक्षीत् । शिखया परिव्राजकमपश्यत् । विशषण इति किम् ? वृक्षं प्रति विद्योतनम— लक्षणमात्रे न स्यात् । नीलमुत्पलमिति—लिङ्गार्थमात्रे प्रथमैव ।

२३९. **कर्त्तरि च ।**

कर्त्तरि कारके वर्त्तमानाल्लिङ्गात् तृतीया भवति । देवदत्तेन हन्यते, चैत्रेण कृतम् ।

२४०. **कालभावयोः सप्तमी ।**

कालभावयोर्विशेषणीभूतयोर्व्वर्त्तमानाल्लिङ्गात् सप्तमी भवति । शरदि पुष्प्यन्ति सप्तच्छदाः, गोषु दुह्यमानस्वागतः, (दुग्धास्वागतः) । कालभावयोरिति किं ? यो जटाभिः स भुङ्क्ते, यो भोक्ता स देवदत्त इति साहचर्याद् वा प्रसिद्धा क्रियैव हि विशेषणम् । रुदतः प्राव्राजीदिति सम्बन्धविवक्षापि ।

२४१. **स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः षष्ठी च ।**

स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत एभिर्योगे वर्त्तमानाल्लिङ्गात् षष्ठी भवति सप्तमी च । गवां स्वामी, गोषु स्वामी । गवामीश्वरः, गोष्वीश्वर । गवां साक्षी, गोषु साक्षी । गवां प्रतिभूः गोषु प्रतिभूः । गवां प्रसूतः । सम्बन्धमात्रे स्फुट इति वचनम् ।

२४२. **निर्द्धारणे च ।**

निर्द्धारणे चार्थे वर्त्तमानाल्लिङ्गात् षष्ठी भवति सप्तमी च । पुरुषाणां क्षत्रियः शूरः । पुरुषेषु क्षत्रियः शूरः । गवां कृष्णा सम्पन्नक्षीरा, गोषु कृष्णा सम्पन्नक्षीरा । गच्छतां धावत्सु शीघ्राः गच्छत्सु धावत्सु शीघ्राः ।

२४३. **षष्ठी हेतुप्रयोगे**

हेतोः प्रयोगे वर्त्तमानाल्लिङ्गात् षष्ठी भवति । अन्नस्य हेतोर्वसति । हेत्वर्थे तृतीया प्राप्तौ वचनम् ।

२४४. **स्मृत्यर्थ कर्मणि ।**

स्मृत्यर्थानां धातूनां प्रयोगे कर्मणि षष्ठी भवति । मातुः स्मरति, पितुरध्येति उत्तरत्रनित्यग्रहणादनित्यममपि । प्रकरणेऽस्मिन्—मातरं स्मरति । कथं माता स्मर्यते ?

उक्तार्थत्वात् । मातुः स्मर्यते इति, यदि सम्बन्धोऽत्र विवक्ष्यते । तथा सर्पिषो दयते, मधुन ईष्टे, सर्पिषो आनीते, मधुना जानीते । सम्प्राप्तिज्ञाने सर्पिषोऽसतः करणत्वाभावात् सम्बन्ध एव षष्ठी । एवमन्येऽपि ।

२४५. **करोतेः प्रतियत्ने ।**

सतो गुणान्तराधानं प्रतियत्नः । प्रतियत्ने गम्यमाने करोतेः कर्मणि षष्ठी भवति एधोदकस्योपस्कुरुते, एधोदकमुस्कुरुते ।

२४६. **हिंसार्थानामज्वरेः ।**

हिंसार्थानां धातूनां ज्वरवर्ज्जितानां प्रयोगे कर्मणि षष्ठी भवति । चौरस्य रुजति, दास्या आमयति । चौरस्योज्जासयति, चौरस्य निहन्ति, चौरस्योन्नाटयति-चौरस्योत्क्लाथयति, चौरस्य पिनष्टि । अनित्यमपि— चौरं रुजतीत्यादि । हिंसार्थानामिति किं ? धानाः पिनष्टि । अज्वरेरिति किं ? चौरं ज्वरयति । चौरस्य सम्भापयतीतीष्यते एव ।

२४७. **कर्त्तृकर्म्मणोः कृति नित्यम् ।**

कर्त्तृकर्म्मणोः कृत्यप्रयोगे नित्यं षष्ठी भवति । भवतः शायिकाः । भवत आसिका । कर्म्मणि च—अपां स्रष्टा, पुरां भेत्ता । कृतीति किं ? तद्धितप्रयोगे मा भूत् — कृतपूर्व्वी कटम् ।

२४८. **न निष्ठादिषु ।**

कर्त्तृकर्म्मणो निष्ठादिषु प्रयोगे षष्ठी न भवति । देवदत्तेन कृतम्, ओदनं भुक्तवान् । ओदनं पचन्, ओदनं पचमानः, तत्र निष्ठादयः—क्त क्तवक्तु, शन्तृङ्, आनश्, वन्सृ, कि ऊदन्त उकञ्, अव्यय खलर्थं तृन् । द्विषः शत्रौ वा वक्तव्यम्—चौरं द्विषन्, चौरस्य द्विषन् ।

२४९. **षडो णो ने ।**

षडो णो भवति विभक्तौ ने परे । षण्णाम् । विभक्ताविति किं ? षड्नयनम् ।

२५०. **मनोरनुस्वारो घुटि ।**

मनोरनन्तयोरनुस्वारो भवति घुटि परे । पुंसः, शान्तिः, उञ्छिता, युञ्जौ, स्वाम्पि । अनन्तयोरित किं! प्रशान् करोति । स्यादि घुटि पदान्तवत्—पुम्याम्, प्रशान्भ्याम् । सुकन्भ्याम् । घुटीति किं ? गम्यते, हन्यते ।

२५१. **वर्गे वर्गान्तः ।**

अनन्त्योऽनुस्वारो वर्गे परे वर्गस्यान्तोभवति श्रुतत्वात् तस्यैव । शङ्किता, उञ्छिता, वण्टिता, नन्दिता, युञ्जौ, स्वाम्पि । वर्ग इति किम् ? आक्रंस्यते ।

२५२. तवर्गश्चवर्गयोगे चटवर्गौ ।

तवर्गोऽनत्यश्चटवर्गयोगे चटवर्गौ प्राप्नोति आन्तरतम्यात् । मज्जति, लज्जते, भृज्जति, यज्ञः याञ्चा, राज्ञः । टवर्गयोगे च—षण्णाम्, अड्डति, अट्टते । चटवर्गयोगे इति किं ? विश्नः, प्रश्नः । अनन्त्य इति किं ? मधुलिट् तरति ।

२५३. नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नु विसर्जनीयषान्तरोऽपि ।

नामिकरेभ्यः परः प्रत्ययविकारागमस्थ अनन्त्यः सिषत्वमापद्यते । नु विसर्जनीयषान्तरः । अपिशब्दादनन्तरोऽपि । नामिपरत्वात्—अग्निषु, वायुषु । कपरः—दिक्षु । रपरः—गीर्षु, धूर्षु । विकारस्थ—एषः । आगमस्थः—सर्व्वेषाम् । नुविसर्जनीयषान्तरः—सर्पींषि, धनूंषि, सुपीःषु, सुतूःषु—प्रकृतिरनामिपराऽपीति रत्वे वा पश्चादीरुरो । सर्पिष्षु, धनुष्षु, दोष्षु । अपिशब्दस्य बहुलार्थत्वात् समासे अङ्गुलेः सङ्गस्य—अङ्गुलिषङ्गः । तथा भीरो स्थानस्य—भीरुष्ठानम् । अग्ने स्तुतः—अग्निष्टुत् । दीर्घात् सोमस्य—अग्नीषोमौ । ज्योतिर्वायुभ्यां च स्तोमस्य—ज्योतिष्टोमः आयुष्टोमः, अग्निष्टोमः । समास इत्येव—ज्योतिः स्तोमः दर्शयतीत्यादयः ।

२५४. रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि ।

रेफषकारऋवर्णेभ्य परोऽनन्त्यो नकारो णत्वमापद्यते स्वरहयवकवर्गपवर्गान्तरः । अपिशब्दादनन्तरोऽपि । स्वरान्तरस्तावत्—हरण, पुरुषेण, मातृणे । हान्तरः—अर्हेण । यान्तर-अर्य्येण । वान्तरः—पर्व्वणा । कवर्गान्तरः—अर्केण, मूर्खेण । पवर्गान्तरः—दर्पेण, रेफेण । अनन्तरोऽपि—शीर्णाम्, तिसृणाम् । स्वरत्वादनुस्वार विसृष्टाभ्यामपि—बृंहणम् उरः केण, उरःपेण । विसर्जनीयोपचारात् जिह्वामूलीयोपध्मानीयाभ्यामपि—उरःकेण, उरः पेण । अनन्त्य इति किं ? वृक्षान् । कथम् अग्निर्नयति ? यस्यैवान्त्यो नकारतस्यैव रषृवर्णा गृह्यन्ते श्रुतत्वात् । अपिशब्दस्य बहुलार्थत्वात् पूर्व्वपदस्थेभ्यः संज्ञयां शूर्पणखेत्येवमादयः ।

२५५. स्त्रियामादा ।

स्त्रियां वर्त्तमानालिङ्गादकारान्तादा प्रत्ययो भवति । स्त्री—पुंनपुंसकानि लोकलिङ्गानुशासन गम्यानि । अजा, एडका, चटका, मूषिका, अश्वका ।

२५६. नदाद्यन्चिवाह्युव्यनस्यन्तृसखिनान्तेभ्य ई ।

नदादि-अन्चि-वाह्-उ-इ-अन्सि-अन्त-ऋ-सखिनान्तेभ्यः स्त्रियां वर्त्तमानेभ्यः ई प्रत्ययो भवति । नदी, मही, मघी, प्लावी । अन्चि—प्राची, अतिपाची । वाह्-प्रष्ठौही, अदन्त—पट्वी । इदन्त—दाक्षी । अन्स्यन्त—विदुषी, अतिविदुषी । अन्तन्त—पचन्ती, अतिपचन्ती, भवती, मघवती । ऋदन्त—कर्त्री—अतिकर्त्री । सखि—सखी । नान्त—दण्डिनी । उतो-गुणवचनाद वा संयोगोपधाद् वा—पटुः,

पट्वी। बहुरित्यापि स्यात्। खरुरियं पान्तुरियमित्यतो न स्यात्। इतश्च क्तिवर्जिताद्वा धूलिः, धूली। क्तेस्तु न स्यात्—पक्तिः। स्वसा, दुहिता, ननान्दा, याता, माता, तिस्रः, चतस्रः इती प्रत्ययेन विना स्त्रीत्वाभिधानात्। पञ्च सप्तेति स्त्रीत्वाभावादेव न भवति। सखीति नित्यार्थम्। नदादिराकृतिगणः।

२५७. **ईकारे स्त्रीकृते लोप्यः।**

ईकारे स्त्रियां कृते अकारो लोप्यो भवति। नदी, मही, स्त्रियामिति किम्? कुम्भे। कृत इति किं? कुम्भेहा।

२५८. **स्वरो ह्रस्वो नपुंसके।**

नपुंसके वर्त्तमानः स्वरान्तो ह्रस्वो भवति। सोमपं, सेनानि, यवलु, अतिरि, अतिनु, कुलम्। स्वरो ह्रस्व इति योगविभागात् गोरप्रधानस्यान्त्यस्य स्त्रियामादादीनाञ्चेति ह्रस्वः। चित्रगुः, अतिखट्वः निष्कौशाम्बिः, अतिकरभोरुः।

इति दौर्गसिंह्यां वृत्तौ चतुष्टये कारकः पादः समाप्तः

समास-पादः

२५९. नाम्नां समासो युक्तार्थः ।

वस्तुवाचीनि नामानि, मिलितं युक्तमुच्यते । नाम्नां युक्तार्थः समाससंज्ञो भवति । ततोऽयद्वाक्यमिति रुढम् । संज्ञयैव वा विधिरन्वाख्यातः, पुनरभिधानात् क्वचिन्नित्यः, क्वचिद्विकल्पः, क्वचिन्न स्यात् । तथा च वक्ष्यति ।

२६०. तत्स्था लोप्या विभक्तयः ।

तत्स्था युक्तार्थमात्रस्था विभक्तयो लोप्या भवन्ति । नीलोत्पलम्, राजपुरुषः, राजता, पुत्रीयाति । क्वचिन्न लुप्यते अभिधानात्—कन्ठेकालः, उरसिलोमा इत्येवमादायः ।

२६१. प्रकृतिश्च स्वरान्तस्य ।

स्वरान्तस्य लिङ्गस्य युक्तार्थस्य लुप्तासु विभक्तिषु प्रकृतिश्च भवति । सखा प्रियोऽस्येति सखिप्रियः । सखायं प्राप्तः—सखिप्राप्तः । पितरि साधुः—पितृसाधुः । गां गतः—गोगतः । चकारो लोपमवेक्ष्य देवेन्द्रः खगेढ इति सन्धि स्यादेव ।

२६२. व्यञ्जनान्तस्य यत् सुपोः ।

व्यञ्जनान्तस्य लिङ्गस्य युक्तार्थस्तस्य लुप्तासु विभक्तिषु सुपोर्यदुक्तं कार्यं तद् भवति । सुपि मुख्यं कार्यं नास्तीति सुपोर्युगपदुक्तं स्यात् । विद्वद्गमनम्, दिग्-गतः षड़ाकृतिः, ज्ञानभुदाश्रयः । अतिदेशोऽयम् ।

२६३. पदे तुल्याधिकरणे विज्ञेयः कर्म्मधारयः ।

यत्र समासे द्वे पदे तुल्याधिकरणे भवतः स कर्म्मधारयो विज्ञेयः । नीलञ्च तदुत्पलञ्चेति नीलोत्पलम् । क्वचिन्नित्यसमासः कृष्णसर्पः, लोहितशालिः । क्वचिदसमासः-दीर्घश्चारायणः, वामो जामदग्न्यः, व्यासः पाराशर्यः, अर्जुनः कार्त्तवीर्यः । तथैकाधिकरणत्वात्—कृष्णमदीकृतः, छिन्नप्ररूढः, एकः पुरुषः, सर्वान्नम्, जरद्धस्ती, पुराणधान्यम् नवोदकम्, केवलान्नम्, तथा— पूर्व्वेषुकामसमी (शमी), संज्ञेयम् । संख्या पूर्व्वपदोऽपि—सप्तर्षयः, पञ्चाम्राः । तथा याज्ञिकतरः, एव पापकुलालः, अण-(न)-कनापितः । क्वचिदुपमानभूतं विशेषणम्—शस्त्रीव श्यामा शस्त्रीश्यामा । क्वचिदुपमानभूतं विशेषण परं स्यात्—पुरुषो व्याघ्र इव पुरुषव्याघ्रः, एवं पुरुषसिंहः तथा पूर्व्वपुरुषः, अपरपुरुषः प्रथमपुरुषः चरमपुरुषः, जघन्यपुरुषः, समानपुरुषः, मध्यपुरुषः, मध्यमपुरुषः, वीरपुरुषः । एवमश्रेणयः श्रेणयः कृताः—श्रेणीकृता' । तथा कृताकृतम्, भुक्ताक्तम्, गतप्रत्यागतम्, यातानुयातम् । अशितानशितम्, क्लिष्टा-क्लिशितम् । क्रयाक्रयिका, फलाफलिका, पुटापुटिका, मानोन्मानिका । तथा—सत्पुरुषः, महापुरुषः, परमपुरुषः, उत्तमपुरुषः । पुरुषोत्तम इति विशेषण वा परं स्यात्,

उत्कृष्टपुरुषः । तथा—गोवृन्दारकः, गोनागः, अश्वकुञ्जरः,कतरकठः । किंराजा । इभ्यपोटा, इभ्ययुवतिः । अग्निस्तोक इति विशेषणं (वा) परं स्यात् । एवं दधिकतिपयानि, गो गृष्टिः, गोधेनुः गोवशा, गोवेहत्, गोबष्कयणी, कठप्रवक्ता, कठश्रोत्रियः, कठाध्यापकः, कठधूर्तः । तथा गोप्रकाण्डम्, अश्वमतल्लिका, युवखलतिः, युवखलती, युवपलितः, युवपलिता, युववलिनः, युवजरम्, युवजरती । तथा भोज्योष्णम्, तुल्यश्वेतः, सदृश्वेतः, शुक्लकृष्णः, शुक्लशवल । कुमारी च सा श्रमणा चेति कुमारश्रमणा । कुमारप्रव्रजितः, कुमारप्रव्रजिता । कुमारपण्डितः, कुमारपण्डिता । तथा गोगर्भिणी, अजगर्भिणी । तथा—मयूर इव व्यंक—मयूरव्यंसकः । मयूरस्येव विगतावंसावस्येति वा—विग्रह । एवं छात्रव्यंसकः—कम्बोज इव मुण्डः—कम्बोजमुण्डः । उच्चञ्च तदव चञ्चेति—उच्चावचम् । एवम् उच्चनीचम् । अकिञ्चन—न किञ्चनम् । अस्य वा किञ्चिन्नास्तीत्यकिञ्चनम् । पूर्वश्चासौकायश्चेति-पूर्वकायः, उत्तरकायः मध्यकायः, मध्यमकायकः, मध्यमकायः, मध्याह्नः । अर्धञ्च तत् पिप्पली चेति—अर्द्धपिप्पली । पिप्पल्यर्द्धमिति षष्ठी समासेऽपि दृश्यते हि । चेदर्धं दक्षिणं मेरोः । शरार्द्धम् । चापार्द्धम् चूलिकार्द्धमिति । असमविभागेऽपि—नद्दीदमर्द्धंजरतीयं लक्ष्यमिति । एवं द्वितीयभिक्षा, भिक्षाद्वितीयः । तृतीयभिक्षा, भिक्षातृतीयः । चतुर्थभिक्षा, भिक्षाचतुर्थः । तुर्य्यभिक्षा, भिक्षातुर्य्यः । तुरीयभिक्षा, भिक्षातुरीय । मासजातः, संवत्सरजात इति—बहुव्रीहिणा सिद्धम् । न ब्राह्मणः, अब्राह्मणः । इति कर्म्मधारयः । कर्म्मधारय प्रदेशाः "कर्म्मधारः भ्रजे तु पुंवद्भावो विधीयते" इत्येवमादयः ।

२६४. **संख्यापूर्व्वो द्विगुरिति ज्ञेयः ।**

कर्म्मधारयः इति सम्बन्धः । पञ्चसु कपालेषु संस्कृत ओदनः—पञ्चकपाल ओदनः । पञ्चगावो धनमस्येति—पञ्चगवधनः । पञ्चानां पूलानां समाहारः पञ्चपूली । तद्धितार्थोत्तरपदसमाहारेषु संज्ञेयम् ।

२६५. **तत्पुरुषावुभौ ।**

उभौ द्विगुकर्म्मधारयौ तत्पुरुषसंज्ञौ ज्ञेयौ । तत्पुरुषप्रदेशाः—"नस्य तत्पुरुषे लोप्य" इत्यधिकारे कुष्टु इति कद्भावो बहुव्रीहौ न स्यात् ।

२६६. **विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च ।**

यत्र समास इति सम्बन्धः । **द्वितीया**—कष्टं श्रितः, कष्टश्रितः । एवं कान्तारातीतः, नरकपतितः ग्रामगतः, तरङ्गात्यस्तः सुखप्राप्तः, दुःखापन्न । ग्रामगमी, ग्रामागामी, ओदनबुभुक्षुः । खट्वारूढो जाल्मः । अहरतिसृता मुहूर्त्ताः, अहः संक्रान्ताः, रात्र्यारुढाः । मासप्रमितश्चन्द्रमाः, मुहूर्तसुखम्, सर्व्वरात्रकल्याणी । क्वचिद् वाक्यमेव—ओदनं भुक्तवान् ।

तृतीया—गिरिणा काणः—गिरिकाणः । एवं धान्यार्थः, मासपूर्व्वः । गुड़मिश्रः, वाक्श्लक्षणः । तथा राजहृतः, नखनिर्भिन्नः, काकपेया नदी, वाष्पच्छेद्यानि तृणानि । क्वचिन्न स्यात्—काकेन पातव्या । क्वचित् स्यात्—बुषः पेयम्' घनघात्यम्, दध्ना उपसिक्तं ओदनः—दध्योदनः । गुडेन मिश्रा धानाः—गुडधानाः ।

चतुर्थी—गोभ्योहितं—गोहितम् एवं गोसुखं, कुबेरबलिः, गोरक्षितः (यूपाय-दारु) यूपदारु । देवदेयं पुष्पम्, ब्राह्मणदेयं धनम्, वरप्रदेया कन्या । क्वचिन्न स्यात्—ब्राह्मणाय दातव्यम् । ब्राह्मणार्थः सूपः, ब्राह्मणार्था प्रपा, ब्राह्मणार्थं पयः—नित्यसमास सर्व्वलिङ्गता च ।

पञ्चमी—वृकाद्भयम्—वृकभयम् । एवं वृकभीतः, वृकभीतिः, वृकभीः, ग्रामनिर्गतः, सुखापेतः, कल्पनापोढ़ः, चन्द्रमुक्तः, मञ्चपतितः, तरङ्गापत्रस्तः ।

षष्ठी—राज्ञः पुरुषः—राजपुरुष । एवं आत्मषष्ठः, भिक्षाद्वितीयः । वर्त्तमानसामीप्यं, चन्दनगन्धः, नदीघोषः, कन्यारूपम्, स्तनस्पर्शः, फलरसः । ब्राह्मणस्य कर्त्तव्यम् । वृत्तिरपीष्यते । ब्राह्मणस्य कुर्वन्, ब्राह्मणस्य कुर्वाणो वाक्यमेव । तथा फलानां तृप्तः, छात्रस्योच्चैर्गृहमिति सापेक्षत्वात् । पलाशशातनम्, मातृस्मरणम् । सुरेश्वरः, राजपूजित इत्यादिषु सम्बन्ध षष्ठ्या समास एव ।

सप्तमी—अक्षेषु शौण्डः—अक्षशौण्डः, एवमक्षधूर्त्तः, अक्षकितवः । वने अन्तर्वसति वनान्तर्वसतिः । तथा—काम्पिल्यसिद्धः, छायाशुष्कः, कुम्भीपक्वः चारकबन्धः, तीर्थध्वांक्षः । तथा पूर्वाह्णे गेयं साम, मासदेयम् ऋणम्, पूर्व्वाह्णे कृतम्, अपराह्णे कृतम्, पूर्व्वरात्रकृतम्, अपररात्रकृतम् । एवमन्योऽपि । परपदेनेति किं ? गतो ग्रामम् । कथं प्राप्तो जीविकाम्—प्राप्तजीविकः, एवमापन्नजीविकः ।

अत्यादयः क्रान्ताद्यर्थे द्वितीयया—अतिक्रान्तः खट्वाम्—अतिखट्वः । अवादयः क्रुष्टाद्यर्थे तृतीयया—अवक्रुष्टं कोकिलया—अवकोकिलं वनम् । एवमवमयूरम् ।

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या—परिग्लानोऽध्ययनाय-पर्य्यध्ययनः । निरादयो गताद्यर्थे पञ्चम्या—निर्गतः कौशाम्ब्या-निष्कौशाम्बिः ? सत्यं कृते समासे पूर्व्वनिपातोऽभिधानात् । यथा दन्तानां राजा राजदन्त इति । कुब्राह्मण इत्यादीनां कर्म्मधारयः ।

२६७. **स्यातां यदि पदे द्वे तु यदि वा स्युर्व्वहून्यपि तान्यन्यस्य पदस्यार्थे बहुव्रीहिः ।**

यत्र समासे इति सम्बन्ध । आरूढो वानरो यं—स आरूढवानरो वृक्षः । कृतः प्रणामो येन—सः कृतप्रणामो जनः । एवं दत्तभोजनोऽतिथिः, उच्छिन्नजनपदो देशः,

चित्रगुर्देवदत्तः। बहूदका नदी। बहुपदेऽपि—मत्तबहुमानङ्गं वनम्। तथा उपगता दश एषाम् उपदशाः। एवमासन्नदशः, आपन्नदशः, अदूरदशाः, अधिकदशाः। ते पुनर्नवैकादश वा। त्रिर्दशपरिमाणमेषां—त्रिदशः। दश शब्द सङ्ख्याने वर्त्तते परिमाणशब्दसान्निध्यात्। यथा पञ्चपरिमाणमेषांपञ्चकाः शकुनयः। द्वौ वा त्रयो वा परिमाणमेषां – द्वित्राः। भिन्नाधिकरणेऽपि—कण्ठेकालः, उरसिलोमा, उच्चैर्मुखः। अन्यपदार्थे प्रथमान्तोऽपि—सह पुत्रेणागतः सपुत्रकः। सह लोम्ना वर्तते—सलोमकः विद्यमान लोमक इत्यर्थः। एवं सपक्षकः, सकष्टकः। सह दशभिः पुत्रै र्भारं वहति गर्दभीत्यनभिधानात्। केशेषु केशेषु च गृहीत्वा युद्धं वृत्तं—केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्य युद्धं प्रवृत्तं—दण्डादण्डिः। बहुव्रीहि प्रदेशाः—बहुव्रीहावित्येवमादयः।

२६८. **विदिक् तथा।**

तथा विदिगभिधेयो बहुव्रीहिर्ज्ञेयः। अर्थाद्दिग्वाचकयोः शब्दयोः समासे सति। दक्षिणस्याश्च पूर्व्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिक्।

२६९. **द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत्।**

द्वयोर्नाम्नोर्बहूनां वापि नाम्नां य समुच्चः स द्वन्द्वो भवेत् देवदत्तश्च यज्ञदत्तश्च देवदत्तयज्ञदत्तौ। धवखदिरपलाशाः। वाग्दृशदम्। पीठच्छत्रोपानहम्। इतरेतरयोगः, समाहारश्च समुच्चयस्यैव इति।

२७०. **अल्पस्वरतरं तत्र पूर्व्वम्।**

तत्र द्वन्द्वे समासे यदल्पस्वरतरं तत् पूर्व्वं निपतति। प्लक्षन्यग्रोधम्, धवाश्वकर्णनम्। तरग्रहणं द्वित्वनियमार्थम्, तेन—शङ्खदुन्दुभिवीणाः। व्यभिचरति च— उदूखलमुषले (उलूखलमुसले)। (तद्भूत किंत्वे ?) चित्ररथवाह्लीकौ इत्येवमादयः।

२७१. **यच्चार्च्चितं द्वयोः।**

तत्र द्वन्द्वे समासे द्वयोर्यदर्चितं तत्पूर्व्वं निपतति। देवदैत्यौ। वासुदेवार्जुनौ। व्यभिचरति च—नरनारायणौ, उमामहेश्वरौ, काकमयूरौ।

२७२. **पूर्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते।**

समासस्येति सम्बन्धः। कारके-स्त्रीष्वधिकृत्य कथा प्रवृत्ता—अधिस्त्रि। समीपे—उपकुम्भम्॥ ऋद्धौ—सुमद्रम्। अभावे—निर्मक्षिकम् तथा गवधिकानामृद्धे विगमः—दुर्गवधिकम्। (दुर्गवदिकम्)। शीतानामतिक्रमः—अतिशीतकम्। अतितैसृकम्, तैसृकानामाच्छादनानां न सम्प्रत्युपभोगकालः। शब्दप्रादुर्भावे इति पाणिनि, तत पाणिनि। पश्चादर्थे:—अनुरथम्। यथाशक्ति, अनुज्येष्ठम्, शक्तयनति क्रमेण,

ज्येष्ठानुक्रमेण इत्यर्थं। सादृश्य—किख्याः सदृशं सकिखि। साकल्ये—मतृणमभ्यवहरति, साग्नि अधीते। एवमन्योऽपि। अव्ययीभाव प्रदेशाः—अव्ययीभावादकारान्ताद् विभक्तीनामम पञ्चम्या इत्येवमादयः।

२७३. **स नपुंसक लिङ्गं स्यात्।**

सोऽव्ययीभाव समासो नपुंसक लिङ्गं स्यात्। तथा च उदाहृतम्, उदाह्रियते च। समत्वं भूमेः—समंभूमिः, समंपदाति। तथा—सुषमम्, विषमम्, निःषमम्, दुःषमम् अपरसमम्। शोभनत्वं समस्येत्यादि वाक्यम्। तथा प्रमृगम्, प्ररथम्। प्रदक्षिणम्। अव्ययपूर्वपदत्वात् लिङ्गतैव प्राप्तेति वचनम्।

२७४. **द्वन्द्वैकत्वम्।**

द्वन्द्वस्यैकत्वं नपुंसक लिङ्गं स्यात्। प्रत्यष्ठात् कठकालापम्, उदगात् कठकौथुमम्, अर्काश्वमेधम्। अदकक्रमकम्। आराशस्त्रि। गङ्गाशोणम्। कुरुकुरुक्षेत्रम्। मथुरापाटलिपुत्रम्। अहिनकुलम। तक्षायस्कारम्। पाणिपादम्। मार्दङ्गिकपाणविकम्। हस्त्यश्वम्। यूकालिक्षम्। बदरामलकम्। प्लक्षन्यग्रोधम्। धवाश्वकर्णनम्। कुशकाशम्। तिलमाषम्। रुरुपृषतम्। हंसचक्रवाकम्। दधिघृतम्। सुखदुःखम्। अनुवादे चरणानां, स्थेणद्यतनीप्रयोगविषयाणाम्। अनपुंसकलिङ्गानां, यजुः क्रतूनाञ्च निकटपाठानाम्। अप्राणिजातिविसदृश—लिङ्गनदीदेशनगराणाम्। शाश्वतिकवैरिणामथ, कारुणां प्राणीतूर्यकाङ्गानाम्। सेनाङ्गानाम् च बहुत्वे भवति क्षुद्रजन्तुकफलानाम। वृक्षतृणधान्यमृगशकुनिवेशेषकानां विभाषैव। व्यञ्जनविशेषकाणां, सा द्रव्याणां विरोधिनाञ्च समता। तेषाञ्च समाहारो, दीधिपयसां खलु भवेदन्यः। एकत्वामिति किम्? हस्त्यश्वो, दधिघृताः।

२७५. **तथा द्विगोः।**

तथा द्विगोरप्येकत्वं नपुंसकलिङ्ग स्यात्, पञ्चगवम्, चतुष्पथम्—शोभनमिति विशेषणात्। एकत्वमिति किं? पञ्चकपाल ओदनः। "अपात्रादिरदन्तोऽयं स्त्र्यादन्तो वा द्विगुस्तथा। अनन्तश्च समाहारो नदादिषु निगद्यते।

२७६. **पुंवद् भाषित पुंस्कानूङ् पूरण्यादिषु स्त्रियां तुल्याधिकरणे।**

स्त्रियां वर्त्तमानो भाषितपुस्कानूङ् पुंवद् भवति स्त्रियां वर्त्तमाने तुल्याधिकरणे पूरण्यादिवर्ज्जिते पदे परतः। शोभनभार्यः, दीर्घजङ्घः। अर्थात् पूर्व्वस्य च। स्त्रियामिति विशेषणात्-ग्रामणि कुलं दृष्टिरस्येति- ग्रामणि दृष्टिः। कल्याणी प्रधानमेषां-कल्याणी प्रधानाः। भाषितपुंस्कोऽयं इति किम्? द्रोणीभार्यः। अनूङिति किं? ब्रह्मबन्धूभार्यः। अपूरण्यादिष्विति किम्? कल्याणी पञ्चमा रात्रयः। मुख्य पूरणी ग्रहणात् कल्याणपञ्चमीकः पक्षः। आदि ग्रहणात्-कल्याणी प्रियः, प्रिया, मनोज्ञा,

सुभगा, दुर्भगा, भक्ति, सचिवा, स्वसा, कान्ता, क्षान्ता, समा, बाल्या, दुहिता, वामना इति।

२७७. **संज्ञापूरणी कोपधास्तु न।**

इह पुंवद् मात्रं वर्त्तते। संज्ञापूरणीकोपधास्तु पुंवद्रूपा न भवन्ति। दत्ताभार्यः, गुप्ताभार्यः। पञ्चमीभार्य।—पञ्चमीयते, पञ्चमीमानिनी। पाचिका-भार्यः। मद्रिकाभार्यः। कथं पाकभार्यः, भेकभार्यः शुष्कभार्यः? इत्यभिधानात्। वृद्धिनिमित्तस्यारक्तविकारस्य न च तद्धितस्यापीदन्तस्य स्वाङ्गस्य न त्वमानिनि। तथा जातेः।

२७८. **कर्मधारयसंज्ञे तु पुंवद् भावो विधीयते।**

भाषितपुंस्कानूङ्प्रतिषेधबाधकोऽयम्। कठी च सा भार्या चेति कठभार्या। एवं दत्तभार्या, पञ्चमभार्या, पाचकभार्या। भाषितपुंस्क इति किम्? खट्वावृन्दारिका। अनूङिति किं। ब्रह्मबन्धूदारिका।

२७९. **आकारो महतः कार्यस्तुल्याधिकरणे पदे।**

महादेवो, महावक्त्रः। अन्तरङ्गत्वान्नलोपे सत्याकारः। च्व्यन्तस्य न भवति। महद्भूतश्चन्द्रमाः। योगविभागात् महत्या घासः-महाघासः। एवं महाकरः, महाविष्टः।

२८०. **नस्य तत्पुरुषे लोप्यः।**

नस्य सम्बन्धिनि तत्पुरुषे नस्य सम्बन्धिनी नकारो लोप्यो भवति। द्विनकारो वा पाठः, न सवर्णः-असवर्णः। न विद्यते घोषो ध्वनिर्येषां ते-अघोषाः। ब्रह्मणस्या-भावः-अब्राह्मणम्। तत्पुरुष इत्युपलक्षणम्।

२८१. **स्वरेऽक्षर विपर्ययः।**

नस्य सम्बन्धिनि तत्पुरुषे स्वरेऽक्षरविपर्य्यो भवति। अनजः, अनजम् अनजकः।

२८२. **को कत्।**

कुशब्दस्य तत्पुरुषस्य स्वरे कद् भवति। कुत्सितोऽश्च : कदश्व। एवं कदुष्ट्रः तत्पुरुष इति किं? कुष्ट्रो देशः।

२८३. **कात्वीषदर्थेऽक्षे**

कुशब्दस्य तत्पुरुषे ईषदर्थे वर्त्तमानस्य का देशो भवति, अक्षशब्दे च परतः। ईषल्लक्षणम्, कालवणम्। काम्लम्, काक्षेण वीक्षते। ईषदर्थे स्वरे तु परत्वत् कादेश एव।

२८४. **पुरुषे तु विभाषया।**

कुशब्दस्य तत्पुरुषे पुरुष शब्दे च परे विभाषया। कादेशो भवति। का

पुरुषः, कुपुरुषः । इयमप्राप्ता विभाषैव । ईषदुष्णम् । कोष्णम्, कवोष्णम् कदुष्ण-मिति वक्तव्यम् ।

२८५. **याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् ।**

ईश्च आकारश्च याकारौ स्त्रीकृतौ ह्रस्वौ भवतः समासे क्वचिल्लक्ष्यानुरोधात् । रेवतिमित्रः, रोहिणिमित्रः, भरणिमित्रः, इष्टकचितम्, ईषिकतूलम्, मालभारिणी कन्या । एवमन्योऽपि ।

२८६. **ह्रस्वस्य दीर्घता ।**

ह्रस्वस्य दीर्घता भवति समासे क्वचिल्लक्ष्यानुरोधात् । दात्राकर्णः, द्विविधा-कर्णः द्विगुणाकर्णः, द्वयङ्गुलाकर्णः-चिन्हस्यैव कर्णे दीर्घः । क्वचिन्न स्यात्—अष्ट-कर्णः, पिष्टकर्णः । नहिवृतिवृषिव्याधिरुचिसहितनिषु क्विबन्तेषु प्रादिकारकाणामेव दीर्घः—उपानत्, उपावृत्, प्रावृट्, मर्म्मावित् नीरुक्, ऋतीषट्, परीतत् । एवमन्योऽपि ।

२८७. **अनव्ययविसृष्टस्तु सकारं कपवर्गयोः ।**

अनव्ययविसृष्टस्तु कपर्गयोः परयोः सकारमापद्यते । क्वचिल्लक्ष्यानुरोधात् । अयस्पाशम्, अयस्काम्यति, अयस्कम् पाशकल्पकाम्यकेषु दृश्यते । रप्रकृतेः काम्ये न भवति—गीः काम्यति । धूः काम्यति । अयस्कारः, अयस्कामः, अयस्कंसः, अयस्कुम्भः । "कृञ्कामिकंसकुम्भेषु समासेऽयमतः, परः । अनुत्तरे कुशाकर्णयो-र्भास्करादिषु लक्ष्यते: ।" नञा निर्दिष्टमनित्यम् नमस्कर्त्तुं पुरस्कर्त्तुमित्यादयः ।

इति दौर्गसिंह्यां वृत्तौ चतुष्टये समासः पादः समाप्तः ।

कलाप-व्याकरणे

तद्धितपादः

२८८. वाणपत्ये ।

षष्ठ्यन्तान्नाम्नोऽपत्येऽभिधेयेऽण् प्रत्ययो भवति वा । उपगोरपत्यम्-औपगवः । एवं पाण्डवः, आश्वपतः, शैवः । अपत्यसामान्य-विवक्षायामाद्यप्रकृतेरेव । पौत्रादेस्तु प्रत्तस्य एवापत्ये स्त्रीवर्ज्जितेऽणादयोऽभिधीयन्ते । वाग्रहणात् उपगोरपत्यम् उपगवपत्यञ्च स्यात् ।

२८९. ण्य गर्गादेः।

गर्गादेर्गणादपत्येऽभिधेये ण्यो भवति । गर्गस्यापत्यं-गार्ग्यः, एवं वात्स्यः । गोत्रादिभूतादेव पौत्रादावेवापत्येऽभिधानात् । अन्यत्र-गार्गिः । अनन्तरोऽपि । रामो जामदग्न्यः, व्यासः पाराशरः इति च । गर्गादिराकृतिगणोऽयम् ।

३९०. कुञ्जादेरायनण् स्मृतः ।

कुञ्जादेर्गणाद्गोत्रादिभूतात् पौत्रादावेवापत्येऽभिधेये आयनण् भवति । ण्यश्च स्मृतस्तदन्तात् प्राङ् नडादेरेव बहुत्वेऽस्त्रियाम् । तदेतत् कथं स्मृत ग्रहणस्येष्ट— विषयत्वात् । कौञ्जायन्यः, कौञ्जायन्यौ, ब्राध्नायन्यौ । स्त्रियां तु—कौञ्जायनी ? बहुत्वे च कौञ्जायनाः । नडादेस्तु-नाडायनः । एवं चारायमः मौञ्जायनः । कुञ्जो नाम कश्चित् तस्यापत्यं कौञ्जिः । प्रथमापत्यञ्च कौञ्जिः । कुञ्जादिराकृतिगणः ।

२९१. स्त्र्यत्र्यादेरेयण् ।

स्त्रियां विहितत्वात् स्त्री । स्त्रीयामादादिभ्योऽत्र्यादेश्चापत्येऽभिधेये एयण् भवति । वैनतेयः, सौपर्णेयः, कामण्डलेयः, धावतेयः, आत्रेयः, शौचेयः । आदिग्रहणात् शौभ्रेयः, वैष्णपुरेयः । अत्रिरयमप्रत्यये दन्तद्विसरोपलक्षणं, तेन मरीचेरपत्यं-मारीचः, दाक्षेरपत्यं-दाक्षायणः । अत्र्यादिराकृतिगणः ।

२९२. इणतः ।

अकारान्तान्नाम्नोऽपत्येऽभिधेये इण् भवति । दक्षस्यापत्यं-दाक्षिः, एवं प्लाक्षिः अस्यापत्यम्—इः । अत इति किं ? कैलालपः । शतसर्व्वकाकशुक्लवृन्दराजपुरुष- माथुरकारकेभ्यः संख्यादिभ्यो न भवत्यनभिधानात् । कथं "प्रतीयतां दाशरथाय मैथिली" ति ? तस्येदमित्यण् ।

२६३. **बाह्वादेश्च विधीयते ।**

बाह्वादेर्गणादपत्येऽभिधेये इण् विधीयते । बाह्वविः, औपबाह्वविः, बैन्दविः, औपबिन्दविः । गोत्रादिभूतादेव-बाहुर्नाम् कश्चित्, तस्यापत्यं—बाहवः । बाह्वादिराकृतिगणः ।

२६४. **रागान्नक्षत्रयोगात् समूहात् सास्य देवता ।**

तद्वेत्त्यधीते वा तस्येदमेव मा देरणिष्यते ॥

रागयोगाद्रागः कौस्तुभं हारिद्रं "कुसुम्भेन हरिद्रया वा रक्तमित्यर्थः । कथं "कषायो गर्दभस्य कर्णौ हारिद्रौ कुक्कुटस्य पादाविति ? तद्गुणाध्यारोपात् । नक्षत्रस्य योग इन्दुनैव तत्सम्बधात् कालोऽभिधीयते । अण्विधिस्तु श्रुतादेव नक्षत्रशब्दात् । पौषमहः, पौषी रात्रिः । तैषमहः, तैषी रात्रिः । पुष्येण चन्द्रयुक्तेन युक्ता रात्रिरित्यर्थः । कृत्तिकासु विशाखासु मघासु भरणीषु चे" ति नक्षत्रशब्दैरभेदोपचारात् यद्यपि कालाभिधानं तथाप्यण् नास्ति विकल्पनात् । धर्मिणो ह्यभिन्नः, मयूरः । वायसं काकं भैक्षं यौवनम् । शिवो देवता अस्येति शैवः । एवमैन्द्रं हविः, ऐन्द्रो मन्त्रः । छन्दो वेत्ति अधीते वा छान्दसः, एवं वैयाकरणः । मृगस्येदं—मार्गं मांसं । एवं शौकरम् । एवमादियंस्येति शब्दार्थयोः सम्बन्धेन गणो गृह्यते । चक्षुषा गृह्यते-चाक्षुषं रूपम् । एवं श्रावणः शब्दः । दृषदि पिष्टाः—दार्षदाः शक्तवः । उलूखले क्षुण्णा-औलूखला मुद्गाः । अश्वैरुह्यते-आश्वोपथः । चतुर्भिरुह्यते-चातुरं शकटम् । चतुर्दश्यां दृश्यते रक्षः-चातुर्दशम् । तत्रभवस्तत्र जातस्ततो वा आगत इत्यादि विग्रहः कार्य्यः । आकृतिगणोऽयम् ।

२६५. **तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि,**

पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ॥

तेन दीव्यति, तेन संसृष्टं, तेन तरति, तेन चरत्यपि, अभेदोपचारवृत्तेः पाण्याच्छिल्पान्नियोगाच्च यथासंख्यं क्रीत्यादेरायुधाऽप्यभेदोपचारवृत्तेरिकण् भवति । अक्षैर्दीव्यतीति-आक्षिकः, दध्ना संसृष्टं-दाधिकम् । एवं मारीचिकम् । गोपुच्छेन तरतीति-गौपुच्छिकः, एवं काण्डप्लविका नद्याः । आश्वमेधिका ब्रह्महत्याः । शकटेन चरति-शाकटिकः एवं घन्टिकः, प्लविकः, शृंगवेरेण चरति-शाङ्गवेरिकः । ताम्बूलपण्ययोगात-ताम्बूलिकः । मृदङ्गशिल्पयोगात—मार्दङ्गिकः । एवं पाणविकः । द्वारनियोग-योगात्- दौवारिकः, एवं श्लोकशालिकः । द्विशूर्पेण क्रीतः-द्विशौर्पिकः । एवं साहस्रिकः । कार्षापणमर्हति-कार्षापणिकः । तोमरायुधयोगात्-तौमरिकः, एवं चान्द्रिकः । क्रीतादेरप्यभेदमपेक्ष्य पञ्चमी, क्रियाविर्भावश्च स्पष्टार्थः । कुदालेन खनति-कौद्दालिकः । ओजसहोम्भसा वर्त्तते—औजसिकः शूरः, साहसिकश्चोरः आम्भसिको मत्स्य इत्यादि ।

२९६. **नावस्तार्य्ये विषाद्वध्ये तुलया सम्मितेऽपि च, तत्र साधौ यः ।**

नावस्तृतीयान्तात्तार्ये विषात्तृतीयान्ताद् वध्येऽर्थे तुलयेति तृतीयान्तात् सम्मितेऽर्थे अपि च तत्रेति सप्तम्यन्तात् साधावर्थे यप्रत्ययो भवति। नावा तार्य्यं-नाव्यम्। विषेण वध्यो:-विष्य:। तुलया सम्मितं-तुल्यं। कर्म्मणि साधुः-कर्मण्य:। अपिचेति वचनात्-गिरिणा तुल्यो हस्तीति-गिरितुल्य:, तुल्य: सदृश इत्यन्ये। कुशलो योग्यो हितश्च साधुरुच्यते।

२९७. **ईयस्तु हिते ।**

हितेऽर्थे ईयप्रत्ययो भवति। वत्सेभ्यो हितो वत्सीय: गोधुक्। एवमश्वीय:। योगविभागात् स्वराणामादावाद् वृद्धिमतेः शेषेऽर्थे ईय: स्यात्। शालायां भवो जातो वा शालीय:। ऐतिकायनस्य इमे छात्रा: ऐतिकायनीया:। एवमौपगवीया:। एवमन्येऽपि।

२९८. **यद्‍ुगवादितः ।**

उवर्णान्तात् गवादिभ्यश्च हिते ऽर्थे यद् भवति। कृकवाकुभ्यो हितं पय:— कृकवाकव्यम्। वधूभ्यो हितो देश:—वधव्य:। गोभ्यो हितं—गव्यं वनम्। हविष्यास्तण्डुला:। सुगव्यमिति-गव्यमिति तदन्तविधिरिष्ट:। गां हविस् अष्टका बर्हिस्, मेधा, श्रुच इत्यादयोऽप्यनुसर्त्तव्या:। विकृतिवाचिन: शब्दात् प्रकृतावभिधेयायां यथोक्तं हिते ऽर्थे प्रत्ययो मन्तव्य:।—अंगारीयाणि काष्ठानि, पिचव्य: कार्पास:।

२९९. **उपमाने वतिः ।**

उपमितिरुपमानम्। उपमानेऽर्थे वतिर्भवति। राजेव वर्त्तते-राजवत्। ब्राह्मणस्यैव वृत्तिरस्येति-ब्राह्मणवत्। मथुरायामिव पाटलिपुत्रप्रसादो-मथुरावत्। राज्ञेव व्यवहृतमनेन-राजवत्। देवमिव भवन्तं पश्यामि—देववत्। पर्व्वतादिव आसनादवरोदति—पर्व्वतवत्। ब्राह्मणायेव देवदत्ताय ददातीति—ब्राह्मणवत्। अत्रापि तदर्हमिति परैरेष्टव्यमेव। गुणसाम्येऽपि देवदत्त इव स्थूलो—देवदत्तवत्। गुणहीनादपि—अन्धवत्, जड़वत्। द्रव्य साम्ये ऽपि देवदत्त इव गोमान्—देवदत्तवत्। सद्भावात् क्रिया साम्येऽप्यस्तीति सर्व्वत्र भवितव्यमेव।

३००. **तत्वौ भावे** (तस्य भावस्त्वतलौ-पा० ५.१.११९)

शब्दस्य प्रवृत्ति निमित्तं भाव:। भावेऽभिधेये तत्वौ भवत:। शुक्लस्य पटस्य भाव:—शुक्लता, शुक्लत्वमिति शुक्लगुण भाव:। शुक्लस्य गुणस्य भाव:—शुक्लता, शुक्लत्वमिति शुक्लगुण जाति:। गोता, गोत्वमिति गोजाति:। पाचकत्वं, दण्डित्वं, विषाणित्वं, राजपुरुषत्वं। क्रियादिसम्बन्धित्वं। देवदत्तत्वं, चन्द्रत्वं, सूर्यत्वमित्यवस्था भेदात्। आकाशत्वमिति प्रदेशभेदात्। अभावत्वमिति सम्बन्धविभेदात्। नानेत्यस्य भावो नानात्वमिति।

३०१. यण् च प्रकीर्तितः । (गुण वचन ब्राह्मणादिभ्यः कर्मणि च । पा० ५.१.१२४)

भावेऽभिधेये यण् प्रकीर्तितः, चकारात्तत्वौ च । जड़स्य भावो—जाड्यम्, जड़ता, जड़त्वमिति । ब्राह्मणस्य भावो—ब्राह्मण्यं, ब्राह्मणता, ब्राह्मणत्वमिति । एवं मानव्यं, वाडव्यम् । प्रकीर्तितग्रहणं लक्षानुबोधार्थम् । तेन गुणवचनब्राह्मणादिभ्योऽन्येभ्योऽपि क्रियायामपि दृश्येत । जड़स्य कर्म—जाड्यम्, ब्राह्मणस्य कर्म—ब्राह्मण्यम् ।

३०२. तदस्यास्तीति मन्त्वन्त्वीन् (मन्तुवन्तवीनिन्) ।

तादिति प्रथमान्तादस्यास्तीति इत्यस्मिन्नर्थे मन्तु वन्तु विन् इन् इत्येते प्रत्यया भवन्ति । गावो विद्यन्तेऽस्येति गोमान्, एवमायुष्मान्, वृतवान्, मालावान्, किंवान्, लक्ष्मीवान्, क्रियावान्, विद्युतवान्, पयस्वान्, भास्वान् । तेजस्वी, पयस्वी, दण्डी, मायी, मायावी । इति शब्दोऽत्र विवक्षार्थः—

भूमिनिन्दा प्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥ १ ॥

तथा मोपधमान्ताच्च धुड़न्तादशिडन्ततः ।
अवर्णोपधतश्चापि वन्तुरवर्णस्तथा ॥ २ ॥

मायाशीर्षात् स्वरूपच्च व्रीहेरर्थात् स्वरूपतः ।
यथा व्रीहीति शालीति इन्ननेक स्वरादतः ॥ ३ ॥

मायास्मेधास्रजो विन् स्यात् वाधिकाराद्विभाषया ।
विहिता सर्व्वं एवैते शेषेभ्यो मन्तु इष्यते ॥ ४ ॥

द्वन्द्व निन्दित रोगेभ्यः प्राणीस्थेभ्य इनेव हि ।
कटकवलयी कुष्ठी स्यात् काकतालुकी यथा ॥ ५ ॥

स्यात् स्वाङ्गात्तु यथा प्राप्तं स्तनकेशवती यथा ।
कः स्वार्थे नित्वमेवैषां वातोऽस्यास्तीति वातकी ॥ ६ ॥

अति सारक्यपीदृक् स्यात् पिशाचकी तथा स्मृतः ।
कल्माषोन्मत्तत्वे पिशाच शब्दोऽभिधीयते ॥ ७ ॥

वयसि गम्यमाने च पूरणान्तादिनेव हि ।
पञ्चदिनानि मासा वा पञ्चमी बालको यथा ॥ ८ ॥

सुखादिभ्य इनेव स्यात् बाहूभ्यां बलादपि ।
सुखी दुःखी अलीकी च करुणी कृपणी हली ॥ ९ ॥

३०३. **संख्यायाः पूरणे डमौ ।** (तस्य पूरणे डट् ॥ पा० ५.२.४८ ॥)
(नान्तादसंख्यादेर्मट् ॥ पा० ५.२.४९ ॥)

संख्याया पूरणेऽर्थे डमौ भवतः । व्यवस्थितवाधिकराद् वा असंख्यादेर्नान्तायाश्च मो भवति, शेषाच्च डः । एकादशानां पूरणः—एकादशः, एकादशी । एवं पञ्चमः, पञ्चमी । संख्यायाः पूरणे इति किम् ? एकादशानां वा इष्टिकानां पूरणो घटः ।

३०४. **द्वेस्तीयः ।** (द्वेस्तीयः । पा० ५.२.५४)

द्वे पूरणेऽर्थे तीयो भवति । द्वयोः पूरणः — द्वितीयः ।

३०५. **त्रेस्तृ च ।** (त्रेः सम्प्रसारणं चा० पा० ५.२.५५)

त्रेः पूरणे ऽर्थे तीयो भवति त्रादेशश्च । त्रयाणां पूरणः—तृतीयः ।

३०६. **अन्तस्थो डर्षोः ।**

रषोरन्तस्थो भवति डे परे । चतुर्णां पूरणं—चतुर्थं, एवं षष्ठः । आगमत्वात् विसर्गो डत्वञ्च न स्यात् ।

३०७. **कतिपयात् कतेः ।** (पा० ५.२.५१)

कतिपयात् कतेश्च पूरणेऽर्थे थो भवति । कतिपयथः, कतिथः ।

३०८. **विंशत्यादेस्तमट् ।** (विंशत्यादिभ्यस्तमडन्यतरस्याम् पा० ५.२.५६)

विंशत्यादेः पूरणेऽर्थे तमड् भवति । विंशते पूरणः—विंशतितमः, विंशतितमी, त्रिंशत्तमः, त्रिंशत्तमी, उत्तरत्र नित्य ग्रहणात् विकल्पो लभ्यते—विंशः, त्रिंशः ।

३०९. **नित्यं शतादेः ।** (नित्यं शतादि मासार्धमास संवत्सराच्च । पा० ५.२.५७)

शतादेः पूरणेऽर्थे नित्यं तमड्भवति । एकशततमः, एकशततमी । एकसहस्रतमः, एकसहस्रतमी । एक कोटितमः, एककोटितमी । एक लक्षतमः, एकलक्षतमी ।

३१०. **षष्ठ्यादेरतत्परात् ।** (षष्ठ्यादेश्चा संख्यादेः । पा० ५.२.५८)

तस्याः परः तत्परः, संख्यायाः पर इत्यर्थः । षष्ठ्यादेरसंख्यायाः परान्नित्यं तमड् भवति । षष्ठितमः, सप्ततितमः, अशीतितमः नवतितमः । अतत्परादिति किम् ? एकषष्ठः, एकसप्ततः ।

३११. **विभक्ति संज्ञा विज्ञेया वक्ष्यन्तेऽतः परस्तु ये,** (प्राग्दिशो विभक्तिःपा० ५ ३.१)
अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः । (किं सर्व······ ५.२.२)

श्रुतत्वात् सर्वनाम कार्यं प्रत्येव विभक्तिसंज्ञा, तेन—यदा कदेति घोषवति न दीर्घः । बहुशब्दोऽत्र संख्यावचनः सर्वनाम साहचर्यात् ।

३१२. **तत्रेदमिः** (इदम इश् । पा० ५.३.३)

तेषु विभक्तिसंज्ञकेषु इदम् इकारो भवति, इतः, इह, इदानीम् ।

३१३. **रथोरेतेत्** । (एतेतौ रथोः । ५.३.४)

रथोः परतः इदम् एत् इत् इत्येतौ प्राप्नोति यथासंख्यम् । एतर्हि, इत्थम् ।

३१४. **तेषु त्वेतदकारताम्** ।

तेषु तकारादिषु विभक्तिसंज्ञकेषु एतदकारताम् प्राप्नोति । अदः, अत्र तकारादिष्वित किम् ? एतथा ।

३१५. **पञ्चम्यास्तस्** । (पञ्चम्यास्तसिल् । पा० ५.३.७)

अद्वयादेः सर्वनाम्नो बहोश्च पञ्चम्यन्तात् तस् प्रत्ययो भवति वा । सर्वस्मिन्, सर्वत्र । यस्मात्, यतः । तस्मात्, ततः । बहुभ्यः, बहुतः । अद्वयादेरिति किम् ? द्वाभ्यां भवतः । उगवादितः प्रयोगतश्चेति ज्ञापकादसर्वनाम्नोऽप्यवधिमात्रे तस् वक्तव्यः, ग्रामात्, ग्रामतः । हाग्रुहोरवधौ न स्यात्—युष्मद्धीयते, सार्थाद्धीनः, पर्वतादव-रोहति ।

३१६. **त्रसप्तम्याः** । (सप्तम्यास्त्रल् पा० ५.३.१०)

अद्वयोदः सर्वनाम्नो बहोश्च सप्तम्यन्तात् त्र प्रत्ययो भवति वा । सर्वस्मिन् सर्वत्र । तस्मिन्, तत्र । यस्मिन्, यत्र । बहुषु, बहुत्र । अद्वयादेरिति किम् ? द्वयोः, त्वयि, मयि । आद्यादिभ्यस्तस् वक्तव्यः—आदौ, आदितः । अन्ते, अन्ततः । पृष्ठे, पृष्ठतः । मध्ये, मध्यतः । अग्रे, अग्रतः । पार्श्वे पार्श्वतः । मुखे, मुखतः आकृति-गणोऽयम् ।

३१७. **इदमो हः** । (इदमो हः । पा० ५.३.११)

इदमः सप्तम्यन्तात् हो भवति वा । अस्मिन्, इह ।

३१८. **किमः** । (वाह च च्छन्दसि । पा० ५.३.१३)

किमः सप्तम्यन्ताद् हो भवति वा, कस्मिन्, कुह । छन्दस्येवेत्यन्ये ।

३१९. **अत क्व च** । (किमोऽत् । पा० ५.३.१२)

किमः सप्तम्यन्ताद् 'अत्' भवति क्वादेशश्च । कस्मिन् क्व ।

३२०. **तहोः कुः** ।

तकारहकारयोः परयो किमः कुर्भवति । कुतः, कुह ।

३२१. **काले किं सर्वयदेकान्येभ्य एव दा** । (सर्वैकान्यकियत्तदः काले दा । पा० ५.३.१५)

एभ्यः काले वर्तमानेभ्यः सप्तम्यन्तेभ्यो 'दा' प्रत्ययो भवति । कस्मिन् काले—कदा । एवं सर्वदा, यदा, तदा, एकदा, अन्यदा । काल इति किम् ? सर्वत्र देशे ।

३२२. **इदमो र्ह्यधुनादानीम्** । { इदमो र्हिल् । पा० ५.३.१६ ; अधुना । पा० ५.३.१७ ; दानीं च । पा० ५.३.१८ }

काले वर्त्तमानादिदमः सप्तम्यन्तात् र्हि अधुना दानीम् इत्येते प्रत्यया भवन्ति । अस्मिन् काले—एतर्हि, अधुना, इदानीम् ।

३२३. **दादानीमौ तदः स्मृतौ** । (तदो दा च । पा० ५.३.१९)

काले वर्त्तमानात्तदः सप्तम्यन्तात् दादानीमौ प्रत्ययौ स्मृतौ । तस्मिन् काले—तदा, तदानीम् ।

३२४. **सद्याद्या निपात्यन्ते** । (सद्यः परुत्··· । पा० ५.३.२२)

समाने अह्नि—सद्यः । समानस्य स भावो द्यस् च परविधिः । परस्मिन्नहनि—परेद्यविः—परादेरेद्यवि । अस्मिन्नहनि—अद्य, इदमो ह्रद्भावो द्य च परविधिः । परुत्, परारि—पूर्व्वपूर्व्वतयोः पर उदारी च । अस्मिन् संवत्सरे—ऐषमः, इदमः । समसण् । पूर्वस्मिन्नहनि पूर्वेद्युः —पूर्वादेद्युस् । एमम् अन्यद्युः, अन्यतरेद्युः, इतरेद्युः, अपरेद्युः, अधरेद्युः, उत्तरेद्युः, उभयेद्युः । उभयद्युः—उभयात् द्युस् च । किमन्यय-त्तद्भ्योऽनद्यतनवृत्तिभ्यो र्हिर्वा । कस्मिन् काले कर्हि, कदा । एवमन्यर्हि, अन्यदा । यर्हि, यदा, तर्हि, तदा । अद्यतनेऽपि । एवं पुरस्तादयश्चानुसर्त्तव्याः ।

३२५. **प्रकारवचने तु था** । (प्रकार वचने थाल् । पा० ५.३.२३)

सर्वनाम्नोऽद्वयादेः प्रकार वचने तु था—प्रत्ययो भवति । सामान्यस्य भेदकः प्रकारः । सर्वेण प्रकारेण—सर्वथा, एवं यथा, तथा, अन्यथा । वाक्यार्थवशेन सर्व-विभक्तिभ्यो ज्ञेयः । था इति बहुवचनं वा, तेन संख्यया प्रकारे धा—द्विधा, त्रिधा, चतुर्धा, पञ्चधा, षड्धा । द्वित्रिभ्यां धमुणे धा च—द्वैधं, त्रैधं, द्विधा, त्रिधा । एकात् ध्यमुण् वा—ऐकध्यम् । एकधा ।

३२६. **इदं किम्भ्यां थमुः कार्य्यः** । { इदमस्थमुः । पा० ५.३.२४ ; किमश्च । पा० ५.३.२५ ; था हेतौ च छन्दसि । पा० ५.३.२६ }

इदं किम्भ्यां प्रकारवचने तु थमुः कार्य्यः । अनेन प्रकारेण—इत्थम् । केन प्रकारेण कथम् ।

३२७. **आख्याताच्च तमादयः** । (तिङश्च । पा० ५.३. ५६)

नाम्न आख्याताच्च तमादयः प्रत्यया निपात्यन्ते । आख्यातं क्रिया प्रधानम् । आढ्यतरम्, आढ्यतमम्—प्रकृष्ट आढ्य उच्यते निपातनस्येष्टविषयत्वात् । तथा पचतितरां, पचतितमां, किंतरां, किंतमां, पूर्वाह्णेतरां, पूर्वाह्णेतमाम्, उच्चैस्तराम्, उच्चैस्तमाम् ।

३२८. **आख्यात क्रियेकारान्ताव्ययेभ्यः क्रियागुणप्रकर्षवृत्तिभ्य एव तरां तमाम्।**

३२९. **तथा गुणादिष्ठेयन्सू वा।**

{ अतिशायने तमबिष्ठनौ। पा० ५.३.५५
तिङश्च। पा० ५.३.५६
द्विवचन विभज्योपपदे तरबीयसुनौ। पा० ५.३.५७
अजादी गुणवचनादेव। पा० ५.३.५८ }

गुणात् गुणवाचकाच्छब्दात् इष्ठेयन्सू वा भवतः। पटिष्ठः, पटीयान्। पटुतरः, पटुतमः। गरिष्ठः, गरीयान्। गुरुतरः, गुरुतमः। गुणादिति किम्? प्रकृष्टाग्निः।

३३०. **प्रकर्षे रूपश्च।** (प्रशंसायां रूपम्। पा० ५.३.६६)

प्रकृष्ट वाचकात् प्रकृतेः रूप प्रत्ययो भवति। प्रकृष्टं पचति—पचतिरूपम्। प्रकृष्टं गच्छति—गच्छतिरूपम्। प्रकृष्टो बभूव—बभूवरूपम्। प्रकृष्टो भविष्यति—भविष्यतिरूपम्। प्रकृष्टो वैयाकरणः— वैयाकरणरूपः। एवमन्येऽपि। प्रकृष्ट इति किं? ग्रामं गच्छति। नात्र प्रकृष्टार्थता ग्रामगमनमात्रार्थः।

३३१. **ईषदसमाप्तौ कल्पदेश्यदेशीयाः।** (ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। पा० ५.३.६७)

ईषदसमाप्तौ गम्यमनायां प्रकृतेः कल्पदेश्यदेशीया भवन्ति। पटुकल्पः, पटुदेश्यः, पटुदेशीयः। एवमन्येऽप्यनुसर्त्तव्याः। ईषदसमाप्ताविति किम्? प्रकृष्टो भवति—भवतितराम्।

३३२. **कुत्सितवृत्तेर्नाम्न एव पाशः।** (याप्ये पाशप्। पा० ५.३.४७)

नाम्नः कुत्सितवृत्तेः पाशप्रत्ययो भवति। कुत्सितो वैयाकरणः—वैयाकरणपाशः। कुत्सितो देवदत्तः—देवदत्तपाशः। कुत्सितः शाब्दिकः शाब्दिकपाशः। कुत्सितवृत्तेरिति किम्? शोभनो वैयाकरणः—वैयाकरणतरः।

३३३. **भूतपूर्ववृत्तेश्चरट्।** (भूतपूर्वे चरट्। पा० ५.३.५३)

भूतपूर्वो भूतपूर्वः, तत्र वृत्तिर्यस्यासौ भूतपूर्ववृत्तिः, तस्मात् भूतपूर्ववृत्तेर्नाम्नश्चरड् भवति। टकारो नदाद्यर्थः। भूतपूर्वं आढ्य—आढ्यचरः, आढ्यचरी। भूतपूर्ववृत्तेरिति किम् ईषदसमाप्त आढ्यः—आढ्यकल्पः।

३३४. **षष्ठ्यन्तात् भूतपूर्वाभिधेये रूप्यश्च।** (षष्ठ्या रूप्य च। पा० ५.३.३४)

षष्ठ्यन्तान्नाम्नो भूतपूर्वाभिधेये रूप्य प्रत्ययो भवति। चकाराच्चरडपि। देवदत्तस्य भूतपूर्वो गौः—देवदत्तरूप्यः। देवदत्तचरः, देवदत्तचरी। षष्ठ्यन्तादिति किं? देवदत्तात् भूतपूर्वा भीतिः। भूतपूर्वाभिधेये इति किं? देवदत्तस्य गौः।

३३५. बह्वल्पार्थात् कारकाच्छस् वा मङ्गले गम्यमाने ।

(बह्वल्पार्थाच्छस्कारकादन्य तरस्याम् । पा० ५.४.४२)

बहुश्च अल्पश्च बह्वल्पो तयोरर्थः बह्वल्पार्थः, तस्मात् बह्वल्पार्थात् । बह्वर्थात् अल्पार्थाच्च कारकान्मंगले गम्यमाने शस् प्रत्ययो भवति वा । बहु देहि, बहुशः देहि । प्रभूतं देहि, प्रभूशो देहि । अल्पं देहि, अल्पशो देहि । स्तोकं देहि, स्तोकशो देहि । अन्यत्र न भवति—गां देहि । कारकादित्येव, बहूनां स्वामी, अल्पानामीश्वरः । मंगल इति किं ? बहूनि दुःखानि देहि ।

३३६. संख्यैकार्थाभ्यां वीप्सायाम् । (संख्यैकवचनाच्च वीप्सायाम् । पा० ५.४.४३)

एकार्थो यस्येत्येकार्थः, संख्या च एकार्थश्चेति द्वन्द्वः । इहापि कारकादिति वर्त्तते । संख्यावाचकादेकार्थाच्च वीप्सायां गम्यमानायां शस् प्रत्ययो भवति । प्रयग्-योगादत्र विकल्पनिवृत्तिः । द्वौ द्वौ देहि-द्विशो देहि । कार्षापणं कार्षापणं देहि—कार्षापणशो देहि । कुडवं कुडवं देहि – कुडवशो देहि । पादं पादं देहि पादशो देहि । संख्यैकार्थाभ्यामिति किं ? मासौ मासौ देहि । वीप्सायामिति किं ? द्वौ देहि, कार्षापणं देहि । कार-कादिति किम् ? द्वयोर्द्वयोः स्वामी ।

३३७. कतिगणवन्तूनां संख्यावत् ।

कति च गणश्च वन्तुश्च– कतिगणवन्तवः, तेषां कतिगणवन्तूनां [संख्याया इव] संख्यावत् । यथा संख्यावाचकाद् वीप्सायाम् । कति कति देहि—कतिशो देहि । गणं गणं—गणशो देहि । तावन्तं तावन्तं देहि तावच्छो देहि । कतिगण—वन्तूनामिति किं ? पुनः पुनर्देहि । वीप्सायामिति किं ? कति देहि ।

३३८. वारस्य संख्याया कृत्वस् । (संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।

पा० ५.४.१७)

स्वस्थानस्थितशब्दस्य पुनरर्थानुसन्धानमावृत्तिः आवृत्ति-लक्षण क्रियायाः प्रवृत्ति लक्षणः, कालो वारः । वारस्य सम्बन्धिन्याः संख्याया कतिगणवन्तूनाञ्च कृत्वस् प्रत्ययो भवति । पञ्च वारान् भुंक्ते—पञ्चकृत्वा भुंक्ते । शतं वारान् भुंक्ते—शतकृत्वो भुंक्ते । वाराणां वा शतं भुंक्ते । एवं कति वारान् भुंक्ते—कतिकृत्वा भुंक्ते । एवं गणकृत्वः, तावत्कृत्वः । वारस्य संख्याया इति किम् ? ऋषीणां शतं पश्यति ।

३३९. बहोरविप्रकर्षे धा च । (विभाषा बहोर्धाऽविप्रकृष्ट काले । पा० ५.४.२०)

अविप्रकर्षः सान्निध्यम् । अविप्रकर्षे वर्त्तमानात् बहुशब्दात् वारस्य संख्याया धा प्रत्ययो भवति, कृत्वस् च । बहून् वारान् भुंक्ते दिवसस्य—बहुधा, बहुकृत्वः । बहोरिति किं ? शतं वारान् भुंक्ते । अविप्रकर्ष इति किं ? बहुकृत्वो मासस्य भुंक्ते ।

३४०. द्वित्रिचतुर्भ्यः सुच्। (पा० ५.४.१८)

द्वित्रिचतुर्भ्यो वारस्य संख्यायाः सुच् प्रत्ययो भवति। द्वौ द्वौ वारौ भुंक्ते—द्विर्भुंक्ते। त्रीन् वारान् भुंक्ते—त्रिर्भुंक्ते। चतुरो वारान् भुंक्ते—चतुर्भुंक्ते। द्वित्रिचतुर्भ्य इति किम् ? पञ्चवारान् भुंक्ते—पञ्चकृत्वः।

३४१. प्रस्तुतवृत्तेर्मयट्। (तत्प्रकृतवचने मयट्। पा० ५.४.२१)

प्रस्तुतवृत्तेः प्रकृतेर्मयट् प्रत्ययो भवति। टकारो ङदाद्यर्थः। अन्नं प्रस्तुतं—अन्नमयम्। यवागूः प्रस्तुता—यवागूमयी। प्रस्तुतवृत्तेरिति किम् ? प्रकृष्टाः यवागूः—यवागूतराम्।

३४२. प्रकृतेर्विकारेऽवयवे वा भक्षाच्छादनयोः। (मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। पा० ४.३.१४३)

भक्षश्च आच्छादनं च भक्षाच्छादने, न भक्षाच्छादने अभक्षाच्छादने, तयोः। प्रकृतेर्विकारे अवयवे वा मयट् प्रत्ययो भवति, वात्र समुच्चये न तु भक्षाच्छादनयोः। अश्मनो विकारोऽवयवो वा—अश्ममयं। भस्ममयं, सुवर्णमयं, लोहमयी। अभक्षाच्छादनयोरिति किम् ? मुद्गस्य विकारो—मौद्गः सूपः। कार्पासस्य विकारोऽवयवो वा कार्पासमाच्छादनम्, मयटा अण् न बाध्यते। आश्मणो विकारोऽवयवो वा—आश्मः एवं भास्मः—नस्तु क्वचिदिति न लोपः।

३४३. एकस्वरान्नित्यम्। (नित्यं वृद्धशरादिभ्यः। पा० ४.३.१४४)

एकस्वरात् शब्दात् नित्यं मयट् भवति। वाङ्मयं, त्वङ्गमयं, मृन्मयम्। एकस्वरादिति किम् ? पटोर्भावः—पटुत्वम्।

३४४. अभूततद्भावे कृभ्वस्तिषु विकाराच्च्विः। (अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः। पा० ५.४.५०)

अभूतस्य अजातस्य तदात्मनो भावोऽभूततद्भावः। अयमर्थः—अवस्थावतोऽवस्थान्तरेण अभूतस्य अजातस्य तदात्मनो तेनैव स्वरूपेण भावे (विकारस्वभावेन जन्मनि) कृभ्वस्तियोगे विकारवाचिनः शब्दात् च्वि प्रत्ययो भवति। अशुक्लं शुक्लं करोति—शुक्ली करोति। अशुक्लः शुक्लो भवति—शुक्ली भवति। अशुक्लः शुक्लः स्यात्—शुक्ली स्यात्। अवस्त्रं वस्त्रं भवति—वस्त्रीभवति। एवमन्येऽपि। अभूततद्भाव इति किम्। घटं करोति, घटो भवति, घटः स्यात्। कृभ्वस्तिष्विति किम् ? अशुक्लो शुक्लो जायते। विकारादादिति किम् ? प्रकृतेर्माभूत—सुवर्णं कुण्डलं करोति।

३४५. अरुर्मनश्चक्षुश्चेतोरहोरजोभ्यः कृतसलोपेभ्य एवायं विधिः। (अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। पा० ४.४.५१)

समादिनिपातनस्येष्टविषयत्वात्। कृतसलोपेभ्यो एभ्यः कृभ्वास्तिषु

च्वि प्रत्ययो भवति । अनरुः अरुः करोति—अरुकरोति एवम् अरुभवति, अरुस्यात् । उद्गतं मनो यस्य—स उन्मनाः । अनुन्मनसम् उन्मन्सं करोति—उन्मनीकरोति । एवं उन्मनी भवति, उन्मनी स्यात् । अनुच्चक्षुषम उच्चक्षुषं करोति—उच्चक्षुकरोति । एवम् उच्चक्षुभवति, उच्चक्षुस्यात् । अविचेतसं विचेतसं करोति—विचेतीकरोति । एवं विचेतीभवति, विचेती स्यात् । एवं विरहीकरोति, विरजीकरोति । एवमन्येऽपि । एभ्य इति किम् ? अपयः पयः करोति । कृभ्वस्तिस्विति किम् ? अनरुः अरुर्जायते ।

३४६. अभिव्याप्तौ सम्पद्यतौ च सातिर्वा ।

(विभाषा साति कात्स्न्र्ये । पा० ५.४.५२)
(अभिविधौ संपदा च । पा० ५.४.५३)

अभिविधिरभिव्याप्तिः तस्यामेकदेशेन सर्वात्मना वा गम्यमानायां साद्यतौ कृभ्वस्तिषु च प्रकृतेः सातिर्भवति वा पक्षे च्विरपि । वर्षासु लवणमुदकं सम्पद्यते—उदकसात् सम्पद्यते । वर्षासु लवणमुदकं करोति—उदकसात्करोति । वर्षासु लवणमुदकं भवति—उदकसात्भवति । वर्षासु लवणमुदकं स्यात्—उदकसात्स्यात् । पक्षे उदकी करोतीत्यादि । एवमन्येऽपि ।

३४७. स्वाम्यर्थायत्ते । (तदधीन वचने च । पा० ५.४.५४)

स्वामी अर्थो यस्यासौ स्वाम्यर्थः । स्वाम्यर्थात् शब्दादायत्ते गम्यमाने कृभ्वस्तिषु सम्पद्यतौ च सातिर्भवति । राजायत्तं करोति—राजसात्करोति । राजायत्तं भवति—राजसाद् भवति । राजायत्तं स्यात्, राजायत्तं सम्पद्यते, राजसात्सम्पद्यते ।

३४८. देये त्रा च । (पा० ५.४.५५)

चकारात सातिरायत्त इति वर्त्तते । देये आयत्ते चार्थे प्रकृतेः त्रासाती भवतः । कृभ्वस्तिषु सम्पद्यतौ च । देवाय देयं करोति—देवत्रा करोति, देवसात्करोति । देवाय देयं भवति—देवत्रा भवति देवसाद् भवति । देवाय देयं स्यात्—देवत्रा स्यात्, देवसात्स्यात् । देवाय देयं सम्पद्यते, देवत्रा सम्पद्यते, देवसात्सम्पद्यते । देवादिभ्यो द्वितीया सप्तमेभ्योः बहुलम् । देवान् करोति—देवत्रा करोति । देवेषु भवति—देवत्रा भवति । देवेषु स्यात्—देवत्रा स्यात् । देवान् गच्छति—देवत्रा गच्छति । देवेषु वति—देवत्रा वसति । मनुष्यान् करोति—मनुष्यत्रा करोति । मनुष्येषु वसति—मनुष्यत्रा वसति । पुरुषान् करोति पुरुषत्रा करोति । पुरुषेषु वसति—पुरुषत्रा वसति । मर्त्यान् करोति—मर्त्यत्रा करोति । मर्त्येषु वसति—मर्त्यत्रा वसति । बहून् करोति—बहुत्रा करोति । बहुषु वसति—बहुत्रा वसति इत्यादि—यथादर्शनं वेदितव्यम् ।

३४९. अव्यक्तानुकरणादनेकस्वरार्दनितौ डाच् ।

(अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच् । पा० ५.४.५७)

अव्यक्तस्यानुकरणम् अव्यक्तानुकरणम् । अनेकस्वराद् व्यक्तानुकरणादनितौ कृभ्वस्तिषु सम्पद्यती च डाच् प्रत्ययो भवति । यत्र ध्वनौ अकारादय वर्णा विशेषरूपेण न प्रतीयन्ते, स ध्वनिरव्यक्तस्तस्यानुकरणम् अव्यक्तानुकरणम् । अपटत् पटत् सम्पद्यते—पटपटासम्पद्यते । डाच्यव्याक्तानुकरणस्याभीक्ष्ये द्विवंचनम् । ततो डाचि निपातनात् अभ्यासान्तलोप: । अव्यक्तानुकरणादिति किं ? दृशत् करोति । अनेक-स्वरादिति किं ? स्रत् करोति । अनिताविति किं ? पटदिति करोति ।

३५०. द्वितीयतृतीयसम्ब (शम्ब) बीजेभ्य: कृषि विषये करोतौ ।

(कृञो द्वितीयतृतीयशम्बबीजात्कृषौ । पा० ५.४.५८)

एभ्य: कृषि विषये कृधातोर्योगे डाच् प्रत्ययो भवति । द्वितीयं कर्षं करोति—द्वितीयाकरोति । तृतीयं कर्षं करोति—तृतीयाकरोति । सम्बाकरोति, पुनस्तिर्यक् कर्षतीत्यर्थ: । बीजा करोति—बीजने सह कर्षतीत्यर्थ: ।

३५१. संख्यादेर्गुणात् । (संख्यायाश्च गुणान्ताया: । पा० ५.४.५९)

संख्यादेर्गुणशब्दात् कृषि विषये कृधातोर्योगे डाच् प्रत्ययो भवति । द्विगुणकर्षं क्षेत्रस्य करोति—द्विगुणा करोति क्षेत्रम् । त्रिगुणकर्षं क्षेत्रस्य करोति—त्रिगुणा-करोति क्षेत्रम् ।

३५२. समयाद् यापनायाम् । (समयाच्च यापनायाम् । पा० ५.४.६०)

समयशब्दात् यापनायां गम्यमनायां कृधातोर्योगे डाच् प्रत्ययो भवति । कर्तव्यस्यावसरप्राप्ति: समय: । समयस्य कालहरणं यापना । समया करोति, कालहरणं करोतीत्यर्थ: । यापनायामिति किं ? समयं करोति—शपथं करोतीत्यर्थ: ।

३५३. सपत्र निष्पत्राभ्यामितिव्यथने । (सपत्रानिष्पत्रादति व्यथने । पा० ५.४.६१)

सह पत्रेण—सपत्र: । निर्गतं पत्रमस्मादिति—निष्पत्रम् ।—अतिव्यथनम् अतिपीडनम् । अतिव्यथनेऽर्थे सपत्रनिष्पत्राभ्यां डाच् प्रत्यो भवयि । सपत्रा करोति शरीराच्छरमपरपार्श्वं निष्क्रामयतीत्यर्थ: । अति व्यथने इति किं ? वृक्षं सपत्रं करोति प्रावृट् । निष्पत्रं करोति ग्रीष्म: ।

३५४. निष्कुलान्निष्कोषणे । (पा० ५.४.६२)

निष्कुलशब्दात् निष्कासनेऽर्थे डाच् भवति । मध्यास्थितानामवयानां बहिर्निष्काषणम् । निष्कुला करीतिदाडिमम् । निष्कोषेण इति किं ? निष्कुलं करोति शत्रुम् ।

३५५. **प्रियसुखाभ्यामानुकूल्ये।** (सुखप्रियादानुलोम्ये। पा० ५.४.६३)

अनुकूलस्य भाव आनुकूल्यम्। तस्मिन्नर्थे वर्त्तमानाभ्यां प्रियसुखाभ्यां डाच् प्रत्ययो भवति। प्रियाकरोति, सुखाकरोति। गुर्वादेश्चित्तमाराधयतीत्यर्थः। आनुकूल्य इति किं? सुखं करोत्यौषधम्।

३५६. **दुःखात् प्रतिकूल्ये।** (दुःखात्प्रातिलोम्ये। पा० ५.४.६४)

दुःखशब्दात् प्रतिकूल्येऽर्थे डाच् प्रत्ययो भवति। गुर्वादेश्चित्तस्य पीडनं प्रतिकूल्यम्। दुःखाकरोति। प्रातिकूल्य इति किम्? दुःखं करोति कदन्नम्।

३५७ **शूलात् पाके।** (पा० ५.४.६५)

शूलशब्दात् पाकेऽर्थे डाच् प्रत्ययो भवति। शूले पचति मांसं शूला करोति। पाक इति किम्। शूलं करोति कदन्नम्।

३५८. **सत्यादशपथे।** (पा० ५.४.६६)

सत्य शब्दात् अशपथेऽर्थे डाच् प्रत्ययो भवति। सत्याकरोति, वणिक् भाण्डम् अवश्यं मया विक्रेतव्यमिति निश्चयं करोतीत्यर्थः। अशपथ इति किं? सत्यं करोति ब्राह्मणः।

३५९. **भद्रमद्राभ्यां वपने।** (मद्रात्परिवापणे। पा० ५.४.६७)

आभ्यां वपनेऽर्थे डाच् प्रत्ययो भवति। भद्रमद्रशब्दौ मङ्गले वर्त्तेते। भद्राकरोति, मंगलपूर्वकं मुण्डनं करोतीत्यर्थः। वपन इति किं? मद्रं करोति, भद्रं करोति।

(इति तमादि वृत्तिः)

३६०. **समासान्तगतानां वा राजादीनामदन्तता**

समासान्तगतानां राजादीनामदन्तता निपात्यते अत् प्रत्ययो वा अदन्तो वा येषामिति विग्रहः। अवयवावयवोऽपि समासस्यावयवः, तेनोपराजम्, अध्यात्मम्—अव्ययीभावाद् विभक्तीनामम्। द्विपुरी,—द्विगोर्नदादित्वादी। स्रक्—त्वचिनी—द्वन्द्वनिन्दितरोगेभ्य इतीम्। एवमन्येऽपि।

३६१, **राजन्नहन्सखि** (**राजाऽहस्सखिभ्यष्टच्**। पा० ५.४.९१)

राजान्नहन्सखि एभ्यस्तत्पुरुषे समासे अत् प्रत्ययो भवति। महांश्चासौ राजा चेति महाराजः। परमञ्च तदहश्चेति-परमाहः। देवानां राजा—देवराजः। राज्ञः सखा राजसखः। एवमन्येऽपि।

३६२. **गोरतद्धिताभिधेये।** (गोरतद्धितलुकि। पा० ५.४.९२)

अतद्धिताभिधेये गोशब्दात् अद् भवति। राज्ञो गौः राजगवः, परमगवः।

अतद्धिताभिधेये इति किं ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः। गोरप्रधानेत्यादिना ह्रस्वः।

३६३. उरः प्रधानार्थम्। (अग्राख्यामुरसः। पा० ५.४.९३)

प्रधानादुरशब्दाद् अत् प्रत्ययो भवति। अश्वानामुरः अश्वोरसम्, हस्त्युरसम् अश्वादीनां प्रधानमित्यर्थः प्रधानार्थमिति किम् ! अश्वोरः, अश्वानां वक्ष इत्यर्थः।

३६४. अनस्-अश्मन्-अयस्-सरस् जातिसंज्ञयोः।

(अनोश्मायस्सरसां जातिसंज्ञयोः रा० ५.४.९४)

एभ्यश्चतुर्भ्यो जातौ संज्ञायामाञ्चाद् भवति। उपगतमनः—उपानसं जातिः। महच्च तदनश्चेति—महानसं संज्ञाः। अमृतञ्च तदश्मां चेति—अमृताश्मो जातिः। लोहिताश्म इति संज्ञा। कालायसमिमिति जातिः लोहितायसमिति संज्ञा। मण्डूकस्य सरः मण्डूकसरसमितिः जातिः एवं। जलसरसमिति संज्ञा।

३६५. ग्रामकोटाभ्यां तक्ष्न्। (ग्राम कोटाभ्यां च तक्ष्णः। पा० ५.४.९५)

ग्रामकोटाभ्यां परात् तक्षन् शब्दाद् अद् भवति। ग्रामस्य तक्षा—ग्रामतक्षः, बहूनां साधारण इत्यर्थः। कुट्यां भव कौटः स चासौ तक्षा चेति—कौटतक्षः, स्वगृहस्थायी।

३६६. अतेः श्वन्। (अतेः शुनः। पा० ५.४.९६)

अतेः परात् श्वन्शब्दात् अद् भवति। श्वानमतिक्रान्तः अतिश्वा वराहः, जवन इत्यर्थः।

३६७. उपमानाद प्राणिनि (उपमानादप्राणिषु। पा० ५.४.९७)

अप्राणिनि विषये उपमानो यः श्वन् शब्दस्तस्माद् अद् भवति। आकर्षश्वेव—आकर्षश्वः अप्राणिनिति किम् ? व्याघ्रः श्वेव—व्याघ्रश्वा।

३६८. मृगपूर्वोत्तरेभ्यश्च सक्थि। (उत्तरमृगपूर्वाच्च सक्थ्नः। पा० ५.४.९८)

एभ्य उपमानेभ्यश्च सक्थि शब्दात् अद्भवति। मृगस्य सक्थि—मृगसक्थम्। पूर्वञ्च तत् सक्थिचेति, पूर्वसक्थम्, उत्तरसक्थम्।

३६९. अतद्धितार्थे द्विगोर्नोः। (नावो द्विगो, पा० ५.४.९९)

अतद्धितार्थे द्विगुसमास्य नौशब्दाद् अद्भवति। द्वे नावौ धनमस्य द्विनावधनम्। द्वयोर्नावोः समाहारः द्विनावम्। अतद्धितार्थं इति किम् ? पञ्चभिर्नौभिः क्रीत, पञ्चनौः।

३७०. अर्द्धाच्च। (पा० ५.४.१००)

अर्घात् परात् नौशब्दात् अद् भवति। अर्द्धं च तत् नौश्चेति—अर्द्धनावम्।

३७१. **वा खारी।** (खार्याः प्राचाम्। पा० ५.४.१००)

अर्द्धात् परात् अतद्धितार्थे द्विगुसमासस्य च खारीशब्दाद् अद्भवति वा। अर्द्धञ्च तत् खारी चेति-अर्द्धखारम्-अर्द्धखारी। द्वयोः खार्योः—द्विखारं, द्विखारी। द्विखारघनः, द्विखारी धनः पुत्रः। द्वाभ्यां खारीभ्यां क्रीतः—द्विखारी मेष इति। अभिधानात्तद्धितार्थे द्विगौ स्त्रीप्रत्ययस्य निवृत्तिः। यथा पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः। अतद्धितार्थ इत्यस्य व्यावृत्तिरत्र न सम्भवति।

१७२. **द्वित्रिभ्यामञ्जलिः।** (द्वित्रिभ्यांमञ्जलेः। पा० ५.४.१०२)

अतद्धितार्थे द्विगुसमासस्य द्वित्रिपूर्वाद् अञ्जलिशब्दात् अद्भवति वा। द्वयोरञ्जल्योः समाहारः-द्वयञ्जलं, द्वयञ्जलिः। एवं त्र्यञ्जलं त्र्यञ्जलि। प्रियास्य द्वयञ्जलप्रियः, द्वयञ्जलिप्रियः। एवं त्र्यञ्जलप्रियः। केचिदुत्तरदे द्विगोर्नेच्छन्ति। अतद्धितार्थ इति किम्? द्वाभ्यामञ्जलिभ्यां क्रीतः—द्वयञ्जलिः।

३७३. **जनपदाद् ब्रह्मन्।** (ब्राह्मणो जानपदाख्यायाम्। पा० ५.४.१०४)

जनपदवाचकाद् ब्रह्मन् शब्दात् अद्भवति। अवन्तिषु ब्रह्मा अवन्तिब्रह्मः। इह वा न वर्त्तते उतरत्र विकल्पनात्।

३७४. **कुमहद्भ्यां वा।** (कुमहद्भ्यामन्यतरस्याम्। पा० ५.४.१०५)

कुमहन्तपूर्वब्रह्मन्शब्दात् अद्भवति वा। कुत्सितो ब्रह्मा कुब्रह्मः, कुब्रह्मा। महाब्रह्मः, महाब्रह्मा।

३७५. **उक्तेषु स्त्रीत्वसम्भवे नदादौ दृष्टव्याः।**

एते अत्प्रत्यान्ता स्त्रियां वर्त्तन्ते चेत् तदा एतेभ्योः नदादित्वात् ईप्रत्ययो भवति, राजानमतिक्रान्ता—अतिराजीत्यादि। सम्भव इति किम्? अर्द्धनावम् अर्द्धखारम्।

३७६. **संख्याव्ययादङ्गुलिः।**

संख्याव्ययपूर्वाद् अङ्गुलिशब्दात् अद् भवति। द्वयोरङ्गुल्योः समाहारः—द्वयङ्गुलम्। द्वे अङ्गुलीप्रमाणमस्य—द्वयङ्गुलं दारु। निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अतिक्रान्तमङ्गुलिम्—अत्यङ्गुलम्।

२७७. **अहः सर्वैकदेश संख्यातपुण्यवर्षदीर्घादिभ्यश्च रात्रिः।**

अहरादिपूर्वात् रात्रिशब्दाद् अद्भवति संख्याव्ययोश्च। अहश्च रात्रिश्च अहोरात्रः। वचनादिह द्वन्द्वादपि। सर्वाञ्चासौ रात्रिश्चेति सर्वरात्रः। एवं पूर्व्वरात्रः, अपररात्रः। एकदेशे वर्त्तमानस्य पूर्वादिशब्दस्यैकदेशत्वात् कर्मधारयः। अन्यत्र पूर्वरात्रिः—अतिक्रान्तारात्रिरित्यर्थः। संख्याता चासौ रात्रिश्चेति—संख्यातरात्रः, एवं पुण्यरात्रः। वर्षाणां रात्रिः—वर्षारात्रः। दीर्घा चासौ रात्रिश्चेति दीर्घरात्रः

संख्याव्ययादि, द्वे रात्री समाहृते द्विरात्रम् । अतिक्रान्तो रात्रिम्—अतिरात्रः । सर्वादि-पूर्वात् 'अहन्' शब्दात् अद् भवति, न लोपो न भवति । सर्वाह्णः, पूर्वाह्णः । संख्याताद्वा—संख्याताह्णः, संख्याताहः । समाहारद्विगौ न लोप एव – द्व्यहः, त्र्यहः ।

३७८. **प्रागुक्तो विधिस्तत्पुरुष एव ।**

प्रागुक्तोविधिस्तत्पुरुषे समासेऽद्भवति । बहुव्रीह्यादौ न स्यात् । इन्द्रसखा । सख्युः समीपम् उपसखि । राजा च अहश्च सखा च—राजाहः सखायः ।

३७९. **पन्थ्यप्पुरः** (ऋक्पुरब्धूःपथामानक्षे । पा० ५.४.७४)

एभ्यः समासमात्रेऽद्भवति । स्थूलश्चासौ पन्थाश्चेतिस्थूलपथः । देवानां पन्थाः—देवपथः । विमला आपो यस्मिन्—विमलापं सरः । ललाटं पुरिव—ललाट-पुरम् ।

३८०. **धूरनक्षस्य** । (पा० ५.४.७४)

समासमात्रे धूरक्षशब्दाद् अद्भवति । राज्ञो धूः राजधुरा । महती चासौ धूश्चेति महाधुरा । अनक्षेति किम् ? अक्षसम्बन्धिनी या धूस्तस्या नभवति। अक्षस्यधूः अक्षधूः । दृढा ध्वरस्य —दृढधूः अक्षः ।

३८१. **ऋचः** । (पा० ५.४.७४)

ऋक् शब्दाद् अद् भवति समासमात्रे । अर्द्धञ्च तत् ऋक् चेति अर्द्धर्चः । सप्त ऋचो यस्यासौ—सप्तर्चः मन्त्रः ।

३८२. **नञ् बह्वादिश्च माणवकचरणयोः** ।

(नञस्तत्पुरुषात् । पा० ५.४.७१)

नञ् बहुपूर्वात् ऋच् शब्दात् अद् भवति । न विद्यते ऋग् यस्यासौ अनृचः माणवकः बह्वृचः ऋचो यस्यासौ बह्वृचः चरणः । माणवकचरणयोरिति किम् ? अनृकं साम, बह्वृकं सूक्तम् । शेषाद् वेति कप्रत्ययः ।

३८३. **प्रत्यन्वेभ्यः सामलोमनी** ।

(अच् प्रत्यवन्पूर्वात्सामलोम्नः । पा० ५.४.७५)

प्रति-अनु-अव पूर्वाभ्यां सामलोमशब्दाभ्याम् अद् भवति प्रतिसामम्, अनुसामम्, अवसामम् । प्रतिलोमम्, अनुलोमम्, प्रतिगतं साम इत्यादि यथा योगं प्रयोगपरिग्रहः ।

३८४. **अचक्षुरक्षि:** । (अक्ष्णोऽदर्शनात् । पा० ५.४.७६)

अचक्षुर्विषये अक्षिशब्दात् अद् भवति । लवणमक्षीव लवणाक्षम् । गवामक्षीव गवाक्षः । अचक्षुरिति किम् ? ब्राह्मणाक्षिः ।

३८५, **ब्रह्महस्तिराजपल्येभ्यो वर्च्चस्** । (ब्रह्महस्तिभ्यां वर्चसः । पा० ५.४.७८)

एभ्यः परात् वर्च्चस् शब्दात् अद् भवति । ब्रह्मणो वर्च्चः ब्रह्मवर्च्चसं, हस्तिवर्च्चसं, राजवर्च्चसं, पल्यवर्च्चसम् ।

३८६. **अन्धसमवेभ्यस्तमस्** । (अवसमन्धेभ्यस्तमसः । पा० ५.४.७९)

एभ्यः परात् तमस् शब्दात् अद् भवति । अन्धञ्च तत् तमश्चेति **अन्धतमसम्**। एवं सन्तमसम्, अवतमसम् ।

३८७. **श्वसोऽसीयस्** । (श्वसोवसीयः श्रेयसः । पा० ५.४.८०)

श्वस्पूर्वात् असीयस् शब्दाद् अद्भवति । श्वसोवसीयम् कल्याणमित्यर्थः ।

८८. **निसश्च श्रेयस्** । (पा० ५.४.८०)

चकारः श्वसोऽनुकर्षणार्थः । आभ्यां परात् श्रेयस्शब्दात् 'अद्' भवति । निश्चितं श्रेयः निःश्रेयसं निर्वाणम् । शोभनं श्रेयः निश्रेयसं कल्याणमित्यर्थः ।

३८९. **अन्ववतप्तेभ्यो रहस्** । (अन्ववतप्ताद्रहसः । पा० ५.४.८१)

एभ्यः परात् रहस् शब्दात् 'अद्' भवति । अनुरहसम्, अवरहसम् । तप्तमिव तप्तं, तप्तञ्च तत् रहश्चेति—तप्तरहसम् । यदनत्यं रहः केनचिन्नावगम्यते तदेवमुच्यते ।

३९०. **प्रतेरुरस् आधारश्चेत्** । (प्रतेरुरसः सप्तमीस्थात् । पा० ५.४.८२)

प्रतिपूर्वादुरस् शब्दात् अत् 'भवति' उरसि प्रवर्त्तते—प्रत्युरसं लोम । कारकार्येऽव्ययीभावः । आधार इति किम् ? प्रतिगतमुरः—प्रत्युरः ।

३९१. **अनुगवमायामवति** । (अनुगवमायामे । पा० ५.४.८३)

आयामो दैर्घ्यं तद्वति अनुगवमिति निपात्यते । गवामन्वायातं शकटम्—अनुगवं, यद्गोभिरुह्यते । आयामवतीति किम् । गवामनु पश्चात्—अनगु । पश्चादर्थेऽव्ययीभाव : ।

३९२. **उपसर्गादध्वनः** । (पा० ५.४.८५)

उपसर्गपूर्वादध्वन्शब्दात् अद्भवति । प्रगतोऽध्वानं-प्राध्वो रथः । प्रत्यध्वं शकटम् ।

३९३. **उदक्पाण्डुकृष्टेभ्यो भूमिः** । (कृष्णोदक्पाण्डुपूर्वाया भूमेरच् प्रत्ययः-स्मृत ।
(कारिका पा० ५.४.७५)

एभ्यः परात् भूमिशब्दात् अत् भवति समासमात्रे । उदाची भूमिर्यस्मिन्-स उदग्भूमः । एवं पाण्डुभूमः, कृष्टभूमः देशः ।

३९४. **संख्याया नदी गोदावर्यौ च।** (गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि। कारिका पा० ५.४.७५)

संख्या वाचकात् परात् नदीशब्दात् गोदावरीशब्दात् भूमिशब्दात् च 'अद्' भवति। पञ्चाना नदीनां समाहारः—पञ्चनदम्। एवं सप्तगोदावरम्। द्वे भूमी यस्य सः—द्विभूमः प्रासादः। नदीवाचकानां समाहारेऽव्ययीभाव इष्यते, अत एव नपुंसकत्वम्।

३९५. **उक्तेषु स्त्रीत्वसम्भवे स्त्रियामादा।**

कथितेषु अत्प्रत्ययान्तेषु स्त्रियां वर्तमानेषु स्त्रियामादा इत्यनेनाप्रत्ययो भवति, न तु ईप्रत्ययः। स्थूलपथा नगरीत्यादि।

३९६. **समाहारद्वन्द्वे चवर्गदषहान्तात्।** (द्वन्द्वाच्चुदषहान्तात् समाहारे। पा० ५.४.१०६)

समाहारद्वन्द्वे चवर्गान्तात् षान्तात् हान्ताच्चाद् भवति। चान्त—वाक्त्वचं, श्रीस्रजम्। दान्त—समिद्दृशदम्। षान्त—वाग्द्विषम्। हान्त—पीठच्छत्रो-पानहम्।

३९७. **इतोऽव्ययी भावः।** (अव्ययीभावे शरत्प्रभृतिभ्यः। पा० ५.४.१०७)
अस्मात् परात् अव्ययीभावसमासेऽद् भवति। उपशरदम् इत्यादि।

३९८. **शरद् विपाश्-अयस्-चेतस्-मनस्-उपानह्. दिवः संज्ञायाम्।** (पा० ५.४.१०७)

एभ्यः शरदादिभ्यः अव्ययीभावसमासेऽद् भवति। शरदः समीपम्—उप-शरदम्। एवम् उपविपाशम्, उपायसम्, उपचेतसम्, उपमनसम्, उपोपानहम्, (उपदिवम्) उपदिवम्।

३९९. **हिमवन्त द्विधा।** (गिरेश्च सेनकस्य। पा० ५।४.११२)

हिमवन्त-द्विधाशब्दाभ्याम् अव्ययीभावसमासेऽद् भवति। हिमवतः समीपम्—उपहिमवतम्। उपद्विधम्।

४००. **अनड्वाह-विश्-चत्वार-पद्-तवः।**

एभ्योऽव्ययीभावसमासेऽद् भवति। उपानड्हम्, उपविशम्, उपचतुरम्, उपपदम्, उपपदम्।

४०१. **जरा जरस्।**

जराशब्दादव्ययीभावसमासेऽद् भवति, जराया जरसादेशश्च उपजरम्।

४०२. **प्रतिसमन्वनुभ्योऽक्षि ।**

एभ्योऽक्षिशब्दाद् 'अत्' अव्ययीभावसमासे । अक्ष्णोराभिमुख्यं—प्रत्यक्षम् । अक्ष्णो समीपम्—समक्षम् । एवमन्वक्षम् ।

४०३. **उपश्वन् ।**

अनन्तेति वक्ष्यमाणेन सिद्धे नियमार्थः पाठः । अव्ययीभावसमासे उपादेव श्वन् शब्दात् 'अद्' भवति, नान्यस्मादिति । शुनः समीपम्—उपशुनम् । नियमः किम् ? अधिश्व ।

४०४. **सह रजस् ।**

अव्ययीभावसमासे सहपूर्वात् रजस् शब्दात् 'अत्' भवति । सह रजसा वर्त्तते—सहरजसं सरजसमभ्यवहरति । साकल्येऽव्ययीभावः ।

४०५. **अनन्त ।**

अव्ययीभावसमासेऽनन्ताद् 'अत्' भवति । आत्मन्यधि—अध्यात्मम्, राज्ञः समीपम्, उपराजम् ।

४०६. **नपुंसके वा ।**

अव्ययीभावसमासे नपुंसके लिङ्गादनन्तात् 'अद्' भवति वा । चर्म्मणः समीपम्—उपचर्म्मम्, उपचर्म ।

४०७. **घुडन्त ।**

अव्ययीभावसमासे घुडन्ताद् 'अद्' भवति वा । समिधः समीपम्—उपसमिधम्, उपसमित् । उपदृशदम्, उपदृशत् ।

४०८. **गिरिनदीपौर्णमासी आग्रहायणी ।**

एभ्योऽव्ययीभावसमासेऽद् भवति वा । गिरेः समीपम्—उपगिरम्, उपगिरि । एवम् उपनदम्, उपनदि । उपपौर्णमासम्, उपपौर्णमासि । उपाग्रहायणम्, उपाग्रहायणी । पक्षे नपुंसकलक्षणो ह्रस्व. ।

४०९. **इतो बहुव्रीहिः ।**

अस्मात् सूत्रादारभ्य बहुव्रीहि ज्ञेयः । तत्र वक्ष्यमाणः प्रत्ययो वेदितव्यः ।

४१०. **सक्थ्यक्षिणी स्वाङ्गे ।**

बहुव्रीहि समासे सक्थ्यक्षिशब्दाभ्यामद् भवति स्वाङ्गे, गम्यमाने । दीर्घे सक्थि अस्य दीर्घसक्थः । विशाले अक्षिणी अस्य-विशालाक्षः । स्वाङ्ग इति किम् ? दीर्घ-सक्थि शकटं, स्थूलाक्षिः इक्षुः ।

४११. दारुण्यङ्गुलिः ।

बहुव्रीहिसमासेऽङ्गुलिशब्दात् 'अत्' भवति दारुणि गम्यमाने । द्वे अंगुली यस्य—द्वयङ्गुलं, पञ्चाङ्गुलं दारुः ।

४१२ द्वित्रिभ्यां मूर्द्धन् ।

बहुव्रीहौ समासे आभ्यां परात् मूर्द्धन् शब्दात् 'अत्' भवति । द्वौ मूर्द्धानौ यस्य सः द्विमूर्द्धः । एवं त्रिमूर्द्धः ।

४१३. उक्तेषु स्त्रीत्व सम्भवे नदादित्वादी ।

उक्तेषु अत् प्रत्ययान्तेषु स्त्रीत्वसम्भवे नदादित्वादी प्रत्ययो भवति । दीर्घसक्थी, विशालाक्षी इत्यादि ।

४१४. पूरणी प्रमाण्यौ ।

बहुव्रीहि समासे स्त्रीपूरण्यन्तात् प्रमाणी शब्दात् च 'अत्' भवति । कल्याणी पञ्चमी यासां रात्रीणां, ताः कल्याणीपञ्चमाः रात्रयः । मुख्य पूरणी ग्रहणात् कल्याण पञ्चमीकः, पक्षः । स्त्री प्रमाणी येषां ते स्त्रीप्रमाणाः कुटुम्बिनः ।

४१५. अन्तर्बहिर्भ्यां लोम्नः ।

आभ्यां परात् लोमन् शब्दात् 'अत्' भवति बहुव्रीहौ समासे । अन्तर्गतानि लोमान्यस्य - अन्तर्लोमः । वहिर्गतानि लोमान्यस्य—बहिर्लोमः ।

४१६. नक्षत्रान्नेतुः ।

नक्षत्रवाचकपूर्व्वात् नेतृशब्दात् 'अत्' भवति बहुव्रीहिसमासे । मृगो नेता यासां—मृगनेत्राः रात्रयः । एवं पुष्यनेत्राः । नक्षत्रादिति किं ? देवदत्तनेतृकः । अत्रापि नेत्र शब्देन सिद्धे पूर्व्ववत् कबाधनार्थं वचनम् ।

४१७. नञ् सुव्युपत्रिभ्यश्चत्वारः ।

एभ्यश्चत्वार शब्दात् अत् भवति बहुव्रीहौ समासे । नास्य चत्वार्य्यक्षीणि विषयीणि भवन्ति—अचतुरः । शोभनान्यस्य चत्वार्यक्षाणि विषयीणि भवन्ति—सुचतुरः । विविधान्यस्य चत्वार्यक्षीणि विषयीणि भवन्ति—विचतुरः । चत्वारि इन्द्रियाणि समीपे एषाम्—उपचतुराः । त्रयो वा चत्वारो वा परिमाणमेषां—त्रिचतुराः ।

४१८. संख्यायाः नाभिः ।

बहुव्रीहौ समासे नाभिशब्दात् 'अत्' भवति संज्ञायाम् । पद्मं नाभावस्य—पद्मनाभः । एवं वज्रनाभः संज्ञायामिति किम् ? पद्मेन नाभिः—पद्मनाभिः ।

४१९. नञ्सुदुर्भ्यः सक्थि वा ।

एभ्यः सक्थि शब्दात् 'अत्' भवति वा बहुव्रीहौ समासे। न विद्यमानं सक्थ्यस्य—असक्थः, असक्थिः । सुसक्थः, सुसक्थिः । दुःसक्थः, दुःसक्थिः । राजादिराकृतिगणोऽयम् ।

४२०. संख्याया अबहोरन्तस्य स्वरादिलोपश्च ।

बहुव्रीहिर्वर्जितायाः संख्यायाः बहुव्रीहौ वर्त्तमानाया 'अत्' भवति, अन्त्यस्वरादिलोपश्च। पञ्चषट् परिमाणमेषां—पञ्चषः । उपगतादश एषाम्—उपदशाः। अबहोरिति किम् ? उपबहवः। तथा आकृतिगणत्वादेव ।

४२१. न किमः क्षेपे ।

निन्दायां यः किम् शब्दः तत्परात् राजादेः 'अत्' प्रत्ययो न भवति । कुत्सितो राजा—किं राजा, यो न रक्षति प्रजाः । क्षेपे इति किम् ? केषां राजा—किं राजाः ।

४२२. स्वति पूजाभ्यां प्राग्बहुव्रीहौ ।

आभ्यां राजादि शब्दात् 'अत्' प्रत्ययो न भवति, पूजायां बहुव्रीहिभिन्नसमासे । शोभनो राजा – सुराजा । अतिशयो राजा—अतिराजा । सुगौः । अतिगौः । स्वतिभ्यामिति किम् ? परमराजः। पूजायामिति किम्? अतिकान्तो राजानम्—अतिराजः। बहुव्रीहौ प्रागिति किम् ? शोभनं सक्थ्यस्य—सुसक्थः ।

४२३. नञस्तत्पुरुषे ।

नञस्तत्पुरुषे राजादिशब्दात् 'अत्' प्रत्ययो न भवति । न राजा—अराजा । एवम् - असखा । तत्पुरुष इति किम् ? न विद्यते पन्था यस्य अपथोऽयं देशः ।

४२४. पथो वा ।

नञस्तत्पुरुषे पन्थिशब्दात् 'अत्' भवति वा । नायं पन्थाः अपथम्, अपन्थाः । तत्पुरुष इति किं ? न विद्यते पन्था यस्य अपथोऽयं देशः ।

४२५. धेन्वनडुहादयश्च ।

धेन्वनडुहादयो निपात्यन्ते । धेनुश्च अनड्वांश्च—धेन्वनडुहौ। ऋक् च यजुश्च—ऋग्यजुषम् । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् इत्यादि ।

प्रणम्य रुद्रस्य हरेर्भवान्या वाण्या गणेशस्य च पादपद्मम् ।
तनोति रत्नेश्वर चक्रवर्ती राजादिवृत्तिं पठतां हिताय ॥

इति राजादयः समाप्ताः

४२६. **डावेरनुबन्धेऽन्त्यस्वरादेर्लोपः ।**

डानुबन्धे प्रत्यये परेऽन्त्यस्वरादेरवयवस्य लोपो भवति । चत्वारिंशतः पूरणः – चत्वारिंशः । एवं पञ्चाशः । सरसिजम्, जलजम् । सप्तमीपञ्चम्यर्थे जनेर्डः ।

४२७. **तेर्विंशतेरपि ।**

डानुबन्धे प्रत्यये परे विंशतेस्तेरपि लोपो भवति । विंशतेः पूरणः – विंशः ।

४२८. **इवर्णावर्णयोर्लोपः स्वरे प्रत्यये च ।**

इवर्णावर्णयोर्लोपो भवति तद्धिते स्वरे ये च प्रत्यये परे । आत्रेयः, द्रौणेयः, दाक्षिः, प्लाक्षिः, गांगेयः, गार्ग्यः, तुल्यः । पुनर्लोपग्रहणादव्ययानामन्त्यस्वरादेर्लोपो लक्षतः । सायं प्रातर्भवः—सायंप्रातिकः । एवं शौनसुनिकः बाह्यमित्यादयः ।

४२९. **नस्तु क्वचित् ।**

नकारस्य लोपो भवति क्वचिल्लक्ष्यानुरोधात् । औढ्लोमिः, आग्निशर्म्मिः । द्वे अहनी समाहृते—द्वयहः । एवं त्र्यहः ।

४३०. **उवर्णस्त्वोत्वमापाद्यः ।**

उवर्णस्त्वोत्वमापादनीयः तद्धिते स्वरे ये च प्रत्यये परे औपगवः बाभ्रव्यः ।

४३१. **एयेऽकद्रुवास्तु लुप्यते ।**

उवर्णस्तु एये प्रत्यये परे लुप्यते न तु कद्रूशब्दस्य । कामण्डलेयः, माद्रबाहेय। अकद्रुवा इति किम् ? काद्रवेया नागाः ।

४३२. **कार्य्यावावावादेशावोकारौकारयोरपि ।**

उकारौकारयोः स्थानेऽवावादेशौ कार्य्यौ तद्धितस्वरे च प्रत्यये परे । औपगवः, गव्यं, नाव्यम् ।

४३३. **वृद्धिरादौ सणे ।**

स्वराणां मध्ये आदौ स्वरस्य वृद्धिर्भवति । सणकारानुबन्धे ताद्धिते प्रत्यये परे । शैवः, औपगवः, कार्पण्यम् । कथं वाशिष्ठ ? आदावित्याकार प्रश्लेषात् । क्वचिदधिकारादुत्तरपदस्यापि (लक्ष्यते) लक्षत्यः । अवयवादृतूनां—पूर्व्ववार्षिकम्, अपरहैमन्तम् । वर्षैकदेशो हेमन्तैकदेशो—वर्षाहेमन्तौ । सुसर्व्वार्द्धेभ्यो जनपदस्य च । सुपाञ्चालकः, सर्व्वपाञ्चालकः, अर्द्धपाञ्चालकः । क्वचिदुभयपदस्यापि—सौभाग्यं, सौहार्दम् । शक्तुप्रधानाः सिन्धवः शक्तुसिन्धः, तत्र भवः—शाक्तुसैन्धवः । एवमन्येऽप्यनुसर्त्तव्याः ।

४३४. **न य्वोः पदाद्योर्वृद्धिरागमः ।**

इह प्रतिषेधो विधिश्च गम्यते । आदिशब्दः समीपवचनः । पदस्याद्योर्यकारवकारयोः समीपे वृद्धिर्न भवति, तयोश्चादौ वृद्धिरागमो भवति, स च सणकारानुबन्धे तद्धिते प्रत्यये परे। स्थानेऽन्तरतम् इति न्यायात् यकारस्यैकारः, वकारस्यौकारः — व्यवसने भवो वैयसनः । व्युदषस्यापत्यं—वैदुषयः (वैदुष्य): । स्वश्वस्यापत्यं— सौवश्विः । व्याकरणं वेत्ति अधीते वा – वैयाकरणः । य्वो समीप इति किं ? दाध्यश्वि, माध्वश्वि । तन्निमित्तो वृद्धिरागमो न स्यात् । पुनर्वृद्धिग्रहणं वृद्धनाद् वृद्धिरिति ज्ञापनार्थम् । क्वचिदधिकाराद्द्वारादीनाञ्चापनाद्योरपि वृद्धिप्रतिषेधो वृद्धिरागमश्च स्यात् । दौवारिकः । द्वार द्वारपाल स्वर व्यल्कस स्वस्ति स्वर्गमन स्फयकृत, स्वादुमृदु श्वन् स्व एवमन्येऽपि ।

इति दौर्गसिंह्यां वृत्तौ चतुष्टये तद्धितः पादः समाप्तः

कलाप व्याकरणम्

आख्यात-वृत्तिः

प्रथमः पादः

१. **अथ परस्मैपदानि ।**

अथानन्तराणि त्यादीनि स्यामहिपर्यन्तानि परस्मैपदसंज्ञकानि भवन्ति । "नव पराण्यात्मने" इत्युक्ति बाधया पूर्वाणि नवैव वचनानि सर्वासां विभक्तिनामिति । अर्थस्य विभञ्जनाद् विभक्तय इति । ति, तस्, अन्ति, सि, थस्, थ, मि, वस्, मस् । एवं सर्वत्र । परस्मैपदप्रदेशाः—"शेषात् कर्त्तरि परस्मैपदम्" इत्येवमादयः ।

२. **नव पराण्यात्मने ।**

अथ पराणि नव वचनानि आत्मनेपद संज्ञकानि भवन्ति । पदानीति गम्यते । ते, आते, अन्ते, से, आथे, ध्वे, ए, वहे, महे, । एवं सर्वत्र । आत्मनेपदप्रदेशाः— "आत्मनेपदानि भावकर्मणो" रित्येवमादयः ।

३. **त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।**

परस्मैपदानामात्मनेपदानाञ्च त्रीणि त्रीणि वचनानि प्रथममध्यमोत्तम-संज्ञकानि भवन्ति यथासंख्यम् । ति, तस्, अन्ति इति प्रथमः । सि थस्, थ इति मध्यमः । मि, वस्, मस्, इत्युत्तमः । ते, आते, अन्ते, इति प्रथमः । से, आथे, ध्वे इति मध्यमः । ए, वहे, महे इत्युत्तमः । एवं सर्वत्र । संज्ञाप्रदेशाः—'नाम्नि प्रयुज्य-मानेऽपि प्रथमः', 'युष्मदि मध्यमः', अस्मद्युत्तमः' इत्येवमादयः ।

४. **युगपद्वचने परः पुरुषाणाम् ।**

युगपदेककालार्थः । युगपदवचने एकक्रियाकालाभिधाने पुरुषाणां मध्ये यः परः स भवति । स च त्वञ्चाहञ्च पचामः । स च त्वञ्चाहञ्चापाक्ष्म: । स च त्वञ्चा-हञ्च पक्ष्यामः । वचनमतन्त्रम् । स च त्वञ्च पचथः । त्वञ्चाहञ्च पचावः । 'युगपद्वचने' इति किम् ? स पचति, त्वं पक्ष्यसि, अहमपाक्षमिति भिन्नकालोक्तौ वयमपाक्षेति भाभूत् । वचनग्रहणं युगपद्विषये मा भूत् । स पचति, त्वं पचसि, अहं पचामि, पचामीत्येवं प्राप्नोति । अप्रवृत्तौ पर्याये वा प्राप्ते परिभाषयेम् ।

५. **नाम्नि प्रयुज्यमानेऽपि प्रथमः ।**

नाम्नि प्रयुज्यमानेऽप्रयुज्यमानेऽपि प्रथमः पुरुषो भवति । स पचति, तौ पचतः, ते पचन्ति, स पचते, तौ पचेते, ते पचन्ते । एवं पच्यते घटः, पच्येते घटौ, पच्यन्ते घटाः । अप्रयुज्यमानेऽपि—पचति: पचतः, पचन्ति । एवं सर्वत्र । प्रयुज्यमान-ग्रहणं किं ? धातुना युक्ते यथा स्यात् । तेन—देवदत्तेन हन्यसे त्वं, मध्यम एव युष्मद् योगात् ।

६. **युष्मदि मध्यमः ।**

युष्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि मध्यमः पुरुषो भवति । त्वं पचसि, युवां पचथः, यूयं पचथ । अप्रयुज्यमानेऽपि—पचसि, पचथः, पचथ । एवं सर्वत्र । अप्रयुज्यमाने किं ? त्वया पच्यते ओदनः ।

७. **अस्मद्युत्तमः ।**

अस्मदि प्रयुज्यमानेऽपि उत्तमः पुरुषो भवति । अहं पचामि, आवां पचावः, वयं पचामः । अप्रयुज्यमानेऽपि—पचामि, पचावः, पचामः । एवं सर्वत्र । अत्वं त्वं सम्पद्यते, अनहमहं सम्पद्यते, त्वद्भवति, मद्भवति इति भवितव्यमेव युष्मदस्मदो-र्गौणत्वात् । त्वन्मदी तु शब्दमात्राश्रयत्वात् । एहि मन्ये रथेन यास्यासि यातस्ते पितेति स्वविषय एव मध्यमोत्तमौ ।

८. **अदाब्दाधौ दा ।**

दाप्दैपौ वर्जयित्वा दाधारित्येतौ दा-संज्ञकौ भवतः दीयते, धीयते । अदाविति किं ? दायन्ते व्रीहयः, निदायन्ते भाजनानि । पकारोऽयं गणे प्रतिषेधार्थ एव निर्दिश्यते ।

९. **क्रियाभावो धातुः ।**

यः शब्दः क्रियां भावयति, प्रतिपादयति स धातुसंज्ञो भवति । भवति, अस्ति, जुहोति, दीव्यति, सुनोति, तुदति, रुणद्धि, तनोति, क्रीणाति, चोरयति (चिन्तयति) । क्रियत इति क्रिया साध्यमुच्यते, सा च पूर्वापरीभूतावयवैव । कथं तर्हि अस्ति, नश्यति, श्वेतते प्रासादः, संयुज्यते, समवैति, सत्ता नित्यता अभावो नाशः, श्वेत-संयोगावपि गुणौ समवायोऽप्ययर्यान्तररम् ? सत्यमिह्हि साधनायत्तोदयं सर्वमतस्तद-धीनतया सिद्धमपि क्रियात्वेनावभासते क्रियाकारकव्यवहृतेर्बुद्धयवस्थानिबन्ध-नात् । तथा गडि वदनैकदेशे, विदि अवयवेऽपि । अङ्कुरो जायत इति जन्म चाभूतप्रादुर्भाव एव अथवा जायते—विशेषेणोपलभ्यते अतोऽङ्कुरस्य कर्तृत्वम् । तथोचोक्तम्:—

> यावत् सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते ।
> आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ।।

धातुप्रदेशा धातोश्च हेताविस्येवमादयः ।

१०. काले ।

'काले' इति सप्तम्यन्तमनुकृतम् । 'काले' इत्यधिकृतं वेदितव्यम् । तेन साधने वर्त्तमानेऽतीते भविष्यति च न स्यात् । ग्रामं गतो गमिष्यति चायं देवदत्तः, रामो वनम गच्छत्, बलिरिन्द्रो भविष्यति । वर्त्तमानादिभिः किं धातोर्विशेषणं द्रव्यस्य वेति सन्देहोऽयमधिकारः । नित्यो व्यापी सम्प्रतिभूतभविष्यत् क्रियायोगादाकाशकल्प एको द्रव्यस्थो भिद्यते कालः ।

११. सम्प्रति वर्तमाना ।

सम्प्रति काले वर्त्तमाना विभक्तिर्भवति । पचति, यजते, स्वसंज्ञैव कालो विशिष्यते । सम्प्रतीति किं । तस्थुः, स्थास्यन्ति गिरयः ।

१२. स्मेनातीते ।

स्मेन शब्देन योगेऽतीते काले वर्त्तमाना विभक्तिर्भवति । दहति स्म त्रिपुरं हरः, इति स्म जन कथयति । अतीतविषयाणां बाधकोऽयम् ।

१३. परोक्षा ।

अतीतकाले परोक्षा विभक्तिर्भवति । जघान कंसं किल वासुदेवः । कटं चक्रे देवदत्तः ।

१४. भूतकरणवत्यश्च ।

भूतः कालः करणम्, तद् विद्यते यासामिति पारिशेष्याद् ह्यस्तन्यद्यतनीक्रियातिपत्तय एव रूढाः । एता भूतकरणवत्यस्तिस्रो विभक्तयोऽतीते काले भवन्ति । अकरोत्, अकार्षीत्, अकरिष्यत् ।

१५. भविष्यति भविष्यन्त्याशीः श्वस्तन्यः ।

भविष्यति काले भविष्यन्त्याशीः श्वस्तन्यास्तिस्रो विभक्तयो भवन्ति । कटं करिष्यति, शत्रुं वध्यात्, ओदनं भोक्ता ।

१६. तासां स्वसंज्ञाभिः कालविशेषः ।

तासां वर्त्तमानादीनां स्वसंज्ञाभिः कालस्य विशेषो ज्ञेयः । तेन वर्त्तमाने काले वर्तमानेति, वर्तत इति वर्त्तमानः, प्रारम्भोऽपरिसमाप्तिः, मासं न खादति, इह कुमाराः क्रीडन्ति, तिष्ठन्ति पर्वताः, कदा आगतोसि, एष आगच्छामि । कदा गमिष्यसि, एष गच्छामि । परोक्षेऽतीते काले परोक्षेति, अक्षाणां परं परोक्षम्, इन्द्रियाणामविषय इत्यर्थः । कथं सुप्तोऽहं किल विललाप, मत्तोऽहं किं विचचार, चित्तस्य विक्षेपणात् । नाहं कलिङ्गं जगाम इति गमनदोषभयात् प्रत्यक्षमप्यह्नुते परोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनयोगत्वात् । परोक्षस्याविवक्षायां ह्यस्तन्यपि—

अयजत्, इयाज। सतोऽपि चाविवक्षा, यथा—यदा अनुदरा कन्येति। ह्यस्तेनऽतीते काले ह्यस्तनी, ह्यो भवः कालो ह्यस्तनः। अद्य ह्यो वा अभुंक्ष्महीति व्यामिश्रे सन्निधानादद्यतनी। अद्यतनेऽतीते मात्रेऽद्यस्तनी। अद्यभावोऽद्यतनः—आ न्यायादुत्थानादा न्यायाच्च संवेशनादहः। उभयतोऽर्द्धरात्रं वा लोकतः सिद्धम्। कथममुत्रावात्सं सकलां रात्रिं जागरितो रात्रेरप्रभातत्वादद्यतनमिव कालं मन्यते? यो मुहूर्त्तमपि सुप्तः, सोऽनद्यतनं जानन् अमुत्रावसमित्याह। अगमाम घोषान्, अपाम पय इति ह्यस्तनस्याविवक्षैव ह्यो ऽगमाम घोषानिति पदार्थह्यस्तेन ह्यस्तनी, न वाक्यार्थ इति मतम्। क्रियातिपत्तावतीते काले क्रियातिपत्तिरिति। एधांश्चेदलप्स्यत, ओदनमपक्ष्यत्। भविष्यति क्रियातिपतने भविष्यन्त्येव, भविष्यत्काले भविष्यन्ती भविष्यत्कालस्य भविष्यद्विशेषणात्। अद्य श्वो वा गमिष्यतीति श्वस्तनीमपि बाधते। आशीयुंक्ते भविष्यति काले आशीः। अनागतस्येष्टार्थस्य लाभेनाविष्करणमाशीः। अर्थात् भविष्यद् विषय व, यदस्या भविष्यद् विधानं तत्सुखप्रतिपत्त्यर्थम्। श्वो भवः कालः, श्वस्तनः स चार्थाद् भविष्यन् यस्या भविष्यद्विधानं तत्सामान्यभविष्यत्प्रतिपत्त्यर्थम्। श्वो गमिष्यति मासेन गमिष्यतीति पदसंस्कारात्। अन्वर्थसंज्ञाया: प्रायोवृत्तित्वात् सङ्करः स्यादिति परिभाषेयम्।

१७. **प्रयोगतश्च।**

प्रयुज्यत इति प्रयोगः। प्रयोगादवधेः कालस्य विशेषो ज्ञेयः। अर्थात् पदान्तरसम्बन्धे। यावद्भुंक्ते ततो व्रजति, भविष्यत्तावगम्यते। भविष्यन्तीविवक्षायान्तु यावच्छब्दस्याप्रयोग एव। अधीष्व माणवक, पुरा विद्योतते विद्युत्। क्षिप्रं कुरु कटं, पुरा गच्छसि ग्रामम्। वर्त्तमान समीप्यस्य तद्ग्रहणेन ग्रहणम्, पुराशब्दाद् पुरशब्दात् भविष्यदवगमे सति, तदा तस्य वर्त्तमानता। कदा कर्हि योगे वर्त्तमानाभविष्यन्तीश्वस्तन्यः—कदा भुंक्ते कदा भोक्ष्यते, कर्हि भोक्ता। भविष्यति परोक्षादयोऽपि—कदा बुभुजे, कदा भुक्तः, कदा भुक्तवान्। तथा किमो विभक्तिडतरडतमान्तस्य प्रयोगे लिप्सायां गम्यमानायां भविष्यति सामान्ये—को भवतां भिक्षां ददाति दास्यति दाता वा कतरो भवतां, कतमो भवतां भिक्षां ददाति दास्यति काता वा। भूतविहिता अपि दृश्यते—को भवतां पाटलिपुत्रमगच्छत्, अगमदिति वा। तथा लिप्स्यमानात् सिद्धावपि—यो भवतां भिक्षां ददाति दास्यति। दाता वा, स स्वर्गलोकं याति, यास्यति, याता वा। यो भवतां भिक्षामदात्, स स्वर्गलोकमगमदिति। एवमन्येऽप्यनुसर्त्तव्याः।

१८. **पञ्चम्यनुमतौ।**

कर्त्तुमिच्छतोऽनुज्ञा अनुमतिः, सा च वर्त्तमानभविष्यद्विषयैव। अनुमतौ वर्त्तमानाद्धातोः पञ्चमी भवति। एवं कुरु, तृणां छिन्धि, भजक्षमां, कुरु दयाम्।

१९. **समर्थनाशिषोश्च ।**

परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना, इष्टार्थस्याशंसनमाशीः । समर्थनाशिषोश्च वर्त्तमानाद्धातोः पञ्चमी भवति । पर्वतमप्युत्पाटयानि, समुद्रमपि शोषयाणीति । कश्चिद् आह—समुद्रः शोषयितुमशक्यः, स आह—समुद्रमपि शोषयाणीति समर्थयति मतमस्य । आशिषि च – जीवतु भवान्, नन्दतु भवान् । अपि शिरसा पर्वतं भिन्द्यात्, अपि सिञ्चेन्मूल सहस्रमिति विधौ सप्तमी, अपि शब्दोऽत्र सम्भावने वर्त्तते, प्रयोगतश्चेति सिद्धम् । नन्विष्टार्थस्याशंसनमपि प्रार्थनमेव ? सत्यमाशीर्विभक्तया बाधिता पञ्चमी यथा स्यादिति वचनम् ।

२०. **विध्यादिषु सप्तमी च ।**

विध्यादिषु वर्त्तमानाद्धातोः सप्तमी भवति पञ्चमी च । विधिरज्ञातज्ञापनमेव । कटं कुर्यात्, कटं करोतु भवान् । यत्र प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम् । इह भुञ्जीत, इह भुङ्क्तां भवान् । यत्र प्रत्याख्याने कामचारस्तदामन्त्रणम् । इहासीत् । इहास्तां भवान् । सत्कारपूर्वकोऽव्यापारोऽध्येषणम् । माणवकमध्यापयेत्, अध्यापयतु भवान् । निरूपणा सम्प्रश्नः ! किन्नु खलु भो व्याकरणमधीयीय, उत छन्दोऽधीयीय, किन्नु खलु भो व्याकरणमध्ययै, उत छन्दोऽध्ययै । याच्ञा प्रार्थना । लभेय भिक्षां देहि मे भिक्षाम् । प्रैष्यप्राप्तकालयोरपि पञ्चमी सप्तमी च स्यादेवेति मतम् । प्रेषितस्त्वं ग्रामं गच्छेः (प्रेषितस्त्वं ग्रामं गच्छ) प्राप्तस्ते कालः कटकरणे—कटं कुर्यात्, कटं करोतु भवान् । कथं विदध्यात् निमन्त्रयेत, आमन्त्रयेत, अधीच्छेत्, संपृच्छेत, प्रार्थयेत ? कृत्यरूपेषु विध्यादिषु तयोर्विधानात् यदा तु प्रकृत्यर्थस्य न, कर्त्तव्यता, तदा विदध्यातीत्यादयः सिद्धाः ।

२१. **क्रियासमभिहारे सर्वकालेषु मध्यमैकवचनं पञ्चम्याः ।**

क्रियायाः समभिहारः पौनः पुन्यं भृशार्थो वा । क्रियासमभिहारे वर्त्तमानाद्धातो सर्वकालेषु मध्यमैकवचनं भवति पञ्चम्याः । लुनीहि लुनीहीत्येवायं, लुनाति, लुनीतः, लुनन्ति, लुनासि, लुनीथः, लुनीथ, लुनामि, लुनीवः, लुनीमः । अलुनात्, लविष्यति । अधीष्व अधीष्व इत्येवायम्. अधीते, अध्यैत, अध्यैष्यत् । सर्वक्रियाकालेष्विति वचनात् संख्यादिविशेषो न गम्यत इत्यनुप्रयोगः । प्रत्यासत्तेस्तेनैव धातुना कारकेणेति सुखार्थमेवेदम्, अन्यथा एवमसौ त्वरावान् यदन्यामपि प्रेरयन्, क्रियां करोतीति विवक्षया सिद्ध्यति । तथा लुनीत लुनीत इत्येवायं यूयं लुनीथ । अधीध्वम् अधीध्वम् इत्येवायं, यूयमधीध्वे । तथा राष्ट्रमट, मठमठ, खदूरमट, स्थाल्यपिधानमट इत्येवायम्, अटतीत्यादयो विवक्षा ।

२२. **मा योगे ऽद्यतनी ।**

माशब्देन योगे धातोरद्यतनी भवति । मा कार्षीत्, मा भवान् पाक्षीत् । कथं

मा भवतु तस्य पापं, मा करिष्यतीति ? निरनुबन्धग्रहणातु ङानुबन्धमायोगे न स्यादिति केचित् वर्त्तमानभविष्यद्विषयाणां बाधकोऽयम् ।

२३. **मास्म योगे ह्यस्तनी च ।**

मास्म शब्देन योगे धातोर्ह्यस्तनी भवति, चकाराद्यतनी च । मास्म करोत्, मास्म कार्षीत् । ह्यस्तेऽपीच्छन्ति केचित्—स्म करोन्मा । पृथग्योगात् केवल-मायोगे न स्यात् ।

२४. **वर्त्तमाना ।**

ति, तस्, अन्ति; सि, थस्, थ; मि, वस्, मस् । ते आते, अन्ते; से, आथे, ध्वे; ए, वहे, महे । इमानि वचनानि वर्तमानसंज्ञकानि भवन्ति । वर्त्तमानाप्रदेशाः— "सम्प्रति वर्त्तमाने' इत्येवमादयः ।

२५. **सप्तमी ।**

यात्, याताम्, युस्; यास् यातम्, यात्; याम्, याव्, याम । ईत्, ईयाताम्, ईरन्; ईथाम्, ईयाथाम्; ईध्यम । ईय, ईवहि; ईमहि, इमानि वचनानि सप्तमी संज्ञकानि भवन्ति । सप्तमी प्रदेशाः—विद्यादिषु सप्तमी चे" त्येवमादयः ।

२६. **पञ्चमी ।**

तु, ताम्, अन्तु; हि तम्, त; आनि, आव, आम । ताम, आताम्, अन्ताम्; स्व, आथाम्, ध्वम्; ऐ, आवहै, आमहै । इमानि वचनानि पञ्चमी संज्ञकानि भवन्ति । पञ्चमी प्रदेशाः –"पञ्चम्यनुमता" वित्येवमादयः ।

२७. **ह्यस्तनी ।**

दि, ताम्, अन्; सि, तम्, त; अम्, व, म । त, आताम्, अन्त; थास्, आथाम्; ध्वम्, इ, वहि, महि । इमानि वचनानि ह्यस्तनी संज्ञकानि भवन्ति । ह्यस्तनी प्रदेशा "मास्मयोगे ह्यस्तनी चे" त्येवमादयः ।

२८. **एवमेवाद्यतनी ।**

एवमेवाद्यतनी संज्ञकानि भवन्ति । अद्यतनी प्रदेशाः "मायोगेऽद्यतनी" त्येवमादयः ।

२९. **परोक्षा ।**

अट्, अतुस्, उस्; थल्, अथुस्, अ; अट्, व, म । ए, आते, इरे; से, आथे, ध्वे; ए, वहे, महे । इमानि वचनानि परोक्षा संज्ञकानि भवन्ति । परोक्षाः प्रदेशाः— "परोक्षे" त्येवमादयः ।

३०. श्वस्तनी ।

ता, तारौ, तारस्: तासि, तास्थस्, तास्थ, तास्मि, तास्वस्, तास्मस् । ता, तारौ, तारस्; तासे, तासाथे, ताध्वे; ताहे, तास्वहे, तास्महे । इमानि वचनानि श्वस्तनी संज्ञकानि भवन्ति । श्वस्तनीप्रदेशा "भविष्यति भविष्यन्त्याशी श्वस्तन्य" इत्येवमादयः ।

३१. आशीः ।

यात्, याताम्, यासुस्; यास्, यास्तम्, यास्त; यासम्, यास्व, यास्म । सीष्ट, सीयास्ताम्, सीरन्; सीष्ठास्, सीयास्ताम्, सीध्वम्; सीय, सीवहि, सीमहि । इमानि वचनानि आशीः संज्ञकानि भवन्ति । आशीः प्रदेशा—"आशीषि च परस्मै" इत्येवमादयः ।

३२. स्यसंहितानि त्यादीनि भविष्यन्ती ।

स्यति, स्यतस्, स्यन्ति; स्यसि, स्यथः, स्यथ; स्यामि, स्यावस्, स्यामस् । स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे । धातो पराणि स्येन संहितानि भविष्यन्ती संज्ञकानि भवन्ति । भविष्यन्ती प्रदेशा "भविष्यति—भविष्यन्त्याशीः श्वस्तन्य" इत्येवमादयः ।

३३. द्यादीनि क्रियातिपत्तिः ।

स्यत्, स्यताम्, स्यन्; स्यस्, स्यतम्, स्यत; स्यम्, स्याव, स्याम । स्यत, स्येताम्, स्यन्त; स्यथास्, स्येथाम्, स्यध्वम्; स्ये, स्यावहि, स्यामहि । धातो पराणि स्येन संहितानि, द्यादीनि क्रियातिपत्ति संज्ञकानि भवन्ति । क्रियातिपत्तिप्रदेशा—"अट् धात्वादिह्यस्तन्यद्यतनी क्रियातिपत्तिष्वि" त्येवमादयः । एताः पूर्वाचार्य-प्रसिद्धाः अन्वर्था इह ज्ञापयन्ते ।

३४. षडाद्याः सार्वधातुकम् ।

षण्णां विभक्तिनामाद्या वर्त्तमाना-सप्तमी-पञ्चमी-ह्यस्तन्यश्चतस्रो विभक्तयः सार्वधातुकसंज्ञा भवन्ति । सार्वधातुकप्रदेशा, "जुहोत्यादीनां सार्वधातुके" इत्येव-मादयः ।

इति दौर्गसिंह्यां वृत्ताख्याते प्रथमः पादः समाप्तः

तृतीयः पादः

३५ प्रत्ययः परः ।

प्रतीयते येनार्थः स प्रत्यय इति रुढ़िः । (यथा) प्रत्ययात् प्रथमं क्रियते इति प्रकृतिः । प्रकृतेः परः प्रत्ययो वेदितव्यः । वृक्षः, अश्वकः, धावकः, खट्वा, औपगवः, कारकः, जुगुप्सते, गोपायति, कर्त्ता, कर्तव्यः । अनियमे प्राप्ते परिभाषेयं, विध्यङ्गशेषभूता वा ।

३६. गुप्-तिज्-किद्भ्यः सन् ।

गुप-तिज्-किद्भ्यः सन् परो भवति स्वार्थे । जुगुप्सते माम् । तितिक्षते तपस्तापसः । विचिकित्सति मे मनः । चिकित्सत्यातुरं वैद्यः । रिपुं चिकित्सति । चिकित्स्यानि क्षेत्रे तृणानि, "गुपो वधेश्च निन्दायां क्षमायाञ्च तथा तिजः । संशये च प्रतीकारे कित सन्नभिधीयते " अकारोच्चारणं किम् ? "स्वरादेर्द्वितीयस्ये" ति द्विवचनार्थं, तेनार्थान् प्रतीषिषति ।

३७. मान-बध-दान-शान्भ्यो दीर्घश्चाभ्यासस्य ।

मानादिभ्यः सन् परो भवति स्वार्थे दीर्घश्चैषामभ्यासस्येतो भवति । मीमांसते, बीभत्सते, दीदांसते, शीशांसते । अभ्यासविकारेष्वपवादो नोत्सर्गं बाधते । कथमवदानं, निशानमिति ? द्यते श्यतेश्च युटा सिद्धम् । चौरादिकेन —मानः, मानयति । दान् शान् उभयं, कित् परस्मै ।

३८. धातोर्वातुमन्तादिच्छतिनैककर्त्तृकात् ।

वा तुमन्तो यस्येति विग्रहः । वा तुमन्ताद्धातोरिच्छतिनैककर्त्तृकात् सन् परो भवति । कर्तुमिच्छति—चिकीर्षति, भोक्तुमिच्छति—बुभुक्षते । सनो द्योतितत्वादिषेरप्रयोगः । केचित् "सनि चानिटि" ति ज्ञापकात् तुम्विषयादित्याहुः । धातोरिति किम् ? प्राचिकीर्षत् । तुमन्तादिति किम् ? भोजनमिच्छति । इच्छायामिति सिद्धे एककर्त्तृकादितिस्पष्टार्थम् । इच्छासनन्तात् सन्न भवति स्वात्मनि क्रिया विरोधात् । कथं नदीकूले पिपतिषति, श्वा मुमूर्षति ? यथा वाक्यं तथेदं विवक्षयेति मतम् ।

३९. नाम्न आत्मेच्छायां यिन् ।

नाम्न आत्मेच्छायामर्थे यिन् परो भवति । पुत्रमिच्छति पुत्रीयति । एवं घटीयति । आत्मशब्दोऽत्रआत्मेध्यात्मवचन एव, मन्दधियां सुखार्थः । भ्रातुः पुत्रमिच्छति, आत्मनः, पुत्रमिच्छति, महान्तं पुत्रमिच्छतीति सापेक्षत्वात् । भ्रातृपुत्रीयतीति युक्तार्थत्वात् । इच्छया नाम्नः सम्बन्धात् दात्रेणेच्छतीत्यकर्मणो स्यात् सापेक्षत्वाद् वा । व्यवस्थितवास्मरणान्—मान्ताव्ययाभ्यां न स्यात्—किमिच्छति, स्वरिच्छति ।

४०. काम्य च ।

नाम्न आत्मेच्छायामर्थे काम्यः परो भवति चकाराद् यिश्च । एतच्चोत्तरा-

र्थमेवानन्तरः काम्यो माभूदिति । पुत्रमिच्छति—पुत्राकाम्यति । इदं काम्यति । स्वः काम्यति ।

४१. उपमानादाचारे ।

उपमानान्नाम्न आचारेऽभिधेये यिन् परो भवति । पुत्रमिवाचरति-पुत्रीयति माणवकम् । माणवकादिशेषे द्वितीया नोक्तार्थेति । आधारादपि स्यात् निरपेक्षत्वात् । कुट्यामिवाचरति-कुटीयमति प्रासादे ।

४२. कर्त्तुरायिः सलोपश्च ।

कर्त्तुरुपमानान्नाम्न आचारेऽभिधेये आयिः परो भवति, यथासंभवं सलोपश्च । श्येन इवाचरति—श्येनायते । एवं सारसायते । ओजायते, अप्सरायते, पयायते, पयस्यते, वाशब्दस्येष्टार्थत्वात् । आयेश्चलोपः—गर्दभ इवाचरति—गर्दभति, अश्व इति [अश्वतीति] मतम् । कथं गल्भते, क्लीबते, होड़ते ? एते आत्मनेपदिनः प्रत्ययान्तत्वादामिष्यते एव ।

ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया ।
आयि लोश्चप विज्ञेयो न चाश्वो गर्दभत्यपि ॥

तथा च्व्यर्थे भृशादेस्तलोर्लोपश्चेति । अभृशो भृशो भवति—भृशायते, एवमुन्मनायते, दुर्म्मनायते; वेहत्-वेहायते, शश्वत्—शश्वायते । वाचनाच्चिवरपि—भृशाभवति । अभृशो यो भृशो भवति, स भृश इवाचरति, सादृश्यादभेदो वस्तुन इति मतम् । तलोपेष्टिरिति । तथा डाज्लोहितादिभ्यश्च्व्यर्थे । पटपटायति, पटपटायते, एवं लोहितायति, लोहितायते । यजादिषु पाठ इष्यते । कष्टाय (कर्मणे) क्रामति—कष्टायते । एवं पापायते, कक्षायते, सत्रायते, गहनायते । पापवृत्तिभ्योऽन्यत्र न भवति । कष्टाय (तपसे) क्रामति रोमन्थं वर्त्तयति रोमन्थायते गौः—हनुचलने एव । इह न स्यात्—कीटो रोमन्थं वर्त्तयति । वाष्पमुद्वमति—वाष्पायते, एवम् उष्मायते, फेनायते । सुखादीनि वेदयते । सुखंवेदयते—सुखायते, एवं दुःखायते । शब्दादीनि करोति । शब्दं करोति—शब्दायते, एवं वैरायते, कलहायते । नमस्तपोवरिवसस्तु यिन् ।—नमस्करोति—नमस्यति देवान्, एवं तपस्यति शत्रून् । वरिवस्यति गुरून् चित्रङ् आश्चर्ये । आश्चर्यं चित्रं करोति चित्रीयते । कण्डवादिभ्यो यण् । कण्डूञ्—कण्डूं करोति—कण्डूयति—कण्डूयते । महीङ्—महीयते इत्यादयोऽप्यनुसर्त्तव्याः । एतत् सर्व्वं वा शब्देन बहुलार्थेन वा सिद्धम् ।

४३. इन् कारितं धात्वर्थे ।

धात्वर्थं क्रिया । नाम्न इन् परो भवति धात्वर्थे, स स कारितसंज्ञकः । हलिं कलिं गृह्णाति—हलयति, कलयति, कृतयति, त्वचयति, वर्णयति, तूस्तानि विहन्ति—

वितूस्तयति । वस्त्रं समाच्छादयति—संवस्त्रयति । कर्मणा संनह्यति—संवर्म्मयति । चूर्णैरवध्वंसते—अवचूर्णयति । तत्करोति, तदाचष्टे । मुण्डं करोति—मुण्डयति । एवं मिश्रयति, श्लक्षणयति, लवणयति, सूत्रयति । पयो व्रतयति, पयो भुङ्क्ते इति गम्यगते । वृषलान्नं व्रतयति, न भुंक्ते इत्यर्थः सत्यमाचष्टे—सत्यापयति । एवमर्थापयति, वेदापयति । प्रियमाचष्टे—प्रापयति, आवागमश्च । तेनातिक्रामति—हस्तिनातिक्रामति—अवतिहस्तयति । कर्त्तकरणार्थे—वीणया उपगायति—उपवीणयति । तुलैरवकुष्णाति—अवतूलयति । श्लोकैरूपस्तौति—उपश्लोकयति । सेनया अभियाति—अभिषेणयति । कदाचिद्दर्शने—रूपं पश्यति—निरूपयति । बहुलमेतन्निदर्शनम् । तथा, इनङ् अङ्ग-निरसनेऽपि ।—हस्तौ निरस्यति—हस्तयते, पादौ निरस्यते—पादयते । एवं पुच्छमुत्क्षिपति—उत्पुच्छयते गौः । पुच्छं परिक्षिपति—परिपुच्छयते । भाण्डानि समाचिनोति—संभाण्डयते वणिक् । चीवरं सम्माज्जंयति, परिदधाति वा—सञ्चीवरयते भिक्षुः । दिङ्मात्रमिदं गणकारवचनादप्यूह्यम् ।

४४. धातोश्च हेतौ ।

हेतुशब्देन हेतुकर्त्तृव्यापारोऽर्थोऽवगम्यते । घात्वर्थं वर्त्तयन्त्यन्ये । हेतुकर्त्तृव्यापारो वर्त्तमानाद्धातोश्चेत् परो भवति, स च कारितसंज्ञकः । कुर्वन्तं प्रयुङ्क्ते—कारयति । पचन्तं प्रयुंक्ते—पाचयति । तथा भिक्षा वासयति । कारीषोऽध्यापयति । तथा कथकः कंसं घातयति । सीतां हारयति, राजानमागमयति । तथा च—किं गतेन, हतः कंस इति लोक विवक्षा । तथा—रात्रिं विवासयति, विपूर्व्वोवसिरतिक्रमे वर्त्तते । उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति । तथा—पुष्येण चन्द्रं योजयति ।

४५. चुरादेश्च ।

चुर इत्येवमादिभ्यश्चेन् परो भवति स्वार्थे, स च कारितसंज्ञकः । चोरयति, चिन्तयति । कारितप्रदेशाः "कारितस्यानामिड विकरण" इत्येवमादयः ।

४६. इनि लिङ्गस्यानेकाक्षरस्यान्त्यस्वरादेर्लोपः ।

स्वराणां मध्ये योऽन्त्यः स्वरः स एवादिर्यस्यावयवस्येति विग्रहः । न क्षरति न चलतीति प्रधानत्वादक्षरं स्वर उच्यते । इनि परे लिङ्गस्यानेकाक्षरस्य योऽवयवोऽन्त्यस्वरादिस्तस्य लोपो भवति । अतिहस्तयति, उपवीणयति, अनेकाक्षरस्येति किम् ? वाचयति । "श्वेताश्वतरगालोड़ितह्वरकाणामश्वतरेतकलोपश्चे" ति गणकारवचनादेव श्वेताश्वमाचष्टे श्वेतयति । अश्वेतमाचष्टे—अश्वयति । गालोड़ितमाचष्टे—गालोडयति । ह्वरकमाचष्टे—ह्वरयति । "तद्वदिष्ठेमेयःसु बहुलम्"—पटिष्ठः, पटिमा, पटीयान् । "मन्तुवन्तुवीनां लुक्" चेति गणे, इन् मन्तमाचष्टे-ईशयति । स्रग्वन्तमाचष्टे—स्रुचयति । स्रग्विनमाचष्टे—स्रजयति ।

४७. **रशब्द ऋतो लघोर्व्यञ्जनादे :।**

व्यञ्जनादेलिङ्गस्यानेकाक्षरस्य ऋतो लघो रशब्दादेशो भवति इति परे। पृथु—प्रथयति, मृदु—म्रदयति, दृढ़—द्रढ़यति, कृश—क्रशयति, भृशयति, परिवृढ़—परिवृढ़यति। एषामेवाभिधानम्।

४८. **धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे।**

क्रियायाः समभिहारः पौनःपुन्यं भृशार्थो वा। क्रियासमभिहारे वर्त्तमानाद्धातो. र्व्यञ्जनादेर्यशब्दः परो भवति, स च चेक्रीयितसंज्ञकः। पुनः पुनः पचति—पापच्यते, भृशं ज्वलति—जाज्वल्यते। पाकादीनां प्रधानक्रियाणां पौनःपुन्यं, प्रधानक्रियोपकारकाणामधिश्रयणादीनाञ्च भृशता, फलातिरेको वा। व्यवस्थितवास्मरणादेकस्वरात्, तेन पुनः पुनर्जागर्ति। ऋप्रभृतिभ्यश्च—अरार्यते, अटाट्यते। अश् भोजने—अशाश्यते, प्रोर्णोनूयते, सोसूच्यते, मोमूत्र्यते। शुभिरुचिभ्यां न स्यात्,—भृशं शोभते, भृशं रोचते। गत्यर्थात् कौटिल्य एव,—भृशं पुनःपुनर्वा कुटिलं क्रामति—चंक्रम्यते। लुपादेर्गर्ह्यात्,—भृशं पुनः पुनर्वा गर्हितं लुम्पति,—लोलुप्यते, एवं सासद्यते, चञ्चूर्यते, जञ्जभ्यते, दंदश्यते, जंजप्यते, दंदह्यते, निजेगिल्यते।

४९. **गुपूधूपविच्छिपणिपनेरायः।**

गुपूप्रभृतिभ्यः: आयः परो भवति स्वार्थे। गोपायति, धूपायति, विच्छायति, पणायते [ति]। पनिसह चरित इह पणिः स्तुत्यर्थं इत्यन्ये। ऋतेर्णीयङ् वक्तव्यः। ऋतीयते। ङकार आत्मनेपदार्थः, णकारोऽगुणार्थः। कमेरनिङ् कारितञ्च। कामयते। व्यवस्थितवाधिकारादायादयोऽसार्व्वधातुके वा भवन्ति। गोपायिता, गोप्ता, गोपाया, गुप्तिः; ऋतीयिता, अर्तिता; कामयिता, कमिता।

५०. **ते धातवः।**

ते सनाद्यन्ता धातुसंज्ञा भवन्ति। जुगुप्सते, मीमांसते, चिकीर्षति, पुत्रीयति, पुत्रकाम्यति, श्येनायते, उपवीणयति, कारयति, चोरयति, पापच्यते, गोपायति, ऋतीयते, कामयते। धातुत्वाद्धातुकार्यमशुद्धक्रियत्वाद् वचनम्। इतरेषां गणेऽप्रसिद्धत्वात् सुखार्थम्।

५१. **चकास्-कास्-प्रत्यान्तेभ्य आम् परोक्षायाम्।**

चकास्-कास्-प्रत्यान्तेभ्य आम् परो भवति, परोक्षायां परभूतायाम्। चकासाञ्चकार, कासाञ्चक्रे, लोलूयाञ्चक्रे, चिकीर्षाञ्चकार। चकास्ग्रहणमनेकस्वरोपलक्षणम्। तेन—दरिद्राञ्चकार, चुलुम्पाञ्चकार। प्रत्ययान्तग्रहणमेकस्वरार्थमपीति मतम्। तेन स्वमिवाचचार—स्वाञ्चकार।

५२. दयायासश्च ।

दय्, अय्, आस् एभ्य आम् परो भवति परोक्षायां परभूतायाम् । दयाञ्चक्रे, पलायाञ्चक्रे, आसाञ्चक्रे ।

५३. नाम्यादेगुरुमतोऽनृच्छः ।

नाम्यादेर्गुरुमतो धातो ऋच्छवर्जितादाम् परो भवति, परोक्षायां परभूतायाम् । ईहाञ्चक्रे, उज्झाञ्चकार, ऊञ्छाञ्चकार (ऊञ्छाञ्चकार)। कथमियेष, उवोष ? नायं धातुसंज्ञातो नित्यं गुरुमान् । अनृच्छ इति किम् ? आनर्च्छ। व्यवस्थितवाधिकारात् प्रोर्णुनाव ।

५४. उष-विद्-जागृभ्यो वा ।

उषादिभ्य आम् परो भवति वा परोक्षायां परभूतायाम् । जागर्त्तिना सहचरितो विदिरदादिः । ओषाञ्चकार, उवोष, विदाञ्चकार, विवेद, जागराञ्चकार, जजागार ।

५५. भी-ह्री-भृहुवान्तिवच्च ।

एषामाम् परो भवति वा परोक्षायाम्, स च तिरिव, तेन द्वित्वमित्वञ्चेति । बिभयाञ्चकार, बिभाय; जिह्रयाञ्चकार, जिह्राय; बिभराञ्चकार, बभार; जुहवाञ्चकार, जुहाव ।

५६. आमः कृञनुप्रयुज्यते ।

आमन्तस्य धातोः कृञनुप्रयुज्यते परोक्षायां परभूतायाम् । ईहाञ्चक्रे । प्रयुज्यत इति स्पष्टार्थम् । आमो मकारस्यानुस्वारो भवत्यन्त्यत्वात्, तद्वर्गपञ्चमो वा स्यात् ।

५७. अस्-भुवौ च परस्मै ।

आमन्तस्य धातोरस्भुवावनुप्रयुज्यते, परोक्षायाम् परभूतायाम् । परस्मै पदञ्चातिदिश्यते । ईक्षामास, ईक्षाम्बभूव। चकासामास, चकासाम्बभूव; अन्वाचयशिष्टोऽप्यमादेशोऽर्थस्यान्तरतम्यात्, तेन ईक्षामासे, ईक्षाम्बभूवे कन्या छात्रेण, ईहां व्यतिबभूवे छात्रः। अस्तेर्भूं न स्यात् विधानबलात् । प्रकृतेः श्रुतश्चकार आदेशेन सह सम्बध्यते । विद्-आम् कृञनुपञ्चम्यां वा; विदाङ्कुरोतु विदाकरवाणि, वेत्तु, वदानि ।

५८. सिजद्यतन्याम् ।

अद्यतन्यां परभूतायां धातोः सिच् परो भवति। अनैषीत्, अपाक्षीत् । व्यव-

स्थितवाधिकारात्—स्पृशि-मृशि-कृषि,—तृपि-दृपिभ्यो वा । अस्पार्क्षीत्, अस्पृक्षत् अमार्क्षीत्, अमृक्षत्, अकार्षीत्, अकृक्षत्, अतार्प्सीत्, अतृपत्; अदार्प्सीत्, अदृपत् पक्षे शिडन्तात् सण्, पुष्पादित्वात् तृपिदृप्योरण् ।

५९. सणनिटः शिडन्तान्नाम्युपधादवृशः

शिडन्तान्नाम्युपधादनिटो धातोर्दृशिवर्ज्जितात् सण् परो भवति अद्यतन्य परभूतायाम् अलिक्षत्, अकृक्षत् अनिट इति किम् ? अकोषीत् कथमघुक्षत् ? गुहूरनिडेक पक्षे शिडन्तादिति किम् ? अभुक्त नाम्युपधादिति किम् ? अधाक्षीत् अदृश इति किम् ? अद्राक्षीत्

६०. श्रिद्रुस्रुकमि-कारितान्तेभ्यश्चण् कर्त्तरि ।

श्रिद्रु-स्रु-कमिकारितान्तेभ्यश्चण् परो भवति कर्त्तर्यद्यतन्यां परतः अशिश्रियत् अदुद्रवत्, असुस्रवत्, अचकमत अचीकरत्, अपीपवत् अलीलवत् कर्त्तरीति सबाश्रयिषातां राजानौ देवदत्तेन । श्विधेटोर्वा वक्तव्यः—अशिश्वियत्. अश्वयी अदधत्, अधासीत् ।

६१. अण् असु-वचि-ख्याति-लिपि सिचि-ह्वः ।

एभ्यो धातुभ्योऽण् परो भवति कर्त्तर्यद्यतन्यां परतः अपास्थत, अवोचत् अख्यत्, अलिपत्, असिचत्, अह्वत् । व्यवस्थितवाधिकाराल्लिपादीनामात्मनेपदे वा, अलिपत, अलिप्त असिचत, असिक्त, अह्वत अह्वास्त कर्त्तरीति किम् ? अलिप्सातां कुड्ये देवदत्तेन । असुरित्युकारोऽस् भुवि, अस् दीप्तावाभ्यां माभूदिति ।

६२. पुषादि द्युताद्यलृकारानुबन्धार्त्तिसर्त्ति-शास्तिभ्यश्च परस्मै ।

पुषादिद्युताद्यलृकारनुबन्धार्त्तिशास्तिभ्योऽण्परो भवति कर्त्तर्यद्यतन्यां परस्मैपदे परतः पुषादि-गृधु अभिकांक्षायां यावत् अपुषत्, अगृधत् द्युत्यादि-अद्युतत्, अश्वितत् लृकारानुबन्धः···अगमत्, अघसत् । ऋस् गतौ—आरत् असरत्, शासु अनुशिष्टौ—अशिषत् । परस्मा इति किम् ? व्यद्योतिष्ट द्युतादीना-मात्मनेपदमस्तीति । इरनुबन्धाद् वा वक्तव्यम् । अरुधत्, अरौत्सीत् जृ-श्वि-स्तम्भु-म्रुचुग्लुचुग्लुचां वा वक्तव्यम् जृ—अजरत् अजारीत्, श्वि—अश्वत्, अश्वयीत् स्तम्भुः सौत्रोऽयं धातुः—अस्तम्भत्, अस्तम्भीत्, अम्रुचत्, अम्रोचीत्, अग्लुचत्, अम्लोचीत् । अग्लुचत्, अग्लोचीत् । स्तेये गतावपि वर्त्तते ।

६३. इणात्मनेपदेः प्रथमैकवचने ।

पदेर्धातोरिच् परो भवति, कर्त्तर्यद्यतन्यामात्मनेपदे प्रथमैकवचने परतः ।

पूरि-तायि-प्यायिभ्यो वा। अदीपि, अदीपिष्ट। अजनि, अजनिष्ट, अबोधि, अबुद्ध। अपूरि, अपूरिष्ट। अतायि, अतायिष्ट। अप्यायि, अप्यायिष्ट।

६४. भावकर्म्मणोरिच्।

सर्वस्माद्धातोरिच् परो भवति भावकर्म्मणोर्विहिते अद्यतन्यामात्मनेपदे प्रथमैकवचने परतः। अस्थायि भवता। अकारि कटो भवता। व्यवस्थितवाधिकारात् नानोस्तपः। —अन्वतप्त।

६५. सार्वधातुके यण्।

सर्वस्माद्धातोर्यण् परो भवति भावकर्म्मणोर्विहिते सार्व्वधातुके परे। आस्यते भवता। शय्यते भवता। ग्रामो गम्यते भवता। कृञः श च—क्रियते। चकारात् तपेस्तपः कर्मकात् कर्त्तरि भवति। —तप्यते तपस्तापसः, तपोऽर्जयतीत्यर्थः। अत्राथ इचादिः, अनोस्तु न स्यात्—अनुतपते तपस्तापसः।

६६. अन् विकरणः कर्त्तरि।

धातोरन् परो भवति कर्त्तरि विहिते सार्व्वधातुके परे, स च विकरणसंज्ञकः। भवति, भवन्। विकरणप्रदेशाः—अनि च विकरण—इत्येवमादयः।

६७. दिवादेर्यन्।

दिवादेर्गणाद्यन् परो भवति स च विकरणसंज्ञकः, कर्त्तरि विहिते सार्व्वधातुके परे। दीव्यति, सीव्यति। भ्राश-भ्लाश-भ्रमु क्रमु-त्रसि-त्रुटि-लषि-यसि-संयसिभ्यश्च वा।—भ्राश्यते, भ्राशते। भ्लाश्यते, भ्लाशते। भ्राम्यति, भ्रमति। भौवादिकोऽपि भ्रमिरस्तीति। क्रम्यति, क्राम्यति, (क्रामति), त्रस्यति, त्रसति। त्रुट्यति, त्रुटति। लष्यति, लषति। यस्यति, यसति। संयस्यति, संयसति।

६८. नुः स्वादेः।

स्वादेर्गणान्नुर्विकरणसंज्ञकः परो भवति कर्त्तरि विहिते सार्व्वधातुके परे। सुनोति, सुन्वन्। चिनोति, चिन्वन्। योगविभागादक्षतेर्वा-अक्ष्णोति, अक्षति। तनूकरणे तक्षतेश्च—तक्ष्णोति, तक्षति। तनूकरणे इति किम्? सन्तक्षति—वाग्भिः शिष्यं निर्भर्त्सयतीत्यर्थः।

६९. श्रुवः शृ च।

श्रुवो धातोर्नुर्विकरणसंज्ञकः परो भवति शृआदेशश्च कर्त्तरि विहिते सार्व्वधातुके परे। शृणोति, शृण्वन्। उभयं विधेयं भौवादिकत्वात्। धिन्विकृण्व्योर्धिकृचेति वक्तव्यम्। —धिनोति, कृणोति।

७०. **स्वराद् रुधादेः परो: नशब्दः ।**

रुधादेर्गणस्य स्वरात् परो न शब्दो भवति, स च विकरणसंज्ञकः कर्त्तरि विहिते सार्व्वधातुके परे। रुणद्धि, भिनत्ति। प्रकृतिप्रत्यययोरर्थाभिधाने नशब्देनैव साहाय्यं कृतमित्यन्न स्यात्।

७१. **तनादेरुः ।**

तनादेर्गणादुविकरणसंज्ञकः परो भवति कर्त्तरि विहिते सार्वधातुके परे। तनोति, सनोति।

७२. **ना क्र्यादेः ।**

क्र्यादेर्गणान्नाविकरणसंज्ञकः परो भवति कर्त्तरि विहिते सार्व्वधातुके परे। क्रीणाति, प्रीणाति। स्तम्भु-स्तुम्भु-स्कुन्भु-स्कुभ्यो नुश्चेति वा वक्तव्यम्। – स्कुञ् क्र्यादिकः, शेषाः सौत्रा धातवः। स्तभ्नाति, स्तभ्नोति, स्तुभ्नाति, स्तुभ्नोति, स्कुभ्नाति, स्कुभ्नोति, स्कभ्नाति, स्कुनाति, स्कुनोति।

७३. **आन व्यञ्जनान्ताद्धौ ।**

क्र्यादेर्गणाद् व्यञ्जनान्तादानो विकरणसंज्ञकः परो भवति ह्रौ परे। पुषाण, बधान। व्यञ्जनान्तादिति किम् ? क्रीणीहि।

७४. **आत्मने पदानि भावकर्म्मणोः ।**

धातोरात्मनेपदानि भवन्ति भावकर्म्मणोरर्थयोः। आस्यते भवता। शय्यते भवता। भावः—सत्ता, औत्सर्गिकमेकवचनमेवासंख्यत्वात्। कर्म्मणि च—क्रियते कटो देवदत्तेन। कथं मास आस्यते, क्रोशो गुड़धानाभिभुं यते, ओदनपाकः शय्यते, नदी सुप्यते? कालाध्वभावदेशानां कर्मसंज्ञा सिद्धैवेति।

७५. **कर्म्मवत् कर्म्मकर्त्ता ।**

कर्म चासौ कर्त्ता चेति, कर्मकर्त्ता कर्म्मवद्भवति।

"क्रियमाणस्तु यत् कर्म स्वयमेव प्रसिद्ध्यति।
सुकरं स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः॥"

लूयते केदारः स्वयमेव, अभेदि-कुशूलः स्वयमेव, कर्म्मवद्भावादात्मनेपदम्। वत्करणं स्वाश्रयार्थम्। तेन—भावेऽपि पच्यते ओदनेन स्वयमेव। त्यादित्वान्न तव्यादिषु कर्म्मवद्भावः। कर्त्तव्यं कटेन स्वयमेव। ईषत्करः कटेन स्वयमेव। कर्म्मकर्त्रैक्यभेदात् भेदे तु न स्यात्—भिद्यमानः कुशूलः पात्राणि भिनत्ति, तथा अन्योऽन्यमाश्लिष्यतः। आत्मानं हन्ति आत्मेति, द्विविधो ह्यत्रात्मा। तथा—पचत्योदनं राध्यति स्वयमेव, धातुभेदात्। गच्छति ग्राममसौ, स्वयमेव गम्यते इति न स्यात्, क्रियाश्रयः कर्त्तैव केवलं कर्म्मेति भेदात्। उक्ततार्थतापि कर्म्मकार्यं, तेन न द्वितीया,

धात्वधिकाराच्च। कर्म्मकर्त्तेति किम्? साध्वसिश्छिनत्ति, साधु स्थाली पचति। कथं—ब्रूते कथा स्वयमेव, अचीकरत—कटमसौ स्वयमेव? वचनं प्रेषणादि च कर्त्तृस्थमेव, आत्मनेपदन्तु फलवद्विवक्षयेति मतम्। कार्यातिदेशोऽयम्।

७६. **कर्त्तरि रुचादिङानुबन्धेभ्यः।**

रुचादिभ्यो ङानुबन्धेभ्यश्च कर्त्तर्यभिधेये आत्मनेपदानि भवन्ति। रोचते, वर्द्धते, शीङ्—शेते, चक्षिङ्—आचष्टे। रुच इत्यनुदात्तानुबन्धोपलक्षणम्। ऊर्द्धमादत्त इत्युदात्तः, तद्विपरीतश्चानुदात्तः, उदात्तानुदात्तयोर्म्मिश्रश्च समाहारो लोकोपचारात्। तेन रुचप्रकारेभ्योऽपि भवन्ति। आदिग्रहणाच्च—निविशते, परिक्रीणीते।

७६/१. **नेर्विश्।**

उपसर्गान्नेः परो विशतीरुचादिर्भवति। निविशते गृहं कपोतः। अर्थवत्त्वात् प्रतिपदोक्तत्वात् प्रत्ययासन्नत्वाच्च उपसर्गादिति लभ्यते, सर्वत्रैवं बोध्यम्। नेरिति किं? विशति, परिविशति। उपसर्गादिति किम्? मधुनि (मधूनि) विशन्ति भ्रमराः।

७६/२. **परिव्यवेभ्यः क्रीञ्।**

परिव्यवेभ्यः उपसर्गेभ्यः परः क्रीञ् रुचादिर्भवति। परिक्रीणीते, विक्रीणीते अवक्रीणीते। परिसाहचर्य्यादनव्ययपक्षिवाचकस्य वेर्न ग्रहणं, तेन बहुविक्रीणातीत्यत्र न भवति अनुपसर्गत्वात्।

७३/३. **विपराभ्याञ्जिः।**

विपराभ्यामुपसर्गाभ्यां परो जयती रुचादिर्भवति। विजयते, पराजयते। उपसर्गादिति किम्? वनं बहु विजयति सेना। पराजयति (सेना) परा उत्कृष्टेत्यर्थः।

७६/४. **आङो दाञ् अनात्मप्रसारणे।**

आङ् उपसर्गात् परो ददाति रुचादिर्भवति अनात्मप्रसारणे गम्यमाने। धनमादत्ते, विद्यामादत्ते। अनात्मप्रसारणे किं? मुखं व्याददाति छात्रः। नदीकूलं व्याददाति। आत्मग्रहणं किं? व्याददते पिपीलिकाः पतङ्गस्य मुखम्। परप्रसारणे प्रतिषेधबाधनार्थम्।

७६/५. **गमिन् क्षान्तौ।**

पूर्वसूत्रादाङ् अनुवर्तते। आङः परो गमिरिनन्तो रुचादिर्भवति क्षान्तौ प्रतीक्षायां गम्यमानायाम्। आगमयस्व तावत्। सानुबन्धत्वाद्ध्रस्वः। क्वचित् कालं प्रतीक्षते इत्यर्थः।

७६/६. नु प्रच्छौ ।

आङः परौ नुप्रच्छौ रुचादी भवतः । आनुते शृगालः—उत्कण्ठा पूर्वकं शब्दं करोतीत्यर्थं । आपृच्छते गुरुन् शिष्यः—आराधयतीत्यर्थः ।

७६/७. अनुपरिभ्याङ्च क्रीड़ ।

अनुपरिभ्यामाङश्च परः क्रीड रुचादिर्भवति । अनुक्रीड़ते, परिक्रीड़ते आक्रीड़ते । "क्रीड़ते नागराज" इति प्रयोगदर्शनादनुपसर्गादपि क्रीड़तेरात्मनेपदं—चकारादिति बोध्यम् ।

७६/८. समोऽकूजने ।

उपसर्गात् परः क्रीड़तिरुचादिर्भवति, अकूजने-अव्यक्तशब्दकरणमित्यर्थे गम्यमाने । सक्रीड़न्ते कुमाराः । अकूजने इति किम् ? संक्रीड़ति शकटः—अव्यक्तशब्दं करोति ।

७६/९. अपस्किरः ।

अपपूर्वात् किरतेस्तौदादिकाद्धातोः प्राक् सुड़िति, अपस्किर इति तिङ्लोपे निर्देशः । ससुट् कृधातु रुचादिर्भवति । अपस्किरते वृषभो हृष्टः, अपस्किरते कुक्कुटो भक्षार्थी, अपस्किरते श्वा निवासार्थी । सर्वत्रापाच्चतुष्पाच्छकुनिषु हृष्टभक्षनिवासार्थिष्वालेखने सुडागमः । ससुडिति किम् ? अपकिरति ।

७६/१०. गत्यनुकरणे हृञ् ।

गत्यनुकरणं—सादृश्यम् । तस्मिन्नर्थेऽभिधीयमाने हृञ् रुचादिर्भवति । अश्वाः पतृकमनुहरन्ते, गावो मातृकमनुहरन्ते—पितृवदश्वा गच्छन्ति—मातृवद्गावो गच्छन्तीत्यर्थः । ऋकारान्तादागतेऽर्थे क्रीतादित्वादिकण् आदिलोपश्च । गतिग्रहणं किम् ? रूपादीनामनुकरणं न स्यात् । पितरमनुहरन्ति रूपेण पुत्राः ।

७६/११. आशिषि नाथः ।

आशिषि एव नाथती रुचादिर्भवति । सर्पिषो नाथते, सर्पिर्मे भूयादित्याशास्ते । अशिषीति किम् ? माणवकमनुनाथति—याचते इत्यर्थः । आत्मनेपदिषु पाठात् सिद्धे नियमोऽयम्—आशिष्येव नाथतेरात्मनेपदमिति । ("यस्तु, नाथसे किमु पतिं न भूभृत, इति किरातार्जुनीये । दीनस्त्वामनुनाथते कुचयुगं पत्रावृत्तं मा कुरु" इति प्रयोगो साधु इति काव्यप्रकाशकारस्तदिदं चिन्त्यते । समर्थनाशिषोरित्यत्र वृत्तौ इष्टाशंसनमपि प्रार्थनमेवेत्युक्तम्, तदा प्रार्थनायामपि आशंसायमिवात्मनेपदम् । अन्यत्र परस्मैपदमेवेति नियमः ।

७६/१२. शपथे शप।

शपथो मिथ्यानिरसनम्, तस्मिन् गम्यमाने शप रुचादिर्भवति। छात्राय शपते कुमारी। शपथ इति किम्? शपति भृत्यं राजा—आक्रोशतीत्यर्थः।

७६/१३. प्रतिज्ञानिर्णयप्रकाशनेषु स्थाः।

प्रतिज्ञा अभ्युपगमः, निर्णयो निश्चय., प्रकाशः स्वाभिप्रायप्रकटनम्—एष्वर्थेषु वर्त्तमानस्तिष्ठती रुचादिर्भवति। नित्यं शब्दमातिष्ठते—अभ्युपगच्छतीत्यर्थः। त्वयि तिष्ठते विवादः—निश्चिनोतीत्यर्थः। तिष्ठते कन्या छात्रेभ्यः—स्थित्वा स्वाभिप्रायं प्रकाशयतीत्यर्थः।

७६/१३. समवप्रविभ्यः।

एभ्य उपसर्गेभ्यः परस्तिष्ठति रुचादिर्भवति। अप्रतिज्ञार्थमिदम्। सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते।

७६/१५. उदोऽनूर्ध्वचेष्टायाम्।

अनूर्ध्वं—परिस्पन्दलक्षणव्यापारे वर्त्तमानस्तिष्ठती रुचादिर्भवति। मुक्तावुतिष्ठते [साधु], संग्रामे उत्तिष्ठते [वीरः]—उद्यमं करोतीत्यर्थः। अनूर्द्धेति किम्? आसनादुत्तिष्ठति अतिथिः। चेष्टायामिति किम्? ग्रामाच्छतमुत्तिष्ठति—उत्पद्यत इत्यर्थः। परिस्पन्दनं हि चेष्टोच्यते।

७६/१६. उपान्मन्त्रेण।

उपात् परो मन्त्रकरणकस्तिष्ठती रुचादिर्भवति। मन्त्रो गायत्र्यादिः, उपतिष्ठतीत्यर्थस्य करणम्। गायत्र्या सूर्यमुपतिष्ठते। मन्त्रेण इति तृतीयानिर्देशः किम्? गायत्रीमुपतिष्ठति। अकर्मकश्चेति यावदुपादिति वर्त्तते।

७६/१७. पथ्याराधनयोश्च:

उपात् परस्तिष्ठती रुचादिर्भवति पथि कर्त्तरि आराधने च गम्यमानेऽर्थे। अयं पन्था. स्रुघ्नमुपतिष्ठते—स्रुघ्नं नाम ग्रामं प्रयातीत्यर्थः। आदित्यमुपतिष्ठते—पूजादिना आराधयतीत्यर्थः। [सङ्गतकरणमैत्रीकरणयोरित्यपि न वक्तव्यम्, आराधनेनैव सिद्धत्वात्। रथिकानुपतिष्ठते—सङ्गतकरणेन रथिकानाराधयतीत्यर्थः। महामात्रानुपतिष्ठते—मैत्रीकरणेन महामात्रानाराधयतीत्यर्थः। सङ्गतकरणमुपश्लेषः मैत्रीकरणाच्चान्तरेणापि उपश्लेष इतिभेदः।]

७६/१८. वा लिप्सायाम्।

उपात् परस्तिष्ठती रुचादिर्भवाति वा लिप्सायां गम्यमानायाम्। भिक्षुको धार्मिकमुपतिष्ठते, उपतिष्ठति वा। भिक्षामहं लभेयमिति-धार्म्मिकमुपगच्छतीत्यर्थः।

७६/१९. **अकर्मकश्च :** ।

उपात् परोऽकर्मकस्तिष्ठती रुचादिर्भवति । वेति न वर्त्तते, उभयोर्विभाषयोर्मध्ये यो विधिः स नित्य इति वचनात् । भोजनकाले उपतिष्ठते । अन्यत्र राजानमुपतिष्ठति । स्थेति निवृत्तम् ।

७६/२०. **समो गमृच्छि प्रच्छि-स्वृ-श्रुवेत्यर्तिदृशः :** ।

समः परे अकर्मका एते धातवो रुचादयो भवन्ति । सङ्गच्छते, समृच्छते, सम्पृच्छते-ग्रह्यादित्वात् सम्प्रसारणम् । संस्वरते, संशृणुते । (श्रुवः शृ च श्रादेशः) वेत्तीति निर्देशाद् विद् ज्ञाने-संवित्ते । । अर्त्तीति निर्देशात् ऋ प्रापणे चेति भ्वादौ, ऋ सृ मताविति जुहोत्यादौ,—द्वयोरपि ग्रहणं विशेषात् । समृच्छते । अर्त्ते ऋच्छेति ऋच्छादेः ।) समियृते (अर्तिपिपर्त्योश्चेति इकारः, अभ्यासस्यासवर्णे इति इयादेशः) । सम्पश्यते, (दृशेः पश्य इति पश्यादेशः) । अकर्मका इत्येव, सङ्गच्छति सुहृदं प्रियः ।

७६/२१. **उपसर्गादस्त्यूहो** वा ।

उपसर्गादस्त्यूहो रुचादी भवतो वा । निरस्यते, निरस्यति, समूहते, समूहति । अकर्मक इत्येव-निरस्यति शत्रून्, समूहति पदार्थान् ।

७६/२२. **आङो यमहनो स्वाङ्गकर्मको च** ।

आङः परो यमहनो अकर्मको स्वाङ्गकर्मको च रुचादि भवतः । आयच्छते, [धुरि हन्तेः सार्व्वधातुके इति न लोपः] साङ्गकर्मको च—आयच्छते पदम्, आहते उरः ; अन्यस्मिन् कर्मणि न भवति—आयच्छति रज्जुम्, आहन्ति वृषलम् । [कथमायच्छति पादं देवदत्तस्य, आहन्ति शिवो विष्णुमित्रस्य ? सत्यं, नेह पारिभाषिक—"मद्रवं मूर्त्तिम" दित्यादि स्वाङ्गम्, अपि तु स्वस्यात्मनोऽङ्गम् । अतः परस्याङ्गे कर्म्मणि न भवति, तत्पुनर्व्याख्यानादिति ।

७६/२३. **व्युद्भ्यां तपः** ।

व्युद्भ्यां परस्तपता रुचादिर्भवति । वितपते, उत्तपते—ज्वलति, भासते वेत्यर्थः । वितपते पाणिम्, उत्तपते पाणिम्—सन्तापयतीत्यर्थः । अत्राप्यकर्मकः स्वाङ्गकर्मकश्चेति कर्मान्तरे न भवति । आदित्यः पृथ्वीं वितपति, उत्तपति सुवर्णं स्वर्णकारः ।

७६/२४. **तपः कर्म्मकः :** ।

तपः, कर्म यस्य तपतेरिति विग्रहः । तपः कर्मकस्तपती रुचादिर्भवति । तप्यते तपस्तापसः । तत्र चकारात्तपेस्तपः कर्मकादिति यण्कर्त्तरि ।

७६/२५. **निसंव्युपेभ्यो ह्वः** ।

निसंव्युपेभ्यः परो ह्वयती रुचादिर्भवति । निह्वयते, संह्वयते, विह्वयते ।

७६/२६. स्पर्द्धायामाङः।

आङः परो ह्वयती रुचादिर्भवति स्पर्द्धायाम्। मल्लो मल्लमाह्वयते। स्पर्द्धा—पराभिभवेच्छा। यद्यप्याङ् परो ह्वयतिः स्पर्द्धायां न वर्त्तते किन्त्व ह्वाने, तथापि—स्पर्द्धाविषयकमाह्वानमिह स्पर्द्धोच्यते उपचारात्। मल्लः स्पर्द्धमानो मल्लान्तरमाह्वयति—आकारयति।

७६/२७. सूचनावक्षेपण-सेवन-साहस-यत्न-कथोपयोगेषु कृञः।

एष्वर्थेषु वर्त्तमानः करोती रुचादिर्भवति। सूचनं—परापकारप्रयुक्तं परदोषाविष्करणम्। अवक्षेपणं—तिरस्करणम्। सेवनम्—अनुवर्त्तनम्। साहसं—यदबुद्धिपूर्वकं करणम्। यत्न—सतो गुणान्तराधानम्। कथा—व्याख्यानम्। उपयोगो—धर्मादिप्रयोजने द्रव्यस्य विनियोगः। तत्र सूचने—अयमिदमुपकुरुते—सूचयतीत्यर्थः। अवक्षेपणे—श्येनो वर्त्तिकामुपकुरुते—तिरस्करोतीत्यर्थः। सेवने—गणिकामुपकुरुते,—सेवते इत्यर्थः। साहसे—परदारानुपकुरुते,—तेषु सहसा प्रवर्त्तत इत्यर्थः। यत्ने—एधोदकस्योपस्कुरुते, तस्य गुणान्तराधानं करोतीत्यर्थः। उपात् प्रतियत्नविकृतवाक्याध्याहरेषु सुट्। कथायां—जनापवादान् प्रकुरुते, प्रकर्षेन कथयतीत्यर्थः। उपयोगे—शतं प्रकुरुते, धर्मार्थं नियुङ्क्ते इत्यर्थः।

७६/२८. अधेः शक्तौ।

अधेः परः करोती रुचादिर्भवति शक्तौ गम्यमानायाम्। शत्रून् अधिकुरुते,—अभिभवतीत्यर्थः। शक्तौ हि परानभिभवति, न च परैः पराजीयते। शक्ताविति किम्? अधिकरोति राजा।

७६/२९. वे शब्दकर्मकः।

शब्द एव कर्म यस्येति विग्रहः। वेः शब्दकर्मकः करोती रुचादिर्भवति। क्रोष्टा विकुरुते शब्दान् [स्वरान्]। शब्दकर्मक इति किम्? विकरोति मानसं वसन्तः। कर्म इति किम्? शब्देन विकरोति मतिम्।

७६/३०. अकर्मकश्च।

वेरित्येव वेः परोऽकर्मकः करोती रुचादिर्भवति। विकुर्वते सैन्धवाः—सिन्धो भवा जाता वा अश्वाः शोभनं वल्गयन्तीत्यर्थः। ओदनपरिपूर्णाश्छात्रा विकुर्वते—निष्फलं चेष्टन्ते इत्यर्थः।

७६/३१. पूजोत्क्षेपणोपनयनभृतिविगणनव्ययेषु नीञः।

एष्वर्थेषु नयती रुचादिर्भवति। पूजा—सम्मान। नयते शर्ववर्म्मा व्याकरणे—पदार्थानुपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयतीत्यर्थः। ते च युक्तिभिर्निश्चाय्यमानाः पूजिताः [सम्मानिताः] भवन्ति। अभिलाषितार्थसम्पादनेन तेषां

पूजा इत्यर्थः । उत्क्षेपक्षणम्—ऊद्ध्वंप्रापणम् । माणवकमुपनयते - अधःस्थितं माणवकमूर्द्ध्वं प्रापयतीत्यर्थः । उपनयनमाचार्यक्रिया, माणवकमीदृशेन विधिना आत्मसमीपं प्रापयतिः येनासावुपनेतो स्वयमाचार्यः सम्पद्यते । माणवकमुपनयते,—आत्मानमाचार्यं कुर्वन् माणवकमात्मसदृशं सम्पादयतीत्यर्थः । ज्ञानं – प्रमेय निश्चयः । नयते कात्यायनो व्याकरणे [पदार्थान्]—प्रमेयं निश्चिनोतीत्यर्थः । भृतिः—कर्ममूल्यम् । कर्मकरानुपनयते – भृतिदानेन समीपं करोतीत्यर्थः । विगणनम्—ऋणादेर्निर्यातनम् । माद्राः कारः विनयन्ते –राजग्राह्यभागं निर्यातयन्तीत्यर्थः । कर एव कारः, स्वार्थेऽण्, राजग्राह्यभागः कृषकै रक्षार्थं परिकल्पितः । व्ययो धर्मादिषु विनियोगः । शतं विनयते—धर्मार्थं विनियुङ्क्ते इत्यर्थः । पूजादीष्विति किम् ? अजां नयति ग्रामम् ।

७६/३२. कर्त्तृस्थामूर्त्तकर्म्मकश्च ।

कर्त्तृस्थममूर्त्तमकठिनं कर्म्म यस्य नयतेरिति विग्रहः । कर्त्तृस्थामूर्त्तकर्म्मको नयती रुचादिर्भवति । क्रोधं विनयते, हर्षं विनयते—उपशमयती व्यर्थः । कर्त्तृस्थ इति किम् ? देवदत्तो यज्ञदत्तस्य मन्युं विनयति । अमूर्त्त इति किम् ? गडुं विनयति । कर्म्म इति किम् ? बुद्धया विनयति ।

७६/३३. वृत्त्युत्साहतायनेषु क्रमः ।

एष्वर्थेषु क्रमो रुचादिर्भवति । वृत्तिरप्रतिबन्धः, उत्साहश्चेतसिद्धो धर्मः, तायनं स्फीतता । ऋद्धस्य क्रमते बुद्धिः, न विहन्यते इत्यर्थः । अध्ययनाय क्रमते छात्रः, उत्सहत इत्यर्थः । नीतिमतिश्रियः क्रमन्ते – स्फीतीभवन्तीत्यर्थः ।

७६/३४. परोपाभ्याम् ।

इह वृत्त्यादयोऽर्था अनुवर्त्तन्ते । तत्र च पूर्वेणैव सिद्धे नियमार्थमिदम् । उपसर्गाणां मध्ये परोपाभ्यामेव वृत्त्यादिष्वर्थेषु क्रमी रुचादिर्भवति । पराक्रमते, उपक्रमते । न प्रतिहन्यते, उत्सहते, स्फीतीभवतीत्यर्थः । परोपाभ्यामिति किम् ? संक्रामति । [क्रमः परस्मा इति दीर्घः] वृत्तादिष्वेव पराक्रमति, उपक्रामति ।

७६/३५. आङो ज्योतिरुद्गमे ।

आङः परः क्रमी रुचादिर्भवति ज्योतिरुद्गमे । ज्योतिरुद्गमे ज्योतिषां ग्रहनक्षत्रादीनामुद्गम ऊर्द्ध्वगमनमित्यर्थः । आक्रमते सूर्य— उद्गच्छतीत्यर्थः । ज्योतिरिति किम् ? आक्रामति धूमः । उद्गम इति किम् ? अग्निरिन्धनमाक्रामति—व्याप्नोतीत्यर्थः । कथमेतत्– "नभः समाक्रामति कृष्णवर्त्मना, स्थित्वैकचक्रेण रथेन भास्करः ?" अत्रापि व्याप्त्यर्थस्य विवक्षितत्वात् । तथाहि नभ इति कर्मपदं बुध्यते ।

७६/३६. वेः पादाभ्याम् ।

वे परः क्रमी रुचादिर्भवति । पादाभ्यां यदि सा क्रिया क्रियते । साधु विक्रमते हंसः । द्विवचनस्यातन्त्रत्वात् पादैरपि यदा क्रियते, तदापि भवति । लघु विक्रमते अश्वः । पादाभ्यामिति किम् ? अश्वेन विक्रामति ।

७६/३७. प्रोपाभ्यामारम्भे ।

प्रोपाभ्यां परः क्रमी रुचादिर्भवति आरम्भेऽर्थे । प्रक्रमते भोक्तुमारभते, इत्यर्थः । कथम् उपक्रमते-शुश्रूषामङ्गीकरोतीत्यर्थः ? सत्यमङ्गीकरणमप्यारम्भ-विषयमेवेत्यदोषः । आरम्भ इति किम् ? पूर्वेद्युः प्रक्रामति—गच्छतीत्यर्थः, अपरेद्यु-रुपक्रामति—आगच्छतीत्यर्थः ।

७६/३८. अनुपसर्गो वा ।

अनुपसर्गः क्रमी रुचादिर्भवति वा । क्रमते, क्रामति, अनुपसर्ग इति किं ? संक्रामति । क्रम इति निवृत्तम् ।

७६/३९. निह्नवे ज्ञाः ।

निह्नवेऽर्थे ज्ञा रुचादिर्भवति । शतमपजानीते, सहस्रमपजानीते,—अपह्नुते इत्यर्थः । [ज्ञश्चेति जादेशः उभयेषामित्यादिना ईकारः] निह्नव इति किम् ? न त्वं किञ्चिदपि जानासि । स्वभावादपपूर्वो जानातिरपह्नवे वर्त्तते ।

७६/४०. अकर्मकश्च ।

अकर्मको ज्ञा रुचादिर्भवति । सर्पिषो जानीते, नात्र सर्पिषः कर्मत्वेन विवक्षित-मपि तु ज्ञानस्य भेदकत्वेनेत्य कर्मकत्वम् । इह न भवति, स्वरेण सूत्रं जानाति, सकर्मकत्वात् ।

७६/४१. सम्प्रतिभ्यामस्मृतौ ।

सम्प्रतिभ्यां ज्ञा रुचादिर्भवति अस्मृतावर्थे । संजानीते, प्रतिजानीते,—अभ्युपगच्छतीत्यर्थः । अस्मृताविति किम् ? मातुः संजानाति—स्मरतीत्यर्थः ।

७६/४२. ज्ञानयत्नोपच्छन्दनेषु वद ।

एष्वर्थेषु वदती रुचादिर्भवति । वदते पतञ्जलिर्व्याकरणे—ज्ञानपूर्वकं वदतीत्यर्थः । भाषणमपि ज्ञानपूर्वकमेवेति न पृथगुक्तम्, ज्ञानेनैव उक्तत्वात् । वदते कात्यायनो व्याकरणे—देदीप्यमानस्तत्र पदार्थान् वदतीत्यर्थः । यत्ने – क्षेत्रे वदते—क्षेत्रविषये यत्नमुत्साहमाविष्करोति इत्यर्थः । उपच्छन्दने—कर्मकारानुपवदते । उपच्छन्दनं प्रलोभनं, तच्चोपसान्त्वनान्न भिद्यत इति । परदारानुपवदते, उपच्छन्दने नैव सिद्धम् । वदिरित्यधिकारस्तयोर्वेति यावत् ।

७६/४३. **अनोरकर्मकः ।**

अनोः परोऽकर्मको वदती रुचादिर्भवति । अनुवदते कठः कालापस्य, अनुशब्द सादृश्ये, यथा अधीयमानः कालाप पठति तथा कठ इत्यर्थः । पश्चादर्थे वा, कालापेन पूर्वमुदिते पश्चात् कठो वदतीत्यर्थः । अकर्मक इति किम् ? पूर्वमेव यदुदितं तदनुवदति पुनर्वदतीत्यर्थः ।

७६/४४. **विमतौ ।**

विमतावर्थे वदती रुचादिर्भवति । विविधा नाना मतिर्विमतिः । गेहे विवदन्ते - विमतिपतिता विचित्रं भाषन्त इत्यर्थः ।

७६/४५. **व्यक्तं सहोक्तौ ।**

व्यक्ताक्षरं यथा भवति सहोक्तौ सहोच्चारणेऽर्थे वदतीरुचादिर्भवति । सम्प्रवदन्ते ग्राम्याः—व्यक्ताक्षरं युगपद् वदन्तीत्यर्थः । व्यक्तमिति किम् । प्रवदन्ति कुक्कुटाः, यत्र अकरादयो वर्णाः स्वरूपेण स्पष्टमुपलभ्यन्ते, स व्यक्तो ध्वनिः । सहोक्ताविति किं ? वदति ब्राह्मणः ।

७६/४६. **तयोर्वा ।**

विमतिव्यक्तसहोक्तयोरेकत्र विवक्षायां वदती रुचादिर्भवति वा । विप्रवदन्ते मौहूर्ताः, विप्रवदन्ति वा; परस्परं विप्रतिषेधेन व्यक्ताक्षरं युगपद्वदन्तीत्यर्थः । विमताविर्त्येव—सम्प्रवदन्ते ग्राम्याः । व्यक्तमित्येव—विप्रवदन्ति शकुनयः । सहोक्ताविर्त्येव—एकैकशो विप्रवदन्ते मौहूर्ताः । विमताविति नित्यमेव ।

७६/४७. **अवाद्गिरः ।**

अवात् परो गिरती रुचादिर्भवति । अवगिरते । तिव् लोपं कृत्वा तौदादिकस्य गॄ निगरणे इत्यस्य निर्देशः, तेनेह न भवति—अवगृणाति ।

७६/४८. **समः प्रतिज्ञायाम् ।**

समः परो गिरती रुचादिर्भवति प्रतिज्ञायाम् । शतं संगिरते-अभ्युपगच्छतीत्यर्थः । प्रतिज्ञायामिति किम् ? संगिरिते, वक्ति, अभ्यवहरति वेत्यर्थः ।

७६/४९. **किरादि-श्रन्थि-ग्रन्थि-सनन्ताः कर्मकर्तृस्था ।**

एते धातवो रुचादयो भवन्ति कर्मकर्तृस्थाः । आदिशब्दप्रकारवचनः, किरतिप्रकाराः किरादयः शिष्टप्रयोगानुगम्याः स्वभावादन्तर्भूतकारितार्थाः कर्मकर्तृस्थत्वात् । कर्मवद्भावः प्राप्तस्तदपवादः कर्त्तर्यात्मने पदं विधीयते । अवकारयति हस्तिनं हस्तिपकः, अवकिरते हस्ती स्वयमेव । श्रथ्नाति मालां मालाकारः, श्रथ्नीते माला स्वयमेव । ग्रथ्नाति मालां मालिकः, ग्रथ्नीते माला स्वयमेव । चिकीर्षति कटं देवदत्तः, चिकीर्षते कटः स्वयमेव ।

७६/५०. दुह ।

कर्मकर्त्तस्थ इति वर्तते । कर्मकर्तृस्थो दोग्धी रुचादिर्भवति । दोग्धि गां गोपालकः, दुग्धे गौ स्वयमेव ।

७६/५१. अद्यतन्यां स्वरान्तश्च वा ।

अत्रापि कर्मकर्तृस्थ इत्येव । अद्यतन्यां विषये स्वरान्तो यो धातुश्च काराद् दुहिश्च कर्मकर्तृस्थो रुचादिर्भवति वा । अकार्षीत् कटं देवदत्तः, अकृत कटः स्वयमेव, अकारि कटः स्वयमेव । एवमलविष्टः केदारः स्वयमेव, अलावि केदारः स्वयमेव । अदुग्ध गौः स्वयमेव, अदोहि गौः स्वयमेव ।

७६/५२. स्नु-नमौ स्वयम् ।

कर्मकर्तृस्थ इति निवृत्तम् । स्वयमित्यधिकृतस्य कर्तृविशेषणम् । स्वयं कर्तरि स्नुनमौ रुचादी भवतः । अनन्यप्रेरिते कर्त्तरीत्यर्थः । प्रस्नुते गौः स्वयमेव—पयो मुञ्चतीत्यर्थः । नमिरयमन्तर्भूतकारितार्थः, नमयति दण्डं देवदत्तः, नमते दण्डः स्वयमेव—कर्मवद् भावस्य बाधकत्वाद् यणिचौ न भवतः । स्वयमिति किम् ? प्रस्नोति गौर्दोग्धुः कौशलेन, नमति पल्लवो वातेन ।

७६/५३. उदः सकर्मकश्चर ।

उदः परः सकर्मकश्चरती रुचादिर्भवति । कुटुम्बमुच्चरते—उत्क्रम्य गच्छतीत्यर्थः । सकर्म्मक इति किम् ? धूम उच्चरति-उद्गच्छतीत्यर्थः ।

७६/५४. समस्तृतीयायुक्तः ।

समशब्दविशिष्टस्तृतीयान्तेन युक्तश्चरती रुचादिर्भवति । रथेन सञ्चरते । सम इति किं ? रथेन चरति । तृतीया युक्त इति किम् ? 'उभौ लोकौ सञ्चरति इमञ्चामुञ्च देवल' इति ।

७६/५५. दाण सा चेच्चतुर्थ्यर्थे ।

समस्तृतीयायुक्त इति वर्त्तते, सा तृतीया यदि चतुर्थ्यर्थे भवति, तदा समः परो दाण रुचादिर्भवति । दास्या मालां सम्प्रयच्छते कामुकः । सा चेच्चतुर्थ्यर्थ इति किम् ? दास्या सम्प्रयच्छति भिक्षां छात्रेभ्यः । तृतीयायुक्त इत्येव—दास्यै सम्प्रयच्छति भिक्षाम् ।

७६/५६. उद्वाहे उपयम ।

उद्वाहे विवाहे उपपूर्वो यमी रुचादिर्भवति । कन्यामुपयच्छते, विवाहयतीत्यर्थः ।

७६/५७. शदिरनि ।

शदधातु रुचादिर्भवति अनि विकरणे । शीयते । अन्यत्र न भवति, यथा शत्स्यति ।

७६/५८. आशीरद्यतन्योश्च मृङ् ।

चकारादनीति सम्बध्यते। मृङो ङकारानुबन्धत्वात् सिद्धे नियमार्थमुच्यते। आशीरद्यतन्यन् विकरण विषयेऽत्रैव मृङ् रुचादिर्भवति नान्यत्र। मृषीष्ट, अमृत, म्रियते।

७६/५९. अशने भुजिः।

अशनेऽर्थे भुजी रुचादिर्भवति। ओदनं भुङ्क्ते। अशन इति किम्? भुनक्ति पृथ्वीं राजा, पालयतीत्यर्थः। प्रभुजति वस्त्रं, कुटिलं करोतीत्यर्थः।

७६/६०. समः क्ष्णुः।

समः परः क्ष्णु रुचादिर्भवति। संक्ष्णुते शस्त्रं—निर्म्मलं करोतीत्यर्थः।

७६/६१. स्वराद्यन्तादुपसर्गादयज्ञपात्रेषु युजिर्।

स्वर आदिरन्तोऽवयवो यस्योपसर्गस्य इति विग्रहः। स्वरादि मात्रात् स्वरान्ताच्चेति यः शब्दः स्वरादिर्व्यञ्जनान्तः, यश्च व्यञ्जादिः स्वरान्तश्च, ततोऽपि युजी रुचादिर्भवति। उद्युङ्क्ते उपयुङ्क्ते, प्रयुङ्क्ते। स्वराद्यन्तादिति किम्? संयुनक्ति। अयज्ञपात्रेष्विति किम्? यज्ञपात्रं प्रयुनक्ति।

७२/६२. हेतुकर्त्तृभीस्म्योर्विन्।

हेतुकर्त्तुः सकाशात् यो भीस्मा, तयोर्य इन् स रुचादिर्भवति। मुण्डो भीषयते। भीषिचिन्तीति वचनाद् भियः सान्तता। जटिलो विस्मापयते। हेतुकर्त्तरिति किम्? कुञ्चिकयैनं विभाययति रूपेण विस्मापयति।

७६/६३. प्रलम्भने गृधिवञ्च्योः।

गृधिवञ्च्योर्य इन् स रुचादिर्भवति प्रलम्भनेऽर्थे। बटुं गर्धयते, बटुं वञ्चयते; —प्रत्यायतीत्यर्थः। प्रलम्भन इति किम्? श्वानं गर्धयति—आकांक्षामस्योत्पादयतीत्यर्थः।

७६/६४. पूजाभिभवयोश्च लातेः।

लातेर्य इन् स रुचादिर्भवति पूजाभिभवयोरर्थयोश्चकारात् प्रलम्भने च। जटाभिरालापयते—पूजामधिगच्छतीत्यर्थः। श्येनो वर्त्तिकामुल्लापयते—अभिभवतीत्यर्थः, कस्त्वामुल्लापयते—प्रतारयती [विसंवादयती] त्यर्थः।

७६/६५. मिथ्याभियोगेऽभ्यासे कृञः।

इन्नित्येन, मिथ्याशब्देन योगेऽभ्यासे पौनः पुन्ये कृञः पर इन् रुचादिर्भवति। पदं मिथ्या कारयते—स्वरादिदुष्टं पदं पुनः पुनरुच्चारयतीत्यर्थं। मिथ्याभियोगे इति

किम् ? साधु पदं कारयति । अभ्यास इति किम् ? सकृन्मिथ्यापदं कारयति । कृञ इति किम् ? मिथ्या पदं वाचयति ।

७६/६६. अनियमे चागतिहिंसाशब्दार्थहसः ।

इन्निति निवृत्तम् । अनियमो ऽप्रतिहारः परिवर्त्त इत्येकोऽर्थः, स च धातु-प्रस्तावात् क्रियाया एव, तस्मिंश्च वर्त्तमानो धातू रुचादिर्भवति । गतिश्च हिंसा च शब्दश्च तेऽर्था येषां ते तथोक्ताः । गत्यर्थाः शब्दार्थाः हिंसार्थाश्च हस च सत्यपि नियमे रुचादयो न भवन्तीत्यर्थः ।

इति रुचादिः समाप्तः

७७. चेक्रीयितान्तात् ।

चेक्रीयितान्ताद्धातो कर्त्तर्यात्मनेपदानि भवन्ति । पापच्यते, लोलुप्यते ।

७८. आय्यन्ताच्च ।

आयि प्रत्ययान्ताच्च धातोः कर्त्तर्यात्मनेपदानि भवन्ति । हंसायते, पयायते, पयस्यते । अन्तग्रहणादायि लोपे न स्यादिति मतम् । तेन दरिद्रति, घटति ।

७९. इनञ्‌ यजादेरुभयम् ।

इनन्ताञ्‌ ञानुबन्धाद्यजादेश्चोभयपदं भवति, कर्त्तर्यभिप्रेये, कारयति, कारयेत, सुनोति, सुनुतः, यजति, यजते, पचति, पचते । समाहारानुबन्धा ये ते यजादयः । अफलवति कर्त्तर्यात्मनेपदं च दृश्यते । यथा--वृक्षं परिवारयन्ते कण्टकाः, शोषयते व्रीहीनातपः, तव दर्शनं किं न धत्ते, कमलवनोद्‌घाटनं कुर्व्वते ये, माणवकं ब्रूते, मरीचीन्‌ वितनुते । फलवति कर्त्तरि परस्मैपदञ्च दृश्यते—स्वं कटं कारयति, स्वमङ्गं कण्डूयति, स्वं यज्ञं यजति, स्वं पुत्रमपवदति, स्वमश्वं जानाति । अपदान्तर-योत्येऽपि दृश्यते—"तनोति शुभ्रं गुणसम्पदा यशः ।" यजेरपि विवक्षया भवितव्यमेवेति मतम् । गणकारवचनप्रमाणार्थमिदम् ।

८०. पूर्ववत् सनन्तात् ।

सनः पूर्वो यो धातुस्तद्वत् सनन्तादपि तत् पदम्भवति । रुरोचिषते, अधिजिगांसते, पापचिषते, शिष्येनायिषते, पिपक्षति, पिपक्षते ।

"स्मृदृशी च सनन्तौ तु रुचादौ श्रुरनाङ्‌ प्रति ।
अननुज्ञांश्च विज्ञेया यथा सुस्मूर्षते इति ॥

८१. शेषात्कर्त्तरि परस्मैपदम् ।

येभ्य आत्मनेपदमुक्तं ततोऽन्यः शेषः । शेषाद्धातोः कर्त्तरि परस्मपदम्भवति

भवति, अत्ति, जुहोति, दीव्यति, रुणद्धि, तुदति, विशति, रोचयति, सूत्रयति, पुत्रकाम्यति, [गोपायति]। पुनः कर्त्तरीति किम् ? भिद्यते कुशूलः स्वयमेव नायं मूढः कर्त्तेति। कथमनुकरोति, पराकरोतीति नित्यं वक्तव्यम्, तथा—प्रवहति, परिमृष्यति, विरमति, आरमति, परिरमति, देवदत्तमुपरमति—नात्मनेपदं, यत्रादेशचादेश्च गणकृतस्यानित्यत्वात्।

इति दौर्गं सिंह्यां वृत्तावाख्याते द्वितीयः पादः समाप्तः।

———

आख्यात-प्रकरणम्

तृतीयः पादः

८२. **द्विर्वचनमनभ्यासस्यैकस्वरस्याद्यस्य ।**

धातोरवयवस्यानभ्यासस्यैकस्वरस्याद्यस्य द्विर्वचनं भवतीत्यधिकृतं वेदितव्यम् । पपाच, जुहोति । वचनग्रहणं द्वे रूपे भवत इति स्थानित्वाशङ्कानिरासार्थम् । तेन—जिघांसति, आटिटदिति घत्वकारितलोपप्रतिपत्तिगौरवं स्यात् । अनभ्यासस्येति किम् ? जुगुप्सिषते, बोभूयिषते—प्रतिनिमित्तं द्विरुक्तिर्न स्यात् । एकस्वरस्येति बहुव्रीहिः किम् ? व्यञ्जनेन सह द्विर्वचनार्थम् । तेन, दिदरिद्रासति । कथमियाय, आर ? एकस्यापि स्वरस्याद्यन्तवदुपचारात् । तथा आट् अनेनिजुः ;—समुदायस्यापि द्विर्वचनमभ्यस्तकार्यञ्चेति । कथं वृक्षं वृक्षं परिसिञ्चति, ग्रामो ग्रामो रमणीयः, गृहे गृहे अश्वाः ? वीप्सायां वर्तमानस्य पदस्य लोकत एव द्विरुक्तिः सिद्धाः । तथा परि परि त्रिगर्त्तेभ्यो वृष्टो देवः,—परे वर्जने द्योत्ये विभाषैव । तथा—उपर्युपरि ग्रामम्, अधोऽधो नगरम्, अध्यधि स्थापयति,—उपर्यधोऽधीनां सामीप्य एव । तथा—एकैकं जुहोति,—आदेरेकस्य विभक्तेर्लुक् । तथा हा प्रिया मे गतगता । नष्टनष्टा,—सति सम्भवे पुंवद्भावोऽपि पीड़ायां गम्यमानायाम् । तथा—पटुपटुः, पटुपट्वी, पण्डितपण्डितः, पण्डितपण्डिता, सादृश्येऽगुणवचनस्यापि । भीतभीतः, चकितचकितः । तथा प्रियप्रियेण ददाति, सुखसुखेन पश्यति, अप्राणिविषय एव । एवमन्येऽप्यनुसर्त्तव्याः । तथा—आभीक्ष्ण्ये—पचतिपचतितरां, पचतितमां, गच्छतितरां, गच्छतितमां, तमादयः पश्चात् । तथा, डाच्यव्यक्तानुकरणस्य च—पटपटाकरोति, पटापटायते ।

८३. **स्वरादेर्द्वितीयस्य ।**

येन नाप्राप्तिन्यायेन, पूर्वस्य बाधकोऽयम् । स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्याद्यस्य द्विर्वचनं भवतीत्यधिकृतं वेदितव्यम् । आशिशत्, अटाट्यते, अरिरिषति । स्वरादेरिति किम् ? पापच्यते । धातोरिति किम् ? आटतुः । स्वरादेरिति कर्मधारयात् पञ्चम्या सिध्यति, द्वितीयग्रहणमिहोपलक्षणम्, तेन शिष्टप्रयोगानुसारेण कण्डूयादीनां तृतीयस्यापि—कण्डूयितुमिच्छति कण्डूयियिषति । ईर्ष्यतेर्यिशब्दस्य सनो वा द्विर्वचनम्—ईर्ष्यितुमिच्छति—ईर्ष्यियिषति । सनोऽपि ईर्ष्यिषिषति ।

नामधातोराद्यस्य द्वितीयस्य तृतीयस्य क्रमेण युगपद्वा—पुत्रीयितुमिच्छति—पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति, पुपुतित्रीयियिषति। क्वचिद् द्वितीय-तृतीययोरपि—अश्वायितुमिच्छति, अशिश्वायिषति, अश्वायियिषति।

८४. न नवदराः संयोगादयोऽये।

स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्यानभ्यासस्य नवदराः संयोगादयो न द्विरुच्यन्ते न तु ये परे। उन्दिदिषति, उद्विजिजिषति, अड्डिडिषति, अर्च्चिचिषति। नामधातुष्वपि—इन्द्रीयितुमिच्छति, इन्दिद्रीयिषति। एवमन्येऽप्यनुसर्त्तव्याः। अय इति किम्? अराय्यंते। अर्घ्यमाख्यातवान्, आर्य्यदित्यपि स्यात्। कथं प्रोर्णोनूयते? नायं ये परतः। स्वराद्याद्वितीयोऽवयवो वचनाद् गम्यते।

८५. पूर्व्वोऽभ्यासः।

धातोर्द्विरुक्तस्य यः पूर्व्वः सोऽभ्याससंज्ञो भवति। पपाच। देहि, अभ्यासप्रदेशा—अभ्यासस्याद्विर्व्यंञ्जनमवशेष्यमित्येवमादयः।

८६. द्वयमभ्यस्तम्।

धातोरभ्यास इतरश्च द्वयमभ्यस्तसंज्ञं भवति। ददति, ऐयरुः। द्वयमिति किं? परमात्रस्य माभूत्। अन्यथा जुहूषतीत्यत्राभ्यस्तस्य चेत्यभ्यासे सम्प्रसारणं न स्यात्। अभ्यस्तप्रदेशा—अभ्यस्तानामाकारस्येत्येवमादयः।

८७. जक्षादिश्च।

जक्षादिरनभ्यस्तोऽप्यभ्यस्तसंज्ञो भवति। जक्षति, जाग्रति, दरिद्रति, चकासति, शासति। पञ्चैते भाषायां व्यवस्थिता इति।"

८८. चण्परोक्षाचेक्रीयितसनन्तेषु।

चणाद्यन्तेषु द्विर्वचनं भवत्यधिकारवशात्। अपीपचत् आन्दिदत्, पपाच, पापच्यते, प्रोर्णोनूयते, पिपक्षति, अटिटिषति। अन्तग्रहणं संश्चेक्रीयितयोरपि द्विर्वच-नार्थम्। तेनार्थान्, प्रतीषिषति, अटाट्यते।

८९. जुहोत्यादीनां सार्व्वधातुके।

जुहोत्यादीनां धातूनां सार्व्वधातुके परे द्विर्वचनम्भवति। जुहोति, जुहुयात्, जुहवानि, जजनानि, जजन्यात् अजजन्। चिक्लिद चक्नस (चक्लस) चराचर चलाचल पतापत घनाघन पाटुपटा वा इति नामभूताः संज्ञारूढाः। न च क्लिदेनम्युपधत्वात् कः। क्नसि (क्लसि) चरि चलि पति वदि हनि पाटयतिभ्यो नाच् प्रत्ययो द्विर्वचनं निपातनञ्चेति।

९०. अभ्यासस्यादिर्व्यञ्जनमवशेष्यम् ।

अभ्यासस्यादिर्व्यञ्जनमवशेष्यं रक्षणीयम्भवति । अनादिर्लोपनीयमित्यर्थः । शिश्राय, जग्लौ, बंभ्रम्यते, व्यञ्जनग्रहणमनादिवर्णमात्रस्य लोपो मा भूत् । कथम् आटतुः ? अभ्यासजातेरवगतं शेष्यम् । शेष्यशब्दोऽत्र निवृत्तिप्रधानां स्थितिमाहेत्यन्ये ।

९१. शिट्परोऽघोषः ।

शिटः परोऽघोषोऽवशेष्यो भवति । शिटो लोप इत्यर्थः । चुश्च्योत, तिष्ठेव, चस्कन्द । शिट्पर इति किम् ? पप्सौ, अनाद्यर्थोऽयमारम्भः ।

९२. द्वितीयचतुर्थयोः प्रथमतृतीयौ ।

अभ्यासद्वितीयचतुर्थयोः स्थाने प्रथमतृतीयौ भवतः यथासंख्यमान्तरतम्यात् । चखान, चिच्छेद, टिठकारयिषति, तस्थौ, पफाल, जुघोष, डुढौके, दध्यौ, बभार, कथम् ऊढमाख्यातवान्—औजढत् ? असिद्धं बहिरङ्गमन्तरङ्ग इत्येके ।

९३. हो जः ।

अभ्यास हकारस्य जकारो भवति । जघान, जुहोति ।

९४. कवर्गस्य चवर्गः ।

अभ्यासकवर्गस्य चवर्गो भवति यथासंख्यम् । चकार, चखान, जगाम, जघास, ऊङ्वे ।

९५. न कवते र्यङ्चेक्रीयिते ।

कवतेरभ्यासस्य चेक्रीयिते परे चवर्गो क भवति । कोकूयते खरः । सविकरण-निर्देशात् कौतिकुवत्योर्म्माभूत्—चोकूयते ।

९६. ह्रस्वः ।

स्वरान्तस्याभ्यासस्य ह्रस्वो भवति, तस्थौ, निनीषति, लुलूषति, डुढौके ।

९७. ऋवर्णस्याकारः ।

अभ्यास-ऋवर्णस्याकारो भवति । ववृधे, चक्रतुः ।

९८. दीर्घ इणः परोक्षायामगुणे ।

इणो धातोरभ्यासस्य परोक्षायामगुणे दीर्घो भवति । ईयतुः, ईयुः । कृत द्विर्वचने इयो बाधकं यत्वमिति वचनम् । अगुण इति किम् ? इयाय, इययिथ ।

९९. अस्यादेः सर्वत्र ।

परोक्षायां सर्वत्र गुणिन्यगुणे चाभ्यासस्यादेरस्य दीर्घो भवति । आट, आटतुः, आटिथ । अस्येति किम् ? इयेष, उवोष । आदेरिति किम् ? पपाच ।

१००. तस्मान्नागमः परादिरन्तश्चेत् संयोगः ।

तस्माद् दीर्घीभूतादभ्यासात् परादिर्नकारागमो भवति, धातोरन्तश्चेत् संयोग स्यात् परोक्षायां परतः। आनञ्ज, आनञ्जतुः, आनञ्जुः, आनर्च्छ, आनर्च्छतुः, आनर्च्छुः। तस्मादिति किम् ? आञ्छ, आञ्छतुः, आञ्छुः। नायमकारलोपस्य बाधको दीर्घः। अन्तश्चेत् संयोग इति किम् ? आटतुः।

१०१. ऋकारे च ।

तस्माद् दीर्घीभूतादभ्यासात् परादिर्नकारागमो भवति ऋकारे च परोक्षायाम्। आनृधे, आनृधाते, आनृधिरे। कथमारतुः निमित्ताभावात्।

१०२. अश्नोतेश्च ।

तस्माद् दीर्घीभूतादभ्यासादश्नोतेश्च परादिर्नकारागमो भवति परोक्षायां परतः। व्यानशे, व्यानशाते, व्यानशिरे। सविकरणनिर्देशात् अश्नोतेर्न स्यात्—आशतुः।

१०३. भवतेरः ।

भवतेरभ्यासस्य परोक्षायामकारो भवति, बभूव, बभूवतुः, बभूवुः।

१०४. निजि-विजि-विषां गुणः सार्वधातुके ।

निज्यादीनामभ्यासस्य सार्वधातुके परे गुणो भवति अर्थादिकारस्य। नेनेक्ति, नेनिज्यात्, वेवेक्ति, वेविज्यात्, अनेनक्, अवेवक्, वेवेष्टि, वेवेष्टुः।

१०५. भृञ्– हाङ्— माङामित् ।

भृञ्-हाङ् माङामभ्यासस्य सार्वधातुके परे इद्भवति - बिभर्ति, बिभृयात्, जिहीते, अजिहीत, मिमीते, अमिमीत।

१०६. अर्त्ति-पिपर्त्योश्च ।

अनयोरभ्यासस्य सार्वधातुके परे इद्भवति। इयर्त्ति, इयृयात्, पिपर्त्ति, पिपृयात्, पृथग्योगो वैचित्र्यार्थः।

१०७. सन्यवर्णस्य ।

सनि परे योऽभ्यासस्तस्यावर्णस्येद् भवति, पिपक्षति, पिपासति। सन्यभ्यासस्येति किम् ? पापचिषते।

१०८. उवर्णस्य जान्त-स्था-पवर्ग-परस्यावर्णे ।

सनि परे योऽभ्यासस्तस्योवर्णस्य जान्त-स्था-पवर्गस्यावर्णे परे 'इत्' भवति। जु-इति सौत्रोऽयं धातुः—जिजावयिषति, यु—यियविषति, यियावयिषति, रु—रिरावयिषति, लूञ्—लिलावयिषति। पूञ्— पिपावयिषति। पूङस्तु पिपविषते, भू—बिभावयिषति। उवर्णस्येति किम् ? बोभविषति। वचनमिदं

ज्ञापनार्थं—इनि यत् कृतंतत् सर्वं स्थानिवदिति, तेन—जुहावयिषतीत्येवमादयः सिद्धाः। श्रु-स्रु-द्रु-प्रु-प्लु-च्युङां वा वक्तव्यम्—शिश्रावयिषति, शुश्रावयिषति, सिस्रावयिषति, सुस्रावयिषति, दिद्रावयिषति, दुद्रावयिषति, पिप्रावयिषति, पुप्रावयिषति, पिप्लावयिषति, पुप्लावयिषति, चिच्यावयिषति, चुच्यावयिषति।

१०९, गुणश्चक्रीयिते।

चेक्रीयिते परे योभ्यासस्तस्य गुणो भवति। चेचीयते, पोपूयते, बेभिदिता, वर्णान्त्वान्नामिन एव।

११०. दीर्घोऽनागमस्य।

चेक्रीयिते योऽभ्यासस्तस्यानागमस्यदीर्घो भवति। पापच्यते। अनागमस्येति किम्? वनीवच्यते, वरीवृश्च्यते, अनागमस्येतिवचनमभ्यासविकारेष्वपवादो नोत्सर्गं बाधत इति ज्ञापनार्थं, तेन—मीमांसते इत्यादयः सिद्धाः।

१११. वञ्चि-स्रंसि-ध्वंसि-भ्रंसि-कसि-पति-पदि-स्कन्दामन्तो नीः।

एषाञ्चेक्रीयिते योऽभ्यासस्तस्यान्तो नीर्भवति। वनीवच्यते, सनीस्रस्यते, दनीध्वस्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते, दीर्घं विधानाद् गुणो नाशङ्क्यते।

११२. अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य।

अनुनासिकान्तस्य धातोश्चेक्रीयिते योऽभ्यासस्तस्यातोऽन्तोऽनुस्वारो भवति। बंभण्यते, बंभंणिता, यंयम्यते, यंयमिता। तकार उच्चारणार्थः। प्रतिपदोक्तग्रहणात्—बाभाम्यते। पुनरन्तग्रहणमनुस्वारस्यापि स्थित्यर्थम्।

११३. जपादीनाञ्च।

जप इत्येवमादीनां चेक्रीयिते योऽभ्यासस्तस्यातोऽन्तोऽनुस्वारो भवति। जंजप्यते, जंजपिता। जंजभ्यते, जंजभिता। जप-जभ-दह-दन्श-भन्ज-पश षडेते जपादयः।

११४. चरफलोश्च परस्यास्य।

चरफलोश्चेक्रीयिते योऽभ्यासस्तस्यातोऽन्तोऽनुस्वारो भवति, परस्योच्च भवति। चंचूर्यते, चंचूरिता, पंफुल्यते, पंफुलिता।

११५. ऋमतो रीः।

ऋमतो धातोश्चेक्रीयिते योऽभ्यासस्तस्यातोऽन्तोरीर्भवति। मरीनृत्यते, परीपृच्छ्यते।

११६. आलोपे समानस्य सन्वल्लघुनि चण्परे ।

समानसंज्ञकस्यालोपे सति लघुनि धात्वक्षरेऽभ्यासस्य इनि चण्परे सन्वत् कार्यंम्भवति। अपीपवत्, अलीलवत्, अशिश्रवत्। अलोपे समानस्येति किम् ? अचकथत्, कथं पटुमाख्यातवान्, अपीपटत्, वृद्धौ सन्ध्यक्षरलोप:। 'लघूनि' इति किम् ? अततक्षत्। कथमजीजागरत् ? अनेकवर्णव्यवधानेऽपि लघुनि स्यादेवेति मतम् "अत त्वरादीनाञ्चे" ति वचनात्। इनीति किम् ? अचकमत। इनीति जाति निर्देशात् वादितवन्तं प्रयोजितवान्—अवीवदत् वीणां परिवादकेनेति इनीनो लोपेऽपि स्यात्, चण्पर इति किम् ? विरमयिषति, दीर्घो लघोर्माभूत्।

११७. दीर्घो लघोः।

समानसंज्ञकस्यालोपे सति लघ्वन्तस्याभ्यासस्य लघूनि धात्वक्षरे इनि चण्परे दीर्घो भवति। अपीपहवत्, अजूहुवत्, लघोरिति किम् ? अतित्रपत्।

११८. अत् त्वरादीनाञ्च।

त्वरादीनामभ्यासस्य लघुनि धात्वक्षरे इनि चण्परेऽद् भवति। अतत्वरत्, असस्मरत्। त्वर, स्मृ, दृ, प्रथ, स्तृ, स्पश, वा, वेष्टि, चेष्टि, ईच्चगणः।

११९. इतो लोपोऽभ्यासस्य।

इतः सूत्रादारभ्य अभ्यासस्य लोपो भवत्यधिकृतं वेदितव्यम्, तेन पूर्वोक्त सन्वद्भावे सत्ययं न स्यात्। अभीमवत्, अदीदवत्। पुनरभ्यासग्रहणं समस्त लोपार्थम्।

१२०. सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य।

मिञादीनां स्वरस्य सनि परे इमादेशो भवति अभ्यासलोपश्च। डुमिञ्—मित्सति। माञ्-मीङ् वा—प्रमित्सति। मा इति मेङ्माङोरपि ग्रहणम्। प्रमित्सते, अपमित्सते,। दासंज्ञकः—दित्सति, धित्सति। रभ् आरिप्सते। लभ् आलिप्सते। शकॢ शक—शिक्षति। पतॢ—पत—पित्सति। पद—पित्सते। कथं पिपतिषति ? सनीति द्विसकारोऽयं निर्देशो व्यक्तिर्वेति। प्रतिरित्सतीति वक्तव्यम्। प्रतिपूर्वो राधो हिंसायाम्।

१२१. आप्नोतेरी:।

आप्नोतेः स्वरस्य ईर्भवति सनि परेऽभ्यासलोपश्च। ईप्सति, ऋधिज्ञप्योरीरीतौ वक्तव्यौ सनि सकारादौ। ईर्त्सति, ज्ञीप्सति।

१२२. दम्भेरिच्च।

दम्भेः स्वरस्य इद्भवति चकारादीच्च सनि परेऽभ्यासलोपश्च। धिप्सति,

धीप्सति । सनि सकारादाविति ? दिदम्भिषति । मुचोऽकर्मकस्योद्वा वक्तव्यः । मोक्ष्यते वत्सः स्वयमेवः । मुमुक्षते वत्सः स्वयमेव—आनुकूल्यात् कर्मकर्त्तृत्वम् ।

१२३. दिगि दयते परोक्षायाम् ।

देङः परोक्षायां दिग्यादेशो भवति अभ्यासलोपश्च । तिपा धातुरेव निर्दिश्यते । दिग्ये, दिग्याते, दिग्यिरे । दय-दान-इत्यस्यामा व्यवधानात् दयाञ्चक्रे ।

इति दौर्गसिंह्यां वृत्तावाख्याते तृतीयः पादः समाप्तः ।

———

चतुर्थः पादः

१२४. सपरस्वरायाः सम्प्रसारणमन्तस्थायाः ।

सह परेण धातुस्वरेणान्तस्थायाः सम्प्रसारणं भवत्यधिकृतं वेदितव्यम् । परेणैव सस्वरत्वं लोकतः सिद्धम्, परग्रह्णं स्पष्टार्थम् । सम्प्रसारणं य्वृतोऽन्तस्थानिमित्ता नित्यत्वेन स्थिना अन्वाख्यायन्ते । अन्तस्थाग्रहणमभ्यासविकारबाधनार्थम्, तेन विव्यथे विव्याध, इत्यादीनां यस्याभ्यासे सम्प्रसारणं सिद्धम् ।

१२५. ग्रहि-ज्या-वयि-व्यधि, वष्टि-व्यचि-प्रच्छि-व्रश्चि-भ्रस्जीमगुणे ।

ग्रह्यादीनामन्तस्थायाः सपरस्वरायाः सम्प्रसारणं भवति अगुणे प्रत्यये परे । गृह्यते, गृह्णाति, जीयते, जिनाति, ऊयतुः, ऊयुः । 'न वा श्वयोरगुणे' ति प्रतिषेधबाधनार्थं वेञो वयिरुच्यते । विध्यते, विध्यति, उष्टः, उशन्ति, विच्यते, विचतिकुटादित्वादगुणत्वम् । कथमुरुव्यचा, असुन् ? औणादिकत्वात् । पृच्छ्यते, पृच्छति । कथं प्रश्नः ? 'प्रश्नाख्यानयो' रिति वचनात् । वृश्च्यते, वृश्चति, भृज्ज्यते, भृज्जति । अगुण इति किम् ? ग्रहीता ।

१२६. स्वपि-वचि-यजादीनां यण् परोक्षाशीःषु ।

स्वपिवच्योर्यजादीनामन्तस्थायाः संप्रसारणं भवति यणि परोक्षायामाशिषि चागुणे परतः । सुप्यते, सुषुपतुः, सुप्यात्, उच्यते, ऊचतुः, उच्यात्, इज्यते, ईजतुः, इज्यात् ।

"यजो वपो वहश्चैव वेञ्‌ व्येञौ ह्वयतिस्था ।
यद वसो श्वयति श्चैव नव यजादयः स्मृताः ॥"

१२७. परोक्षायामभ्यासस्योभयेषाम् ।

उभयेषां ग्रह्यादिस्वपादीनामभ्यासस्यान्तस्थायाः सपरस्वरायाः संप्रसारणं भवति परोक्षायां परतः । गुण्यर्थोऽयम् । जग्राह जग्रहिथ, जिज्यौ, जिज्यिथ, उवाय,

उवयिथ। स्वपादीनाञ्च—सुस्वाप, सुष्वपिथ, उवाच, उवचिथ, इयाज, इयजिथ। परोक्षायामिति किम् ? विवक्षति, वावच्यते।

१२८. व्यथेश्च।

व्यथेरभ्यासस्यान्तस्थायाः सपरस्वरायाः संप्रसारणं भवति परोक्षायां परतः। विव्यथे, विव्यथाते, विव्यथिरे। परोक्षायामिति किम् ? वाव्यथ्यते।

१२९. न वाश्व्योरगुणे च।

वेञ्श्वीत्येतयोरभ्यासस्यान्तस्थायाः सपरस्वरायाः संप्रसारणं न भवति, अगुणे गुणिनि च परोक्षायां परतः। ववौ, ववतुः, ववुः वविथ। शिश्वाय, शिश्वियतुः, शिश्वियुः, शिश्वयिथ। अगुण इति वचनाद् वेञोऽनभ्यासस्यापि गृह्यते। श्वयतेर्वेति परस्य विभाषास्त्येव।

१३०. स्वपि-स्यमि-व्येञां चेक्रीयिते।

एषामप्राप्तं सम्प्रसाणं भवति चे क्रीयिते परे। सोसुप्यते, सेसिम्यते, वेवीयते।

१३१. स्वापेश्चणि।

स्वापेरिनन्तस्य चणि संप्रसारणं भवति। असूषुपत्, स्वापेरिनन्तस्येति किं ? स्वापमकरोत् असुषुपत्।

१३२. ग्रहि-स्वपि-प्रच्छां सनि।

एषां सनि परे संप्रसारणं भवति। जिघृक्षति, सुषुप्सति, पिपृच्छिषति।

१३३. चायः किश्चेक्रीयिते।

चायश्चेक्रीयिते परे किर्भवति। चेकीयते।

१३४. प्याय पिः परोक्षायाम्।

प्यायश्चेक्रीयते परे परोक्षायाञ्च पिर्भवति। पेपीयते, आपिप्ये, आपिप्याते, आपिप्यिरे।

१३५. श्वयतेर्वा।

श्वयतेश्चेक्रीयते परे परोक्षायाञ्च संप्रसारणं भवति वा। शोशूयते, शेश्वीयते, शुशाव, शुशुवतुः, शिश्वाय, शिश्वियतुः।

१३६. कारिते च संश्चणोः।

श्वयतेः संश्चणोर्यत् कारितं तस्मिन् संप्रसारणं भवति वा। शुशावयिषति, शिश्वाययिषति, अशूशवत् अशिश्वयत्। इनि कृतस्य स्थानिवद्भावात् शुद्विर्वचनम्।

१३७. ह्वयतोर्नित्यम् ।

ह्वयते संश्चणोर्यत् कारितं तस्मिन्नित्यं सम्प्रसारणं भवति । जुहावयिषति, अजूहवत् । द्विवंचन निर्मित्तं कारितव्यवधाने एव तथा स्यादिति वचनम्, तेन— ह्वायकयितुमिच्छति—जिह्वायकयिषति, अजह्वायकदिति ।

१३८. अभ्यस्तस्य च ।

ह्वयतेरभ्यासमात्रस्यान्तस्थायाः संप्रसारणं भवति । जुहाव, जुहूषति, जोहूयते ।

१३९. द्युतिस्वाप्योरभ्यासस्य ।

द्युतिस्वाप्योरभ्यासस्यान्तस्थायाः संप्रसारणं भवति । दिद्युते, देद्युत्येते, दिद्योतिषते, अदिद्युतत्, सुस्वापयिषति । स्वापेरिनन्तस्य ग्रहणान्न यङादौ । तेन सिष्वापयिषति ।

१४०. न संप्रसारणे ।

संप्रसारणे कृते पुनः संप्रसारणं न भवति । विध्यते, वेविध्यते, विव्यधे, विविधतुः, विविधुः, संविव्यतुः, संविव्युः । एकदेशविकृतस्यानन्यवद्भावाद् व्यक्तौ जातौ च वचनम् ।

१४१. वशेश्चेक्रीयिते ।

वशेश्चेक्रीयिते परे संप्रसारणं न भवति । वावश्यते ।

१४२. प्रच्छादीनां परोक्षायाम् ।

प्रच्छि-व्रश्चि-भ्रस्जीनां परोक्षायां सम्प्रसारणं न भवति । पप्रच्छतुः, पप्रच्छुः, वव्रश्चतुः, बभ्रज्जतुः, बभ्रज्जुः ।

१४३. सन्ध्यक्षरान्तानामाकारोऽविकरणे ।

सन्ध्यक्षरानां धातूनामविकरणविषये आकारो भवति । धेट्-धाता, ग्लै—ग्लाता, म्लै—म्लाता, दो—दाता । सुग्ल, सुम्लः—उपसर्गे त्वातो डः स्यात् । अन्तग्रहणं धातुसंज्ञाकाले सन्ध्यक्षरार्थम्, तेन—चेता, स्तोता । अविकरण इति किं । ग्लायति ।

१४४. न व्ययतेः परोक्षायम् (याम्) ।

व्येञो धातोः परोक्षायामाकारो न भवति । संविव्याय, संविव्ययिथ, अगुण संप्रसारणमस्त्येव ।

१४५ मीनाति-मिनोति-दीङां गुण वृद्धिस्थाने ।

एषां गुण वृद्ध्योः प्रसङ्गे आकारो भवति। मीञ्-प्रमिता, प्रमापयति। डुमिञ्-निमाता, निमापयति। दीङ्—उपदाता, उपदापयति। उपदायो वर्त्तते, 'इङाभ्याञ्चे' ति घञ् स्यात्। गुणवृद्धिस्थानइति किम् ? प्रमीयते। वर्णान्तस्य विधित्वादभ्यासस्य न स्यात्—प्रमेमीयते।.

१४६. सनि दीङः ।

दीङः सन्याकारो भवति। उपदिदासते। नाम्यन्तानामनिटामित्यगुणत्वात् वचनम्।

१४७. स्मि-जि-क्रीङामिनि ।

एषां धातूनामिनि परे आकारो भवति। विस्मापयते, जापयति, क्रापयति, अध्यापयति। हेतुकर्त्तृभये स्मिङोऽभिधानात् कुञ्चिकयैनं विस्माययति—करणादृभये न स्यात्। भातिरिनन्तो हेतुभयेऽपि वर्त्तते—मुण्डो भापयते। भीषिचिन्तीति वचनाद्भियः षान्तता,—मुण्डो भीषयते। विस्फुरणं विस्फारस्तं करोतीतीन्—विस्फारयति, विस्फोरयति—हेतुकर्त्त विवक्षायामिन्। चप सान्तवने, चयनेऽपि वृत्तिः—चापयति। चिञ्स्तु—चाययति। डुवपि प्रजनेऽपि—पुरोवातो गाः प्रवापयति, वी प्रजने-प्रवाययति—गर्भं ग्राहयतीत्यर्थः। तपः साधयति, धर्म्मं साधयति—इति पारलौकिकेऽपि साधिना भवितव्यमेव। षिधु गत्यामित्यनेन च—अन्नं सेधयति, ग्रामं सेधयति, इति भवितव्यमेव, श्येनो वर्त्तिकामुल्लापयते – लातेरेवायं प्रयोगः विसंवादाभिभवयोर्लियः कारिते प्रयोगो नास्त्यनभिधानात्, रुचादिरयम्। विलाता, विलेता, विलास्यत, विलेष्यते, विलाय, विलीय, लातेर्लियश्च प्रयोगोऽनेकार्थत्वाद्धातूनामेति।

१४८. सृजिदृशोरागमोऽकारः स्वरात् परो धुटि गुणवृद्धिस्थाने ।

सृजिदृशोः स्वरात् परो धुड़ादौ प्रत्यये गुणवृद्ध्योः प्रसङ्गेऽकारागमो भवति। सृज—स्रष्टा, अस्राक्षीत्। दृश्—द्रष्टा, अद्राक्षीत्। धुटीति किं ? ससर्ज्ज, ददर्श। गुणवृद्धिस्थान इति किं ? सृक्षीष्ट, दक्षीष्ट। योगविभागात् स्पृशादीनां वा-स्पृश—स्प्रष्टा, अस्प्राक्षीत्। दृप—दृप्ता, अद्राप्सीत्। पक्षे स्पर्ष्टा, अस्पार्क्षीदित्यादि।

१४९. दीङोऽन्तो यकारः स्वरादावगुणे ।

दीङोऽन्तोयकारो भवति स्वरादावगुणे परे। उपदिदीये। उपदिदीयाते, उपदिदीयिरे। दीङोऽवयवत्वेन द्विर्वचनं स्यादात्वञ्च न स्यात्।

१५०. आलोपोऽसार्वधातुके ।

धातोराकारस्य लोपो भवति असार्ववातुके स्वरादावगुणे प्रत्यये परे। पपुः, तस्थुः, गोदः, संस्था, अगुण इति किं ? दानम्। स्वरादाविति किं ? ग्लायते। असर्वधातुक इति किं ? यान्ति।

१५१. इटि च ।

धातोराकारस्य लोपो भवति इटि परे । पपिथ, ददिथ । इटीति किम् ? पपाथ । गुण्यर्थमिदम् ।

१५२. दा-मा-गायति-पिबति-स्था-स्याति जहातीनामीकारो व्यञ्जनादौ ।

दासंज्ञक-मारुप-गायति पिबति स्था स्यति जहातीनामन्त इकारो भवति, असार्वधातुके व्यञ्जनादावगुणे परे । दीयते, धीयते, मीयते, गीयते । गायतीति निर्देशाद् गाङ् गताविटयस्य गायति इति भवितव्यमेव । पीयते । पातेस्तु न स्यात्-पायते । स्थीयते, अवसीयते । स्यतीति निर्देशात्-सायते, सासायते, सनोतेयं वात्वम् । हीयते हाङस्तु—हायते ।

१५३. आशिष्येऽकारः ।

दामादीनामाशिष्यगुणे व्यञ्जनादौ परतः एकारो भवति । देयात्, धेयात्, मेयात्, गेयात्, पेयात्, स्थेयात, अवसेयात्, हेयात् । अगुण इति किम् ? दासीष्ट, धासीष्ट । वा संयोगादेरस्य इति वक्तव्यम्-ग्लेयात्, ग्लायात्, म्लेयात्, म्लायात् । अस्य इति किम् ? स्येयात् ।

१५४. अन उस् सिजभ्यस्त-विदादिभ्योऽभुवः ।

सिजभ्यस्तविदादिभ्यो भूवर्जितेभ्य परस्यामन उसादेशो भवति । सिचः—अकार्षुः, ददुः, अदुः । परस्य न लुग्लोप इति । अभ्यस्तात्—अददुः, अजुहवुः, अनेनिजुः, विदादयः - विद-ज्ञाने आदन्त—द्विषः, अविदुः, अरुः, अलुः, अद्विषुः । गणकृतमनित्यमिति, या स्यात् ह्यस्तन्यन् एवार्थात्—अविदन्, अगान्, अलान्, अद्विषन् । अभूब इति किम् —अभूवन् ।

१५५. इचस्तलोपः ।

इचस्तप्रत्ययस्य सर्वस्य लोपो भवति । अपादि, अलावि । इचस्त इति किम् ? अकारितराम् ।

१५६. हेरकारादहन्ते ।

धातोर्विहितस्य हेरकारात् परस्य लोपो भवति अहन्तेः । पच, पठ, भव, दीव्य । हेर्व्यक्तित्वात्—पचतात् । अकारादिति किम् ? याहि । अहन्तेरिति किम् ? जहि शत्रून्, सन्निपातलक्षणस्य वर्णग्रहणेऽनिमित्तत्वात् ।

१५७. नोश्च विकरणादसंयोगात् ।

नोश्च विकरणादसंयोगात् परस्य हेर्लोपो भवति चिनु, सुनु । विकरणादिति किम् ? नुहि । असंयोगादिति किम् ? राध्नुहि ।

१५८. उकाराच्च ।

उकाराच्च विकरणात् परस्य हेर्लोपो भवति । तनु, कुरु । विकरणादिति किम् ? नुहि ।

१५९. उकारलोपो वमोर्वा ।

असंयोगाच्च परस्य विकरणस्योकारस्य लोपो भवति वा वमोः परतः । सुन्वः, सुनुवः, सुन्मः, सुनुमः । तन्वः, तनुवः, तन्मः, तनुमः, आद्यन्तवद्भावात् । सुनोमि तनोमीति परत्वात् स्वरादेशत्वाद्वा सिद्धम् ।

१६०. करोतेर्नित्यम् ।

करोतेः परस्य विकरणोकारस्य नित्यं लोपो भवति वमोः परतः । कुर्वः, कुर्मः ।

१६१. ये च ।

करोतेर्नित्यं विकरणोकारस्य लोपो भवति ये च परतः । कुर्यात्, कुर्यास्ताम्,

१६२. अस्योकारः सार्वधातुकेऽगुणे ।

करोतेरकारस्यागुणे सार्वधातुके परे उकारो भवति । कुरुतः, कुर्वन्ति । कथं कुरु ? प्रत्ययलोपलक्षणत्वात्, गुणेनैव स्वरुप-निर्देशात् । सार्वधातुक इति किम् ? सञ्चस्कुरु । अगुण इति किम् ? करोमि ।

१६३. रुधादेर्विकरणस्य लोपः ।

रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे । रुन्धः, रुन्धन्ति, भिन्तः, भिन्दन्ति । अगुण इति किम् ? रुणद्धि, भिनत्ति ।

१६४. अस्तेरादेः ।

अस्तेरादेवयवस्य लोपो भवति अगुणे सार्व्वधातुके परे । स्तः, सन्ति । अगुण इति किम् ? अस्ति ।

१६५. अभ्यस्तानामाकारस्य ।

अभ्यस्तसंज्ञकानामाकारस्यागुणे सार्व्वधातुके परे लोपो भवति । मिमते, मिमताम्, जिहते, जिहताम् दत्ते, धत्तं । अगुण इति किं ? जहाति ।

१६६. क्र्यादीनां विकरणस्य ।

क्र्यादीनां विकरणस्य सार्व्वधातुके परे विकरणस्याकारस्य लोपो भवति । क्रीणते, क्रीणन्ति, प्रीणते, प्रीणन्ति । कथं स्तम्भनान्ति इति । उपलक्षणत्वात् । क्र्यादीनामिति किं ? दीव्यामः । विकरणस्येति सुखप्रतिप्रत्ययम् । अगुण इति किं ? क्रीणाति ।

१६७. उभयेषामीकारो व्यञ्जनादावदः ।

राश्यपेक्षयोभयशब्दो व्यक्तयपेक्षया बहुवचनम् । उभयेषामभ्यस्तक्र्यादि विकरणानां दावर्जितानामाकारस्य व्यञ्जनादावगुणे सार्वधातुके परे इकारो भवति । मिमीते, जिहीते, लुनीते, पुनीते । व्यञ्जनादाविति किं ? मिमते, क्रीणते । अगुण इति किम् ? जहाति, क्रीणाति । सार्वधातुक इति किम् ? लालायते । अद इति किम् ? दत्से, धत्से ।

१६८. इकारो दरिद्रातेः ।

दरिद्रातेराकारस्यागुणे सार्व्वधातुके व्यञ्जनादाविकारो भवति । दरिद्रितः, दरिद्रिथः । सार्व्वधातुक इति किम् ? दरिद्राणं, दरिद्रायकः, दिदरिद्रासति । व्यञ्जनादा-मिति किं ! दरिद्रति । अगुण इति कि? दरिद्राति । भियो वेति वक्तव्यम् ।— बिभितः, बिभीतः ।

१६९. लोपः सप्तम्यां जहातेः ।

जहातेराकारस्य सप्तम्यामगुणे लोपो भवति । जह्यात्, जह्याता जह्युः । व्यञ्जनादावगुणे सार्वधातुके इत्वं वा वक्तव्यम् ।—जहितः, जहीतः । हौ चात्वमित्व-मीत्वञ्चेष्टम् ।—जहाहि, जहिहि, जहीहि ।

१७०. घुटि हन्तेः सार्व्वधातुके ।

हन्तेर्घुडागमो सार्व्वधातुकेऽगुणे हन्तस्य लोपो भवति । हतः, हथः, आहते, आहताम् । घुटीति किम् ? हन्वः, हन्मः, अगुण इति किम् ? हन्ति । प्रतिषिद्धेटां मध्ये हन्तरेव सार्व्वधातुके सम्भवदर्शनार्थमिदम् ।

१७१. शासेरिदुपधाया अण् व्यञ्जनयोः ।

शासेरुपधायाः इद्भवति अणि व्यञ्जनादावगुणे प्रत्यये परे । अन्वशिषत्, शिष्यते, शिष्टः । कथं मित्रं शास्तीति—मित्रशीः ? विलोपात् स्वरादेशो विधिर्बल-वानिति । अणा सहचरितः शासिरिह गृह्यते—आशास्ते, आशास्यमानः कथमाशीः ? ज्ञापकात् ।

१८२. हन्तेर्ज्जं हौ ।

हन्तेर्ज्जकारो भवति हौ परे । जहि शत्रून् । हेर्व्यक्तित्वात्—हतात् । परत्वात्तातम् ।

१७३. दास्त्योरेऽभ्यासलोपश्च ।

दासंज्ञकस्यास्तेश्च हौ परेऽन्तस्यैकारो भवति, अभ्यासलोपश्च यथा सम्भवम् । देहि, धेहि, अस्—एधि । अलोपश्चेति सिद्धे अभ्यासग्रहणं समस्तलोपार्थम् ।

१७४. अस्यैकव्यञ्जनमध्येऽनादेशादेः परोक्षायाम् ।

अगुणे परोक्षायां परतोऽनादेशादेर्धातोरस्यैकव्यञ्जनमध्यगतस्यैत्वम्भवति, अभ्यासलोपश्च । पेचतुः, पेचुः, नेमतुः नेमुः, सेहे । चकाराधिकात् क्वचिद् दीर्घोऽपि गृह्यते ।—अपपूर्वो राध हिंसायाम्—अपरेधतुः । हिंसायामित्येव, आरराधतुः ।

राजि भ्रजिभ्राशि—भ्लाशीनां वा वक्तव्यम् ।—रेजतुः, रराजतुरित्यादि । अन्यत्र न भवति—चकाशे । थलि च सेट्यप्येवम्—रेजिथ, रराजिथ । असहायव्यञ्जनमध्यगतस्येति किं ? ततक्षतुः । अनादेशादेरिति किम् ? बभणतुः । अगुण इति किम् ? अहं पपच ।

१७५. थलि च सेटि ।

थलि च सेटि परतोऽनादेशादेर्धातोरस्यैकव्यञ्जनमध्यगतस्यैत्त्वम्भवति, अभ्यासलोपश्च । पेचिथ । नेमिथ । सेटीति किम् ? पपक्थ । अनादेशादेरिति किम् ? बभनिथ । एकव्यञ्जनमध्यगतस्येति किं ? विव्ययिथ ।

१७६. तॄ-फल-भज-त्रप-श्रन्थि-ग्रन्थि-दम्भीनाञ्च ।

तॄ—प्रभृतीनामत एत्त्वम्भवति, अभ्यासलोपश्च, परोक्षायामगुणे थलि च सेटि परतः । गणादेशादिसहायव्यञ्जनत्वाद्वचनम् । तेरतुः, तेरिथ; फेलतुः, फेलिथ; भेजतुः, भेजिथ; त्रेपे, त्रेपाते, त्रेपिरे; श्रेथतुः ग्रेथतुः, देभतुः । अनुषङ्गलोपिनां मध्ये दम्भेरेवेति नियमात्—ममन्थवान् । निरनुषङ्ग साहचर्यात्—शश्रन्थिथ, जग्रन्थिथ, ददम्भिथ इत्यनुषङ्गिनां न स्यात् । अगुण इति किं ? अहं ततर । जॄ—भ्रमु—त्रसि—स्वन—फण स्यमां वा वक्तव्यम् ।—जेरतुः, जजरतुः, जेरिथ ज जरिथ ।

१७७. न शस-दद-वादि-गुणिनाम् ।

शसेर्ददेर्वकारादीनां गुणिनाञ्च धातूनामेत्वमभ्यासलोपश्च न भवति अगुणे परोक्षायां थलि च से सेटि परतः । विशशसतुः, विशशसिथ, ददद‍े, ददाते, ददिरे, ववमतुः ववमिथ, विशशरतुः, विशशरिथ, निनयिथ ।

१७८. स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ ।

स्वरादावगुणे प्रत्यये पदे इवर्णोवर्णान्तस्य धातोरियुवौ भवतः, निर्दिष्टस्य स्थानिन एवान्तरतम्यात् । शिश्रियतुः, [शिश्रियुः] चिक्रियतुः (चिक्रियुः) चक्षुवतुः; (चुक्षुवुः); पुपुवतुः (पुपुवुः) युवन्ति, द्रुवन्ति, लुवन्ति । स्वरादाविति किं ? श्रीयात्, लूयात् । अगुण इति किं ? श्रयिता, लविता । धातुग्रहणमप्युत्तरार्थमेव ।

१७९. अभ्यासस्यासवर्णे ।

इवर्णोवर्णान्तस्य धातोरभ्यासस्यासवर्णे स्वरे इयुवौ भवतः । इयेष, उवोष, इययात । असवर्ण इति किम् ? ईषतुः, ऊषतुः ।

१८०. नोर्विकरणस्य ।

विकरणस्य नोरुकारस्यागुणे स्वरादावुव् भवति आन्तरतम्यात् । प्राप्नुवन्ति, प्राप्नुवन्तु, शक्नुवन्ति शक्नुवन्तु, नोरिति किम् ? क्षण्वन्ति । विकरणस्येति किम् ? तन्वन्ति ।

१८१. य इवर्णस्यास्यासंयोगपूर्वस्यानेकाक्षरस्य ।

अनेकाक्षरस्य धातोर्य इवर्णस्तस्यासंयोगपूर्वस्य यकारो भवति स्वरादावगुणे परे । विव्यतुः, विव्युः, निन्यतुः, निन्युः, दिग्यिरे, निन्यिरे । असंयोगपूर्वस्येति किम् ? अप्रीयते ।

१८२. इणश्च ।

इणो धातोरगुणे स्वरादौ यकारो भवति । यन्ति, यन्तु । चकारोऽनुक्त-समुच्चयार्थः, तेन इकोऽपि स्यात्—अधियन्ति, अधियन्तु ।

१८३. नोर्वकारो विकरणस्य ।

नोर्विकरणस्यासंयोगपूर्वस्य स्वरादावगुणे वकारो भवति । सुन्वन्ति, चिन्वन्ति । विकरणस्येति कि ? नुवन्ति, नोनुवः । असंयोगपूर्वस्येति किं ? तक्ष्णुवन्ति ।

१८४. जुहोतेः सार्वधातुके ।

जुहोतेरुकारस्य स्वरादावगुणे सार्वधातुके परे वकारो भवति । जुह्वति, जुह्वतु । अगुण इति किम् ? जुहवानि [सार्वधातुक इति किं ? जुहुवुः] स्वरादाविति किम् ? जुहुयात् ।

१८५. भुवो वोऽन्तः परोक्षाद्यतन्योः ।

भुवो धातोरन्तो वकारो भवति परोक्षाद्यतन्योः स्वराद्योः परतः । बभूव, बभूवतुः, बभूवुः, बभूविथ, अभूवन्, अभूवम् । पुनर्वकारो गुणवृद्धिबाधनार्थः, नित्यत्वेदगुणाधिकारः स्यात् । स्वराद्योरिति किम् ? अभूत्, बभूवान् । बभूवुष इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति ।

१८६. गोहेरूदुपधायाः ।

गोहेः कृतगुणस्य स्वरादौ परतः उपधाया ऊद्भवति । गूहति, गूहिता, गूहकः । कृतगुणस्येति जुगुहुः । उपधाग्रहणमुत्तरार्थञ्च ।

१८७. दुषेः कारिते ।

दुषेरुपधाया ऊद्भवति कारिते परे । दूषयति । कारित इति किं ? दोषो वर्त्तते । कारित इति संज्ञापूर्वकत्वाद् वा चित्तविकारे—चित्तं दूषयति, चित्तं दोषयति, प्रज्ञां दूषयति, प्रज्ञां दोषयति ।

१८८. मानुबन्धानां ह्रस्वः ।

घटादयो मानुबन्धान्वाख्याताः । तेषामुपधायाः कारिते परे ह्रस्वो भवति घटयति, व्यथयति । ह्रगे, ह्लगे, षगे, ष्ठगे संवरणे—ह्रगयति, ह्लगयति, सगयति, स्थगयति, कगे नोच्यते, अस्यायमर्थ इति नोच्यते—कगयति । चन् च, वनु च नोच्यते,

चन् च हिंसार्थः, वनु च कगेवत्—चनयति, वनयति। स्मृ आध्याने—स्मरयति चिन्तायाम्। अन्यत्र न भवति—विस्मारयति। जनी जॄष्क्नसुरञ्जोऽमन्ताश्च—जनी प्रादुर्भावे—जनयति। जॄष्—जरयति। क्नसु ह्वरणदीप्त्योः—क्नसयति। रन्ज रागे—रजयति मृगान्, रन्जेर्मृगरमणेऽनुषङ्गलोपः। अमन्ताश्च—रमयति, क्षमयति, भ्रमयति। ज्वल-ह्वल-ह्मल-नमोऽनुपसर्गात् वा।—ज्वलयति, ह्वलयति, ह्मलयति, नमयति। पक्षे—ज्वालयति, ह्वालयति, ह्मालयति, नामयति। सोपसर्गास्तु नित्यं मानुबन्धाः। ज्वल दीप्तौ घटादिः, प्रज्वलयति। तथा ह्वल ह्मल चलने—प्रह्वलयति, प्रह्मलयति। अमन्तत्वादुपनमयति। ग्लास्नावनुवमश्च।—ग्लपयति, ग्लापयति; स्नपयति, स्नापयति; वनयति, वानयति; वमयति, वामयति। अनुपसर्गा इति किम्? प्रग्लापयति, प्रस्नापयति, उपवनयति, उद्वमयति। न कम्यमिचमः—कामयति, आमयति, चामयति। शमोऽदर्शनेन—शमयति रोगान्। दर्शने तु न भवति,—निशामयति रूपम्। स्खदिरवपरिभ्यां च,—अवस्खादयति, परिस्खादयति, अवपरिभ्यामेवेति नियमादन्योपसर्गान्न भवति—प्रस्खादयति, उपस्खादयति। फण गतौ पठ्यते मानुबन्धश्च—फणयति। गतेरन्यत्र न भवति—फाणयति फाण्टम्। अन्ये सुगमा इति नोदाहृताः। कथमुद्घाटितः कपाटः, चौरस्योत्क्रामयति इति? घञन्तादिन्, संक्रामयतीति शन्तृङन्तादिन्।

१८९. इचि वा।

मानुबन्धानां धातूनामिचि कारिते परे ह्रस्वो भवति वा। अघटि, अघाटि, अव्यथि, अव्याथि। क्षञ्जि गतौ दाने च, दक्ष हिंसायाञ्चेति घटादिपाठबलादनुपधाया अपि दीर्घत्वम्, तेन—अक्षञ्जि, अक्षाञ्जि, अदक्षि, अदाक्षि।

१९०. जनिवध्योश्च।

इच् मात्रमिह वर्त्तते। जनिवध्योरिचि परे नित्यं ह्रस्वो भवति। अजनि, अवधि। यद्यपि बन्धने बधिस्तथापीचि हिंसायाम्। तथा च—भक्षकश्चेन्नास्ति वधकोऽपि न विद्यते। वधिः प्रकृत्यान्तरमित्येके।

१९१. ओतो यिन्नायी स्वरवत्।

ओतः परो यिन्नायी स्वरवद् भवतः। गव्यति, गव्यते। अवोऽपि न स्यात्, गवाजिनवदिष्टत्वात्।

१९२. औतश्च।

औतः परो यिन्नायी स्वरवद्भवतः। नाव्यति, नाव्यते। यथासंख्यभयात् पृथगुच्यते।

१९३. नाम्यन्तानां यणायियिन्नाशीश्च्विचेक्रीयितेषु ये दीर्घः।

नाम्यन्तानां धातूनां यणादिषु ये च्वौ च परतः आन्तरतम्यात् दीर्घो भवति। चीयते, मन्तूयति, अग्नीयते, पटूयति, चीयात्, चेचीयते। च्वौ च—पटूकरोति। य इति किम्? कृषीष्ट। नामीति सम्भवदर्शनार्थमिदम्।

१९४. इणोऽनुपसृष्टस्य।

इणो धातोरनुपसृष्टस्यैवाशिषि ये परे दीर्घो भवति। ईयात्, ईयात्, ईयास्ताम्। अनुपसृष्टस्यैवेति किम्? अन्वियात्। यणो व्यवहितपाठान्नेहानुवृत्तिरिति गम्यते। तेन समीयत इति नियमो न स्यात्।

१९५. ऋत ईदन्तश्च्विचेक्रीयितयिन्नायिषु।

ऋदन्तस्य च्विचेक्रीयितयिन्नायिषु परतः ईदन्तो भवति। मात्रीकरोति, जेह्रीयते, स्वस्रीयति, दुहित्रीयते। ऋत इति किम्? कृ-चेकीर्यते।

१९६. इरन्यगुणे।

ऋदन्तस्यानि विकरणेऽगुणे इकारोऽन्तो भवति। आद्रियत, आध्रियते। ऋत इति किम्? किरति, गिरति। अगुण इति किम्? स्मरति। आदेशादागमो विधिर्बलवानिति।

१९७. यणाशिषोर्ये।

ऋदन्तस्य यणाशिषोर्ये परे इकारोऽन्तो भवति। क्रियते, क्रियात्। य इति किम्? कृषीष्ट।

१९८. गुणोऽर्तिसंयोगाद्योः।

अर्तेः संयोगादेश्च धातोर्ऋतोर्यणाशिषोर्ये परे गुणो भवति। अर्यते, अर्यात्। स्मर्यते, स्मर्यात्। असिद्धं बहिरङ्गमन्तरङ्ग इति— संस्क्रियते, संस्क्रियात्।

१९९. चेक्रीयिते च।

अर्तेः संयोगादेश्च धातो ऋतश्चेक्रीयिते परे गुणो भवति। अराऱ्यते, सास्मर्यते।

२००. घ्राध्मोरीः।

घ्राध्मा इत्यप्येतयोश्चेक्रीयिते परे ईर्भवति जेघ्नीयते, देध्मीयते।

२०१. यिन्यवर्णस्य।

यिनि परेऽवर्णस्य ईकारो भवति। वस्त्रीयति, मालीयति। च्वौ च दीर्घो

भवति, मालीस्यात् । अशनायोदन्यधनायाः बुभुक्षापिपासाकांक्षासु निपात्यन्ते। अशनमिच्छति—भोक्तुम्—अशनायति, उदकमिच्छति पातुम्—उदन्यति, धनमिच्छति तृष्णक्—धनायति ।

२०२. अदेर्घस्लृ सनद्यतन्योः ।

अदे स्थाने घस्लृरादेशो भवति सनद्यतन्योः परतः । लृदणर्थः । जिघत्सति, अघसत् ।

२०३. वा परोक्षायाम् ।

परोक्षायां परतोऽदेर्घस्लृरादेशो भवति वा । जघास, जक्षतुः, आद, आदतुः । घस्लृ अदने, सौत्रोऽयं धातुर्भाषायां मरग्विषय एव ।

२०४. वेञश्च वयिः ।

वेञो धातो परोक्षायां परतो वयिरादेशो भवति वा । उवाय, ऊयतुः, ऊयुः, ववौ, ववतुः ववुः । इकारः स्वरूपग्राहकः ।

२०५. हन्तेर्वधिराशिषि ।

हन्तेर्वधिर्भवति अशिषि परतः । वध्यात्, वध्यास्ताम् ।

२०६. अद्यतन्यां च ।

हन्तेरद्यतन्यां च परतो वधिर्भवति । अवधीत्, अवधीष्टाम् । अनान्तत्वादिटि कृते वा दीर्घो न स्यात् इह, निर्देशस्य स्वरूपग्राहकत्वात् । वाशब्दो व्यवस्थावाचीह-स्मर्यते तेनात्मनेपदे वा—आहते, आहसाताम्, आवधिष्ट, आवधिषाताम् ।

२०७. इणो गा ।

इणो धातोर्गादेशो भवति अद्यतन्यां परतः । अगात्, अगाताम् । इण् वदिकोऽपि—अध्यगात् ।

२०८. इङः परोक्षायाम् ।

इङः परोक्षायां परतो गादेशो भवति । अधिजगे, अधिजगाते, अधिजगिरे । इङ इति किम् ? इट् इ गतौ, उदियाय । अद्यतनीक्रियातिपत्त्योर्वा गीरादेश इष्यते ।—अध्यगीष्ठ, अध्यगीष्यत, अध्यैष्यते । इनि संश्चणोर्गायतेरध्ययनेऽपि वृत्तिः—अधिजिगापयिषति, अध्यजीगपत् । इङस्तु—अध्यापिपयिषति, अध्यापिपत् ।

२०९. सनीणिङोर्गमिः ।

सनि परे इणिङोर्गमिरादेशो भवति । ग्रामं जिगमिषति, वेदानधिजिगांसते । गम्लृ बोधने सनि नाभिधीयते चेत्तथायमपि । अर्थान् प्रतीषिषति । इट् इ गतौ,

बोधनेऽपि दृश्यते । गमयति, गमिनैव सिद्धम् । अर्थान् प्रत्याययति । शास्त्रमध्यापयतीति भवितव्यमेव ।

२१०. अस्तेर्भूरसार्व्वधातुके ।

अस्तेर्भूरादेशो भवति असार्व्वधातुकेविषये । भविता, भूतः । भव्यं—स्वराद् यः । तिपा निर्देशः किम् ? असिता ।

२११. ब्रुवो वचिः ।

ब्रुवो धातोर्व्वचिरादेशो भवति असार्वधातुकविषये । वक्ता वक्ष्यति, वाच्यम्—"ऋवर्णव्यञ्जनान्ताद् घ्यण्" ।

२१२. चक्षिङः ख्याञ् ।

चक्षिङः ख्याञादेशो भवति असार्व्वधातुकविषये । आख्याता, आख्यास्यति, आख्यास्यते । अनुबन्धत्वादुभयपदम् । आख्येयम्—"आत्खनोरिच्चे"ति यः । कथं सञ्चक्ष्यो दुर्जनो वर्जनीय इत्यर्थः । नृचक्षा राक्षसः—असुन् औणादिकत्वात् । विचक्षणो विद्वान् लोकतः सिद्धः ।

२१३. वा परोक्षायाम् ।

चक्षिङः परोक्षायां ख्याञादेशो भवति वा । आचख्ये, आचख्यौ, आचचक्षे ।

२१४. अजेर्वी ।

अजेर्वीरादेशो भवति असार्वधातुकविषये विव्यतुः, विव्युः, वयनीयं, वीतः, वीतवान् । व्यञ्जनादौ वेति केचित्—प्राजिता, प्रवेता, प्राजिष्यते, प्रवेश्यते, प्राजितुं, प्रवेतुम् । घञालक्यप्सु च न स्यात्—समाजः, उदजः, समज्या । प्राजनो दण्डः, प्रवयणो दण्ड इति च, वाधिकारादियमिष्टसिद्धिरिति ।

२१५. अदादेर्लुग्विकरणस्य ।

अदादेर्गणाद्विकरणस्य लुग् भवति । अस्ति, हन्ति, जुहोति, बिभेति, जुहुतः, बिभीतः । लुग्लोपत्वान्न गुणः । विकरणस्येति किम् ? अघ्नन् । अदाद्यन्तर्गणो जुहोत्यादिरिति ।

२१६. इण्—स्था—दा—पिबति—भूभ्यः सिचः परस्मै ।

इणादिभ्यः परस्य सिचो लुग्भवति परस्मैपदे परतः । अगात्, अध्यगात् । अस्थात्, अदात्, अधात्, अपात्, अभूत् । पिबतेरिति किं ? पा रक्षणे—अपासीत् । परस्मा इति किं ? समस्थिषत, अदिषत, अधिषत । घ्राशाच्छासाधेटां वा वक्तव्यम् । —अघ्रात्, अघ्रासीत्, अशात्, अशासीत्, अच्छात्, अच्छासीत्, असात्, असासीत्, अधात्, अधासीत् ।

इति दौर्गसिंह्यां वृत्तावाख्याते चतुर्थः पादः समाप्तः ।

पञ्चमः पादः

२१७. **नाम्यन्तयोर्धातु विकरणयोर्गुणः ।**

नाम्यन्तयोर्धातुविकरणयोरन्तरतमो गुणो भवति अर्थात् प्रत्यये परे । एता, चेता, नेता, स्तोता, भविता, कर्त्ता, सुनोति, तनोति । नाम्यन्तयोरिति किम् ? उम्भिता, क्रीणाति । ग्लायति म्लायतीत्यैकारोपदेशबलान्न गुणः । नीभ्यां लूभ्यामिति गाणत्वात् ।

२१८. **नामिनश्चोपधाया लघोः ।**

धातोरुपधाया नामिनो लघोर्गुणो भवति । कोषिता, कोषिष्यते, र्नात्तता, वर्त्तिष्यते । भेत्ता, चेत्ता इति प्रत्यये परे धातोरुपधैव । चकार उत्तरार्थः ।

२१९. **अनि च विकरणे ।**

नामिन उपधाया नाम्यन्तस्य चान्येव विकरणे गुणो भवति रोचते, वर्द्धते, भवति, नयति । अन्येव विकरण इति किम् ? नृत्यति, सुनोति । क्रीणाति, पुषाण । विकरण इति किम् ? अदुहन् ।

२२०. **करोतेः ।**

करोतेः स्वविकरणे गुणो भवत्येव । करोति, करोतु [अकरोत्] । तनाद्युपलक्षणं करोतेरिति केचित्, तेन—समर्णोति ।

२२१. **मिदेः ।**

मिदेः स्वविकरणे गुणो भवत्येव । मेद्यति । भौवदिकस्य मेदतेरनिसिद्ध एव ।

२२२. **अभ्यस्तानामुसि ।**

अभ्यस्तानामुसि परे नामिनो गुणो भवति । ह्रस्वबहुत्वयोश्च परस्मा इति प्रतिषेधे प्राप्ते वचनम् । अबिभयुः, अबिभरुः, अजगरुः । 'अभ्यस्तानामुसि' इति किम् ? जुहुवुः ।

२२३. **न णकारानुबन्धचेक्रीयितयोः ।**

नाम्यन्तानां नाम्युपधानाञ्च णकारानुबन्धे चेक्रीयिते च परे गुणो न भवति । अशिश्रियत्, अपुषत्, अधुक्षत्, नीयते, दुष्यते, नरीनृत्यते, लोलूयते ।

२२४. **अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्व्वधातुके ।**

अभ्यस्तस्य चोपधाया नामिनः स्वरादौ गुणिनि सार्वधातुके परे गुणो न भवति । नेनिजानि, अनेनिजम् । विशेषनामिग्रहणाञ्जजनानीत्यल्लोपो न स्यात् । एवमुत्तरत्रापि योज्यम् । गुणिनीतिकिम् ? गुणिन्यपि गुणो माभूत्—अनेनिजुः ।

२२५. सनि चानिटि ।

नामिन उपधाया अनिटि सनि गुणो न भवति । बिभित्सति, दित्सा, बुभुक्षते, जिघृक्षति । चकारादनामिनोऽपि क्वचित्, तेन धीप्सतीति नलोपः स्यात् । अनिटीति-किम् ? चुकोषिषति ।

२२६. सिजाशिषोश्चात्मने ।

नामिन उपधायाः सिच्चात्मनेपदे आशिषि चानिटि गुणो न भवति । अभित्त, अच्छित्त, अभित्साताम्, अदुग्ध्हि, अदुग्ध, अदुग्ढाः । दुहदिहलिहगुहामात्मने वतवर्गे वा सणेव, तत्र व्यवस्थितत्वानुवृत्तेः । सिचाऽद्यतन्युपलक्षणत्वात् सिद्धम् । भित्सीष्ट, भुक्षीष्ट । अनिटीति किम् ? अवधिष्ट, वृद्धिषीष्ट । इहात्मने ग्रहणं गुणबाधिका वृद्धिरिति ज्ञापनार्थम्, तेन न्यनुवीत् । कुटादित्वादगुणे वृद्धिर्न स्यात् ।

२२७. ऋदन्तानाञ्च ।

ऋदन्तानाञ्च धातूनां सिच्यात्मनेपदे आशिषि चानिटि गणो न भवति । अकृत, अकृषाताम्, कृषीष्ट । अनिटीति किं ? प्रावरिष्ट, प्रवरिषीष्ट । कथं तु—अतीर्ष्ट, स्तृ-अस्तीर्ष्ट, स्तीर्षीष्ट, पृ—अपूर्ष्ट, पूर्षीष्ट । सिजाशिषोश्चात्मने इड्विकल्पेष्टिरिति ऋकारस्योपलक्षणत्वात् ।

२२८. स्थादोश्च ।

स्थादासंज्ञकयोश्च नामिनः सिच्यात्मनेपदे गुणो न भवति । समस्थित, समस्थिषाताम्, अदित, अदिषाताम्, अधित, अधिषाताम् । नामिन इति किं ? स्थासीष्ट, दासीष्ट ।

२२९. भुवः सिज्लुकि ।

भुवो धातोः सिज्लुकि सति गुणो न भवति । अभूत्, अभूताम्, अभूवन् । भुव इति किम् ? अस्थात् । सिज्लुकीति वचनान्नामिनो निवृत्तिर्वेति शक्यते ।

२३०. सूतेः पञ्चम्याम् ।

सूतेः पञ्चम्युत्तमे गुणो न भवति । सूङ्—सुवै, सुवावहै, सुवामहै ।

२३१. दीधीवेव्योश्च ।

छान्दसावेतौ धातू इत्येके । पञ्चम्यामिति नेहानुवृत्तिः पृथग्योगात् । दीधी वेव्योश्च गुणो न भवति । आदीध्यं, आवेव्यं, आदीध्यनम्, आवेव्यनम्, आदीध्यकः, आवेव्यकः ।

२३२. रुद-विद-मुषां सनि ।

एषां गुणो न भवति सनि परे । रुरुदिषति, विविदिषति, मुमुषिषति ।

पारिशेष्याद् विदिर्ज्ञानार्थः। सनि व्यञ्जनादेर्य्युपधत्वाद्विकल्पेष्टौ नित्यार्थं वचनम्।

२३३. नाम्यन्तानामनिटाम्।

नाम्यन्तानां धातूनामनिटां सनि गुणो न भवति, चिचीषति, निनीषति, नुनूषति, तुष्टूषति, लुलूषति, चिकीर्षति, बुभूर्षति, अनिटामिति किं ? शिश्रयिषति। शीप्सतीति निप्यस्वात् कारितलोपः स्यात्।

"दीर्घाणाञ्च कृतो दीर्घो गुणं बाधते चेतदा।
दीर्घजाविरुरौ नाम इनो लोपस्तु दुर्लभः।।"

२३४. सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः।

सर्वेषां धातूनां विकरणानाञ्च नामिन उपधाया नाम्यन्तस्य च सार्व्वधातुके पञ्चम्युत्तमवर्जिते आत्मनेपदे गुणो न भवति। दुग्धे, स्तुते, चिनुते, कुरुते। सार्व्वधातुक इति किं ? धोक्ष्यते, स्तोष्यते। अनुत्तमे पञ्चम्या इति किं ? स्तवै, करवै।

२३५. द्वित्वबहुत्वयोश्च परस्मै।

सर्वेषां धातूनां विकरणाञ्च सार्वधातुके पञ्चम्युत्तमवर्जिते द्वित्वबहुत्वयोश्च परस्मैपदे गुणो न भवति। दुग्धः, दुहन्ति, स्तुतः, स्तुवन्ति; कुरुतः, कुर्वन्ति, चिनुतः, चिन्वन्ति। द्वित्वबहुत्वयोरिति किं ? दोग्धि, स्तौति, चिनोति, करोति। अनुत्तमे पञ्चम्या इति किं ? दोहाव, दोहाम ; चिनवाव, चिनवाम।

२३६. परोक्षायाञ्च।

सर्वेषां धातूनां परोक्षायाञ्च द्वित्वबहुतत्वयं श्च परस्मैपदे गुणो न भवति। दुदुहतुः, दुदुहुः, विव्यतुः, विव्युः; निन्यतुः, निन्युः। द्वित्वबहुत्वयोरिति किम् ? दुदोह, निनयिथ।

२३७. सर्वत्रात्मने।

सर्वेषां धातूनां परोक्षायाञ्च सर्वस्मिन्नात्मने पदे गुणो न भवति। दुदुहे, दुदुहाते, दुदुहिरे; चक्रे, चक्राते, चक्रिरे।

२३८. आशिषि च परस्मै।

सर्वेषां धातूनां सर्वत्राशिषि च परस्मैपदे गुणो न भवति। चीयात् - चीयास्ताम् दुह्यात्। दुह्यास्ताम्। परस्मा इति किं ? चेषीष्ट, धोक्षीष्ट।

२३९. सप्तम्याञ्च।

सर्वेषां धातूनां विकरणानाञ्च सप्तम्यां परस्मैपदे गुणो न भवति। स्तुयात्, दुह्यात्, चिनुयात्।

२४०. हौ च ।

सर्वेषां धातूनां विकरणानाञ्च हौ परे गुणो न भवति। नुहि, दुग्धि, प्राप्नुहि । चिनु सुनु प्रत्ययलोपलक्षणत्वात् । कथमेहि ? आङ एत्वमिति ।

२४१. तुदादेरनि ।

तुदादेरनि परे गुणो न भवति । तुदति, नुदति ।

२४२. आमि विदेरेव

विदेरेवामि परे गुणो न भवति । विद-ज्ञाने-विदाञ्चकार । विदेरेवेति किम्? ओषाञ्चकार, जागराञ्चकार ।

२४३. कुटादेरनिनिचट्सु ।

कुटादेर्गणस्येनिचटौ वर्जयित्वा अन्येषु प्रत्ययेषु गुणो न भवति । उत्कुटिता, उत्कुटितम्, उत्कुटिष्यति, उत्कुटितव्यम् । उत्पुटिता, उत्पुटितुम्, उत्पुटिष्यति, उत्पुटितव्यम् । कुटादेरिति किम् ? लेखनीयम् । 'अनिनिचट्सु' इति किम् ? उत्कोटयति, उदकोट, उच्चुकोट । कथं पुच्छनीयम् ? रूढित्वात् ।

२४४. विजेरिटि ।

विजेरिटि परे गुणो न भवति । ओविजी—उद्विजिता, उद्विजितुम्, उद्विजिष्यते । कथमुद्वेजिता ? इना सिद्धम् ।

२४५. स्थादोरिरद्यतन्यामात्मने ।

स्था-दा संज्ञकयोरद्यतन्यामात्मनेपदे इर्भवति । समस्थिषत, समस्थिषाताम्, अदित, अदिषाताम्, अधित, अधिषाताम् । आत्मन इति किं ? अस्थात्, अदात्, अधात् ।

२४६. मुचादेरागमो नकार स्वरादनि विकरणे ।

मुचादेर्गणस्य स्वरात् परो नकारागमो भवति अनि विकरणे परे । मुञ्चति, लुम्पति । विकरण इति किम्? अमुचन् ।

२४७. मस्जिनशोर्धुटि ।

मस्जिनशोः स्वरात् परो नकारागमो भवति धुटि परे । मङ्क्ता, मङ्क्ष्यति; नष्टा, नङ्क्ष्यति ।

२४८ रधिजभोः स्वरे ।

रधिजभो स्वरात् परो नकारागमो भवति स्वरे परे । रन्धयति, अरन्धि, जम्भयति, अजम्भि ।

२४९. नेटि रधेरपरोक्षायाम् ।

रधेर्नकारागमो न भवति इटि परे परोक्षायाम् । रधिता, रधिष्यति, रधितव्यम् । अपरोक्षायामिति किं ? ररन्धिव, ररन्धिम ।

२५०. रभिलभोरविकरणपरोक्षयोः ।

रभिलभोः स्वरात् परो नकारागमो भवति अविकरणपरोक्षयोः स्वरे परे । आरम्भयति, आरम्भि, आरम्भो वर्त्तते । आलम्भयति, आलम्भि, आलम्भो वर्त्तते । अविकरणपरोक्षायामिति किम् ? आरभते, आलभते, रेभे, लेभे ।

२५१. हुधुड्भ्यां हेर्धि ।

हुधुड्भ्यां परस्य हेर्धिर्भवति । जुहुधि, चकाद्धि, भिन्धि, छिन्धि, छिन्तात्— परत्वात्तातण् । भिन्धकि, छिन्धकि,— पश्चादक् । कथं रुदिहि, स्वपिहि ? सेटकत्वात् ।

२५२. अस्तेः ।

अस्तेः परस्य हेर्धिर्भवति । अस-एधि । नित्यत्वादन्तरङ्गत्वाच्च एत्वे सति वचनम् ।

२५३. शा शास्तेश्च ।

शास्तेः परस्य हेर्धिर्भवति शास्तेश्च शादेशो भवति । शाधि । अन्यथेति कृते इत्वं स्यात् ।

२५४. लोपोऽभ्यस्तादन्तिनः ।

अभ्यस्तात् परस्यान्तेर्नकारस्य लोपो भवति । ददति, दधतु; जाग्रति, जाग्रतु । नलोपः साध्य इत्यन्न कृतः ।

२५५. आत्मने चानकारात् ।

अनेकाराच्चात्मनेपदे अन्तेर्नकारस्य लोपो भवति । कुर्वते, कुर्वताम्; लुनते, लुनताम्; व्यतिलाते, व्यतिलाताम् । अनकारादिति किं ? पच्यन्ते, पठ्यन्ते ।

५५६६. शीतेरिरन्तेरादिः ।

शेतेः परस्यान्तेरादिरिर्भवति । शेरते, शेरताम्, अशेरत । अन्तिग्रहणमन्तिनो रिरादिर्माभूत् । वेत्तेर्वा वक्तव्यम् । संविदते, संविद्रते ।

२५७. आकारादट औ ।

आकारात् परस्याट और्भवति । पपौ तस्थौ । आशिषि तुह्योस्तातण् वा वक्तव्यः । जीवतु जीवतात्, जीव, (जीवतात्) त्वं; नन्दतु, नन्दतात्, नन्द (नन्दतात्)

त्वम् । एवं कुरुतात्, भिन्तात्, छिन्दात् । णकारोऽगुणार्थः ।

२५८. ऋदन्तस्येरगुणे ।

ऋदन्तस्य धातो ऋतस्य स्थानिनोऽन्तरतमोऽगुणे प्रत्यये परे इर्भवति । चिकीर्षति, जिहीर्षति, तितीर्षति । ऋदन्तस्येति किं ? चक्रतुः । । "कीर्त्तयोः विद" रिति निर्देशान् कीर्त्तयति ।

२५९. उरोष्ठ्योपधस्य च ।

ओष्ठ्योपधस्य धातोऋर्न्तस्य उर्भवति अगुणे प्रत्यये परे । पुपूर्षति, बुभूर्षति, मुमूर्षति, बोभूर्यते । दन्त्योष्ठ्यादपि—प्रावुवूर्षति, संवुवूर्षते । धातोरोष्ठ्योपधस्येति किम् ? ऋ गतौ—समीर्णः ।

२६०. इन्यसमानलोपोपधाया ह्रस्वश्चणि ।

अविद्यमानसमानलोपोपधाया ह्रस्वो भवति इनि चण् परे । अचीकरत्, अजीजपत्, अलीलवत् । इनग्रहणमिन् सामान्यार्थम्, तेन—वादितवन्तं प्रयोजितवान्—अवीवदत् वीणां परिवादकेनेति । असमानलोपत्वंव । असमानलोपोपधाया इति किम् ? अचकांक्षत् । कथं गोनावमाख्यातान्—अजुगोनत् ? ओतः स्थानिवद्भावात् ।

२६१. न शास्वृदनुबन्धानाम् ।

शासोऋर्दनुबन्धानाञ्च उपधाया ह्रस्वो न भवति इनि चण् परे । अशशासत्, अडुढौकत् । अतुत्रौकत् । शासोरिति किम् ? आङः शास इच्छायाम्—आशीशसत् । ओणेऋर्दनुबन्धो ज्ञापनार्थः—नित्यमपि द्विर्वचनं ह्रस्वत्वेन बाध्यते, तेन—मा भवान् आटिटत् । भ्राज्-भास्-एष [भ्राज् भास्-भास् एषाम] ऋदनुबन्धो नाद्रियते । भ्राज—अबिभ्रजत् । भास—अबीभसत्, भ्रास—अबिभ्रसत्, भाष—अबीभषत्, दीप—अदीदिपत्, जीव—अजीजिविषत्, मील—अमीमिलत पीड़—अपीपिड़त, कण—अचीकणत्, रण—अरीरणत्, वण—अवीवणत्, भण—अबीभणत्, श्रण—अशिश्रणत्, हेठ—अजीहिठत्, लुप्लृ—अलूलुपत् । भ्राजनं भ्राजस्तमचीकरत्—अबभ्राजत्, समानलोपत्वात् सन्वद्भावो न स्यात्, तेन भ्राजादीनां वेति न वक्तव्यम् ।

२६२. लोपः पिबतेरीच्चाभ्यासस्य ।

पिबतेरुपधायाया लोपो भवति अभ्यासस्येच्च भवति इनि चण् परे । अपीप्यत् । पिबतेरिति किं ? पै ओ वै—अपीपयत्, पा रक्षणे—अपीपलत् ।

२६३. तिष्ठतेरित् ।

ह्रस्वइकारोऽभ्यासस्येह । तिष्ठतेरुपधाया इद्भवति इनि चण्परे । अतिष्ठिपत् ।

२६४. **जिघ्रतेर्वा ।**

जिघ्रतेरुपधाया इद्भवति वा इनि चण् परे। अजिघ्रिपत्, आजिघ्रपत्। कथमवीवृधत्, अववर्द्धत्; अमीमृजत्, अममार्ज्जत; अचीक्लृपत्; अचीकृतत्, अचिकीर्त्तत्। इनि चणि ऋवर्णस्य ऋद्गुणस्य संज्ञापूर्वकत्वात्, "कीर्त्तीषो: कित" रिति ज्ञापकस्यनित्यत्वात् सिद्धम्।

इति दौर्गसिंह्यां वृत्तावाख्याते पञ्चम: पाद: समाप्त:।

षष्ठः पादः

२६५. **अनिदनुबन्धानाम गुणेऽनुषङ्गलोपः ।**

अनिदनुबन्धानां धातूनामगुणे प्रत्यये परे अनुषङ्गस्य लोपो भवति । स्रस्यते, ध्वस्यते, नष्टः नष्टवान् । अनिदनुबन्धनामिति किं ? शङ्क्यते, वङ्क्यते । अतएव वञ्जंनादिदनुबन्धानां नोऽस्तीति 'तथाच—बृंहणमिति स्वरान्तत्वाण्णत्वं, स्यात्, निर्दिष्टस्यनित्यत्वात् लङ्गिकयोरुपतापशरीरम्विकारयोःस्यात् – विलगितः, विकपितः । तुन्फादीनां शुम्भान्तानामनि च न लुप्यते । तृफ-तृन्फ तृप्तौ—तुन्फतीत्यादि ।

२६६. **नशब्दाच्च विकरणात् ।**

अनिदनुबन्धानाञ्चकारेण योगः, परेऽगुण इति सामान्यम् । इदनुबन्धानामनिदनुबन्धा नाञ्च धातूनां गुणिन्यगुणे च नशब्दाच्च विकरणादनुषङ्गस्य लोपो भवति । भनक्ति, भङ्क्तः, भञ्जन्ति, हिनस्ति, हिंस्तः हिंसन्ति ।

२६७. **परोक्षायामिन्धि-श्रन्थि-ग्रन्थि-दम्भीनामगुणे ।**

परोक्षायामगुणे परत इन्ध्यादीनामेवानुषङ्गस्य लोपो भवति । समीधे, समीधाते, समीधिरे, वचनादाम् नास्ति । श्रेथतुः, ग्रेथतुः, देभतु । इन्ध्यादीनामेवेति नियमात्—सस्रंसे, बभञ्जतुः ।

२६८. **दन्शि-सन्जि-स्वन्जि-रन्जीनामनि ।**

दन्श्यादीनामनि विकरणेऽनुषङ्गस्य लोपो भवति । दशति, सजति, परिष्वजेते, रजति । कथं परिष्वजेते, अन्तरङ्गत्वात् स्थानिवद्भावाच्च । दन्श, दशन इति निर्देशात् दशनम्, कथमभञ्जि, अभाजि ? भजेरिचि भञ्जनेऽपि वृत्तिः ।

२६९. **अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु ।**

धातोरुपधाया अस्य दीर्घो भवति नामिनाञ्च वृद्धिर्भवति इन् इच् अट् एषु परतः, पाचयति, अपाचि, पपाच, नाययति, अनायि, निनाय, लावयति, अलावि लुलाव, कारयति, अकारि, चकारि । धातोरिति किं ? त्वचयति । कथं पटुमाख्यातवान्-अपीपटत् ? वृद्धौ सन्ध्यक्षरलोपः । धातोर्नामिनो गुणे सत्युपधाया दीर्घः सिद्धः, नामिग्रहणं लिङ्गार्थमेव बहुवचनं वा । कथमचकलत् अजहलत् ? संज्ञापूर्वकत्वाद्वृद्धिरनित्येति समानलोपत्वात् सन्वद्भावो न स्यात् । तथा अट्युत्तमे वा—अहं पपच, अहं पपाच, अहं निनय, अहं निनाय, अहं लुलव, अहं लुलाव, अहं चकर, अहं चकार ।

२७०. सिचि परस्मै स्वरान्तानाम् ।

परस्मैपदे सिचि परतः स्वरान्तानां धातूनां वृद्धिर्भवति नामिन एव । अरावीत्, अलावीत्, अचैषीत्, अनैषीत् । अर्थात् स्वरान्तग्रहणमुपदेशार्थम्, तेनोदवोढाम् । सिचीति किं ? नवाव परस्मा इति किम् ? अच्योष्ट । 'ऊर्णोतेर्वा वक्तव्यम्'—प्रोर्णावीत्, प्रोर्णवीत् ।

२७१. व्यञ्जनान्तानामनिटाम् ।

परस्मैपदे सिचि परतो व्यञ्जनान्तानां धातूनामनिटां नामिनो वृद्धिर्भवति उपधाया एव । अभैत्सीत्, अरौत्सीत्, अतार्प्सीत्, अदार्प्सीत्, अनिटामिति किम् ? अकोषीत् ।

२७२. अस्य च दीर्घः ।

परस्मैपदे सिचि परतो व्यञ्जनान्तानां धातूनामनिटामस्य च दीर्घो भवति । अपाक्षीत् । पृथग्योगादभाङ्क्षीत् ।

२७३. वदव्रजरलन्तानाम् ।

परस्मैपदे सिचि परतो वदिव्रज्योरलन्तानाञ्च धातूनामस्य च दीर्घो भवति । अवादीत्, अव्राजीत्, अचारीत्, अचालीत् । कथमवभीत्, अश्वल्लीत्, नाकारस्य रलन्ततेति । व्यञ्जनादीनां सेटामनेदनुबन्धक्ष्यन्त-क्षण-श्वसां वेति वक्तव्यम् ।—अरणीत्, अराणीत् । एदनुबन्धानाञ्च—कगे,—अकगीत्, ग्रह अग्रहीत्, टुवम्—अवमीत् । व्यय्—अव्ययीत् । क्षण्—अक्षणीत् । श्वस—अश्वसीत् । अनिटामिति नञा निर्दिष्टस्यानित्यत्वात् ।

२७४. श्विजाग्रोर्गुणः ।

परस्मैपदे सिचि परतः श्विजाग्रोर्गुणो भवति । अश्वयीत्, अजागरीत् । वृद्धेरपवादः ।

२७५. र्तिसर्त्योरणि ।

र्तिसर्त्योरणि परे गुणो भवति । मा भवान् अरत् असरत् । कथमजरत्, अदर्शत् ? ऋवर्णस्योपलक्षणत्वात् ।

२७६. जागर्त्तेः कारिते ।

जागर्त्तेः कारिते परे गुणो भवति । जागरयति ।

२७७. यणाशिषोर्ये ।

जागर्त्तेर्यणाशिषोर्ये परे गुणो भवति । जागर्यते, जागर्यात् । य इति किं ? जागारिषीष्ट । इडन्तेजवच्चेति वृद्धिः स्यात् ।

२७८. परोक्षायामगुणे ।

जागर्त्तेः परोक्षायामगुणे गुणो भवति । जजागरतुः, जजागरुः । अगुण इति किम् ? जजागार ।

२२९. ऋतश्चसंयोगादेः ।

संयोगादेर्धातोर्ऋतश्च परोक्षायामगुणे गुणो भवति । सस्मरतुः, सस्मरुः । कथं सञ्चस्करतुः, सञ्चस्करुः ? असिद्धबहिरङ्गमन्तरङ्गे इत्यनित्यम् ।

२८०. ऋदन्तानाञ्च ।

ऋदन्तानाञ्च धातूनां परोक्षायामगुणे गुणो भवति । तेरतुः, तेरुः, विशशरतु विशशरुः, विददरतुः, विददरुः, निपपरतुः, निपपरुः । कथं विशश्रतुः, विशश्रुः, विदद्रतुः, विदद्रुः, निपप्रतुः, निपप्रुः ? शॄ, दॄ प्रामर्थे श्रा द्राः प्राश्च वर्तन्ते ।

२८१. ऋच्छ ऋतः ।

पुनर्ऋद्ग्रहणं गुण्यर्थम् । ऋच्छ ऋतः स्थाने गुणिन्यगुणे च परोक्षायां गुणो भवति । आनर्च्छ, आनर्च्छतुः, आनर्च्छुः । कथमारतुः ? नित्यत्वान्निमित्ताभावाद्वा नागमविघातः स्यात् ।

२८१. शीङः सार्वधातुके ।

शीङः सार्वधातुके परेऽगुणे गुणो भवति, एकवर्णत्वाद्वर्णान्ते । शेते, शयीत, शेरताम्, अशेरत् ।

२८३. अयीये ।

शीङः ईकारोऽय् भवति ये परे । शय्यते, अधिशय्य गतः । कथंसंशय्य गतः ? ऊह्यर्थे वहिरिति । अगुणे ये तु सोपसर्गस्योऽतेर्निवृत्तिरभिधानात्, तेन ह्रस्वो न वाच्यः ।

२८४. आयिरिच्यादन्तानाम् ।

आदन्तानां धातूनामिचि पदे आयिर्भवति । निर्दिष्टस्यातः स्थानिन एवान्तरतम्यात् । अस्थायि, अदायि, स्थायिष्यते, दायिष्यते, अस्थायिष्यत, अदायिष्यत, स्थायिषीष्ट, दायिषीष्ट, स्थायिता, दायिता, इड्वेज्वच्छेति ।

२८५. शाच्छा-सा-ह्वा-व्या-वेपामिनि ।

शाच्छासाह्वाव्यावेपामिनि परे आयिर्भवति । शो-शाययति, च्छो-च्छाययति, सो-साययति, ह्वेञ्-ह्वाययति, व्येञ्-व्याययति, वेञ्-वाययति, धेट् पा पाने, पै ओ व-पाययति ।

२८६. अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पोयलोपो गुणश्च नामिनाम् ।

अर्त्यादीनामादन्ताञ्च इनि परे पकारोऽन्तो भवति यथा संभवं यलोपो गुणश्च नामिनाम् । तिपा धातुरेव निर्दिश्यते । अर्पयति, ह्रेपयति, व्लेपयति । री रेषणे, रीङ् श्रवणे वा—रेपयति । क्नूयी शब्दे—क्नोपयति, क्ष्मायी विधूनने—क्ष्मापयति, आदन्तावाञ्च स्थापयति, क्षापयति. अध्यापयति ।

२८७. पातेर्लोऽन्तः ।

पाते रिनि परे लकारोऽन्तो भवति । पालयति । पल रक्षणे चौरादिकोऽप्यस्ति, पातेरायिः स्यादिति वचनम्, पुनरन्तग्रहणमादेशो वा स्यादिति ।

२८८. धूञ् प्रीणात्योर्नः ।

धूञ् प्रीणात्योरिनि परे नकारोऽन्तो भवति । धूनयति, प्रीणयति । धूञ्-प्रीणात्योरिति किम् ? धू विधूनने—विधावयति, प्रीङ् प्रीतौ प्राययति घृतं विलीनयति-विलीनं करोतीतीन् । घृतं विलालयति,—ललते रूपम् । स्नेहद्रवीकरणे लियः कारिते वृत्तिर्नास्त्यभिधानात् । पक्षेणोपवाजयतीति वजते रूपम् । वाधातोः कम्पने कारिते न वृत्तिः । सत्यार्थवेदानमन्त आप्तुकारित एव चुरादौ—सत्यापयति, अर्थापयति, वेदापयति । कथं कारापयति, वर्णापयति, शब्दापयति ? आपनमापः कारस्यापः—कारापः, तं करोतीतीन्, हेतौ स'धुश्चेद् वक्तव्यं वा ।

२८९. स्फायेर्वादेशः ।

स्फायेरिनि परे वादेशो भवति । स्फावयति । आगमः स्यादित्यादेशवचनम् ।

२९०. शदेरगतौ तः ।

शदेरगत्यर्थस्यनि परे तादेशो भवति । फलानि शातयति । अगताविति किम् ? गाः शादयति—गमयतीत्यर्थः । रुह्यर्थे रुपिरिति, व्रीहीन् रोपयति, काय्यंमध्यारोपयति, अर्थं समारोपयति । रुहेस्तु—रोहयति, आरोहयति, हस्ती हस्तिपकम् ।

२९१. हन्तेस्तः ।

हन्तेर्नकारस्य तादेशो भवति इनि परे । घातयति ; पुनस्तग्रहणं गत्यर्थं (स्यात्), तेन गां घातयति—गमयतीत्यर्थः ।

२९२. हस्य हन्तेर्घिरिनिचोः ।

हन्तेर्हस्य घिर्भवति इनिचोः परयोः । घातयति, अघानि । हान्तस्य धातोर्विशेषणं स्यादिति पुनर्हन्तिग्रहणं, तेन—वृंहयति ।

२९३. लुप्तोपधस्य च ।

हन्तेर्लुप्तोपधस्य च हस्य घिर्भवति, घ्नन्ति, आघ्नते । लुप्तोपधस्येति किम् ? क्लेशोपहः, तमोपहः ।

२९४. अभ्यासाच्च ।

हन्तेरभ्यासाज्ज परस्य हस्य घिर्भवति । जघान, जंघन्यते, जिघांसति । हन्तेरभ्यासादिति किं ? हननीयितुमिच्छति—जिहननीयिषति । हेरचणीति वक्तव्यम् । —जिघीषति, प्रहाययितुमिच्छति – प्रजिघाययिषति । अचणीति वचनात् प्राजीहयत् ।

२९५. जेर्गिः सन्परोक्षयोः ।

जयतेः सन्परोक्षयोर्गिर्भवति । जिगीषति, जिगाय, विजिग्ये । जिनातेर्लाक्षणिकत्वात् जिज्यतुः ।

२९६. चेः किर्वा ।

चिञः सन्परोक्षयोः परतः किर्भवति वा । चिकीषति, चिचीषति, चिकाय, चिचाय, चिक्ये, चिच्ये । कि कित ज्ञाने परस्मैपदीति वचनम् ।

२९७. सनोऽलोपः स्वरेऽबहुत्वे ।

सनोऽकारस्य अबहुत्वे स्वरे लोपो भवति । अघुक्षाताम्, अघुक्षाथाम्, अघुक्षि । स्वर इति किम् ? अघुक्षात् । अबहुत्व इति किम् ? अघुक्षन्त, अकारान्तत्वान्नलोपो न स्यात् ।

२९८. दरिद्रातेरसार्वधातुके ।

तिपा धातुरेव निर्दिश्यते । दरिद्रातेरसार्वधातुकमात्रेऽन्तस्य लोपो भवति । दरिद्रयति, अदरिद्रि, दरिद्रो वर्त्तते, दरिद्र्यत, दरिद्र्यात् । कथं दरिद्रेयम् ? आत्वनोरिच्चेति यः, परत्वात् । वेति मण्डूकप्लुत्या युवेवारनिटि सनि च स्यात् । दरिद्राणम्, दरिद्रायकः, दिदरिद्रासति ।

२९९. व्रश्चिमस्जोर्धुटि ।

व्रश्चिमस्जोर्धुटि परेऽन्तस्य लोपो भवति । व्रष्टा, व्रक्ष्यति, मङ्क्ता, मङ्क्ष्यति । नागमेऽन्तरङ्गत्वात् सस्य तृतीये सति पश्चाल्लोपः । धुटीति किं ? वृश्च्यते ।

३००. यन्योकारस्य ।

धातोरोकारस्य यणि परे लोपो भवति । द्यति, स्यति, यनीति किम् ? उपोयते, परनिमित्तादेशः पूर्वस्मिन् स एव ।

३०१. आकारस्योसि ।

धातोराकारस्य लोपो भवति उसि परे । उदगुः, अदुः अरुः, अलुः ।

३०२. सन्ध्यक्षरे च ।

धातोराकारस्य लोपो भवति सन्ध्यक्षरे च परतः । व्यतिरे, व्यतिले ।

३०३. अस्तेः सौ ।

अस्तेः सौ परेऽन्तस्य लोपो भवति। असि। कथमासीर्लाक्षणिकत्वात्। आद्ध्वम् आशाद्ध्वमिति सस्य तृतीयेऽपि ध्वे उच्चारणस्याभ्यासात्। ह एकारे वक्तव्यः।—व्यतिहे। कथमीहामासे ? तिपा धातुस्वरूपनिर्देशात्।

३०४. असन्ध्यक्षरयोरस्य तौ तल्लोपश्च ।

इह धातुप्रस्तावेऽकारसन्ध्यक्षरयोर्वर्णयोः परयोरकारस्य स्थाने तावकारसन्ध्यक्षरे वर्णौ भवतो यथासंख्यम्,—तयोश्च निमित्तभूतयोर्लोपो भवति। चिकीर्षति, दीव्यन्ति, पचन्ते, पचे। अस्येति किं ? यान्ति। असन्ध्यक्षरयोरिति किम् ? पचति। अस्य लोप इति सिद्धे तौ तल्लोपश्चेति किं ? पच्यन्ते, न लोपो माभूत्।

३०५. दीधीवेव्योरिवर्णयकारयोः ।

दीधीवेव्योरिवर्णयकारयोः परयोरन्तस्य लोपो भवति। आदीधिता, आवेविता, आदीधीत, आवेवीत, आदीध्यते, आवेव्यते। इवर्णकारयोरिति किम् ? आदीध्यकः, आदीध्यनम्, आवेव्यनम्। न यथासंख्यमिहेति। न तु प्रत्येकं धातवो, द्विवचनात्।

३०६ नामिव्यञ्जनान्तादायेरादेः ।

नाम्यन्ताद्व्यञ्जनान्ताच्चायेरादेर्लोपो भवति। अग्नीयते, रयते, विद्वस्यते, अनडुह्यते। ब्राह्मणीवाचरति—ब्राह्मणायते, नित्यत्वात् पुंवद्भावः। सन्निपातलक्षणं स्यादिति नामिग्रहणम्।

३०७. गम-हन-जन-खन-घसामुपधायाः स्वरादावनण्यगुणे ।

गम्यादीनामुपधायाः स्वरादावण् वर्जितेऽगुणे प्रत्यये परे लोपो भवति। जग्मतुः, जग्मुः, जघ्नतुः, जघ्नुः। जनी, जन—जज्ञे, जज्ञतुः, जज्ञुः, चख्नतुः, चख्नुः जक्षतुः, जक्षुः। स्वरादाविति किम् ? गम्यते। अनणीति किम् ? अगमत्, अघसत्। अगुण इति किं ? गमिष्यति।

३०८ कारितस्यानामिड्विकरणे ।

आमिड्विकरणादन्यस्मिन् प्रत्यये परे कारितस्य लोपो भवति। अचीकरत्, अचीकमत, अररक्षत्, कार्य्यते, कारणा, उदपादि, समपादि। [परत्वात्] यत्वादयो बाध्यन्ते। अनामिडविकरण इति किं ? कारयामास, कारयिता, कारयति, अहं कारये। तद्भावादन्तरङ्गत्वाच्च गुणः।

३०९. यस्यापत्यप्रत्ययस्यास्वरपूर्व्वस्य यिन्नायिषु ।

यिन्नायी द्वौ, बहुवचनं गणार्थम्। यस्येत्यकार उच्चारणार्थः, अपत्यप्रत्यय-

सम्बन्धिनो यस्यास्वरपूर्वस्य यिन्नायितद्धितानात्-स्वरच्विस्त्रीकारेषु परतो लोपो भवति। गार्गीयति, गार्गायते। गार्ग्यं साधुर्गार्ग्यं इति श्रुतेरभेदात्। कुरोर्नकारादेशश्च रुढ़ादपत्यमात्रे गर्गादित्वाण्ण्यः। कौरव्यस्यापत्यमितीण् कौरविः एवं नैषधिः, [नैषादिः] गार्गस्यायं गार्गीयः। गार्ग्याणां समूहो गार्गकं, समूहे अकण्। कथं राजन्यकं ? गणकृतमनित्यमिति। गार्गीस्यात्। गार्गी, स्त्री। गणे अनात्स्वर इति किं ? गार्ग्यायणः। यिन्नायिष्विति किं ? गार्ग्यमाचष्टे—गार्गयति। यिन्नायीष्विति न्याय्यः पाठः तद्धितानामाकृतिप्रधानत्वात्। तथाच—सोमो देवता अस्या इति सौमी ऋक् च दृश्यते। अस्वरपूर्व्वमस्येति किम् ? आत्रेयीयति, आत्रेयायते, आत्रेयीस्यात्। आत्रेयी स्त्री। :—

मत्स्यस्य यस्य स्त्रीकार ईये चागस्त्यसूर्ययोः।
तिष्यपुष्ययोर्नक्षत्रे अणि यस्य विभञ्जनात्॥

मत्स्यस्य स्त्री—मत्सी, अगस्त्यस्यापत्यमित्यण्, आगस्त्यस्यायमागस्तीयः, आगस्तस्येयमागस्ती। सूर्यस्यायं सौर्य्यः तत्र भव सौरीय, सूर्यस्येयं सौरी दिक्। तैषमहः। तैषी रात्रिः, पौषमहः पौषी रात्रिः। गणात् पृथगायिरुत्तरार्थः।

३१०. नलोपश्च।

नकारो लुप्यते येन स न लोपो योगः। अर्थात् यिन्नायोर्नलोप एव करणीयः, विद्वस्यति, विद्वस्यते एवं राजीयति, पथायति, पुंस्यतीत्यपि। नियमः किं ? दीप्यतीत्यपि। कथं चतुर्य्यति, अनडुह्यति, गौर्य्यति। धूर्य्यति, शब्दाश्रयत्वाद् विनियमः। सर्पिष्यति धनुष्यतीति षत्वं स्यादेव गोमत्यतीति क्विप्, कथं गोमान्, पचन्, पुमान् ? यिन्नाय्योर्घुंटि प्रत्ययलोपलक्षणस्यानित्यत्वात्। उदनुबन्धशन्तुङ् पुंसामेवेति।

३११. व्यञ्जनाद्दिस्योः।

धातोर्व्यञ्जनाद्दिस्योर्लोपो भवति। अधोक्, अलेट्। कथं हुंसि ? साहचर्य्यात्।

३१२. यस्यानिनि।

यस्येत्यकार उच्चारणार्थः। व्यञ्जनात् परस्य धातोर्यस्यानिनि प्रत्यये परे लोपो भवति। बेभिदिता। दृशदमिच्छति, आचरति वा—दृशदिता। भिषज्यधातुः कण्ड्वादौ—भिषजिता। यिन्नाय्योर्नेच्छन्त्येके, तेनोभयप्रमाणत्वाद् विकल्प इति। वक्ष्यमाणलोपोक्ते द्वियकार पाठाद् वा मव्यादीनामदोषः। मव्यिता, सूक्ष्यिता, ईर्ष्यिता, शुष्यिता। व्यञ्जनादिष्विति किं ? लोलूयिता। इणो लोपेऽयादेशे च मोमूत्रिता, शाशयिता। धातोर्यस्येति किं ? पच्यते। अननीति किं ? पापच्यते।

३१३. अस्य च लोपः।

धातोरकारस्यानिनि प्रत्यये परे लोपो भवति। चिकीर्षिता, कुसुभं मगधं

कर्त्तरि—कुसुमिता, मर्मामिता। विषयसप्तम्यपि—कुम्भूः, लोलूः यायावरः, तेनास्य च लोपे यलोपः स्यात्।

११४. सिचो धकारे।

धकारे परे सिचो लोपो भवति। अलविढ्वम्, अच्योढ्वम्। अयंध्वमिति सस्य तृतीयेऽपिध्वे उच्चारणस्याभेदात्।

११५. धुटश्च धुटि।

धुटः परस्य सिचो लोपो भवति धुटि परे। अभित्त, अभित्थाः। धुट इति किम्? अमंस्त। धुटीति किम्? अभित्साताम्।

११६. ह्रस्वाच्चानिटः।

ह्रस्वात्परस्यानिटः सिचो लोपो भवति धुटि परे। अकृत, अकृथाः, समास्थित, आहृत। ह्रस्वादिति किम्? अच्योष्ट। नेटः परस्य वेति सुखार्थं, तेनावारिष्टां, व्यद्योतिष्ठ।

११७. इटश्चेटि।

इटः परस्य सिचो लोपो भवति ईटि परे। अरावीत्, अलावीत्, अकोषीत्। इट इति किम्? अमंसीत्। ईटीति किम्? अकणिषम्।

११८. स्को संयोगाद्योरन्ते च।

धातोः संयोगाद्यो सकारककारयोर्लोपो भवति धुटयन्ते च। आरिप्सते, आलिप्सते, चक्षिङ्—आचष्टे। भ्रष्टा, भ्रक्ष्यति, त्वक्षू—त्वष्टिः, यतो नेट्। अस्ते चेत्युत्तरार्थम्। भाषायामपि चेक्रीयित लुगन्तमित्येके— अवाभ्रट्। स्कोरिति किम्? अकार्ष्टाम्, मृजू—अमार्ट्। धुटयन्त इति किम्? भृज्ज्यते, आचक्ष्महे।

११९. चवर्गस्य किरसवर्णे।

चवर्गस्य किर्भवति असवर्णे धुटयन्ते च। वक्ता, योक्ता, अतेनेक्, अवेवेक्। असवर्ण इति किम्? उच्छति, उज्झति।

१२०. होढः।

धातोर्हकारस्य ढकारो भवति धुटयन्ते च। लेढा, लेक्ष्यति, अलेट्।

१२१. दादेर्घः।

धातोरवयवस्य दादेर्हस्य घो भवति धुटयन्ते च। अधोक्ष्यत्, अधोक्। कथं दोग्धा? आद्यन्तवद्भावात्।

१२२. नहेर्धः।

न हेर्हकारस्य धो भवति धुटयन्ते च। नद्धा, नत्स्यति, अनानत्।

१२३. भृजादीनां षः।

भृज्जादीनामन्तः षो भवति धुटयन्ते च। भ्रष्टा, भ्रक्ष्यति, व्रष्टा, व्रक्ष्यति, स्रष्टा, स्रक्ष्यति, मार्ष्टा, मार्क्ष्यति, अमार्ट्। यज्—यष्टा। राज्—राष्टिः, भ्राज्—भ्राष्टिः। भ्रस्जेर्भृजिरिहोपलक्षणम्। निपातनस्येष्टविषयत्वात् सम्प्रसारणादन्यत्र विभाषा। भ्रष्टा, भर्ष्टा, भृज्जनं, भर्ज्जनम्। सम्प्रसारणे तु—भृज्जति, भृज्ज्यते।

३२४. छशोश्च ।

छशोश्च षो भवति धुटयन्ते च । प्रष्टा, प्रक्ष्यति, क्रोष्टा, क्रोक्ष्यति, अचोक्रोष्ट् । निमित्ताभावाद्वृद्धिर्व्वा पाठः ।

३२५. भाषितपुंस्कं पुंवदायौ ।

भाषितपुंस्कं पुंवद् भवति आयौ (प्रत्यये) परे । ब्राह्मणीवाचरति—ब्राह्मणायते । श्वेनी--श्वेतायते, एनी—एतायते, हरिणी—हरितायते, लोहिनी—लोहितायते । श्वेतैततहरितलोहितेभ्यस्तो न इति नदादौ । च्व्यर्थेव तु न भवति । गौणत्वात् । अलोहिनी लोहिनी भवति—लोहिनीयते इत्यन्ये । पुमान् इव पुंवत् स्त्रीति लोकतः सिद्धम् । तत्राधिकारबलादमुख्यमपि नपुंसक पुंवं दिति, तेनातिनूयते । भाषितः पुमान् यस्मिन्नर्थे इति समासात्—द्रोणीयते । कथं श्वश्रूयते ? श्वशुरस्य श्वश्रूङन्तो निपातनात् नाप्तिभावत्वं श्वशुरत्वम् अपितु विशिष्टमेव रूढम् । कथं गर्भीयते शालिः, अन्तर्वर्त्तित्वमात्राविवक्षयेति ।

३२६. आवातामाथामावेरिः ।

अकारात् परयोरातामाथामित्येतयोरादेरिर्भवति । पचेतां, पचेथाम् । अकारादिति किं । व्यत्यपाताम् ।

३२७. आते आथे इति च ।

अकारात् परयोराते आथे इत्येतयोरादेरिर्भवति । पचेते, पचेथे । अविकृतिनिर्देशात् स्वरे विकृतिर्नास्तीति । इति च एवम्प्रकारो द्रष्टव्यः, तेन—पचावहे, आवामिति, इह स्वरे विकृतिर्न स्यात् ।

३२८. या शब्दस्य च सप्तम्याः ।

अकारात् परस्य या शब्दस्य च सप्तम्या इर्भवति । पचेत, पचेतां पचेः । अकारादिति किम् ? अद्यात् ।

३२९. याम्युसोरियमियुसौ ।

अकारात् परयोर्याम् युसोः स्थाने इयमियुसौ भवतः, यथासंख्यम् । पचेयं, पचेयुः । कथम्—आह । आहतुः, आहुः, आत्थ, आहथुः ? ब्रुवस्त्यादिषु पञ्चसु निपाता वा । तथा विदेर्नवसु । —वेद विदतुः विदुः, वेत्थ विदथुः, विद, वेद, विद्वः, विद्मः ।

३३०. शमादीनां दीर्घो यनि ।

शमादीनां दीर्घो भवति यनि परे । शाम्यति, दाम्यति । मदीपर्यन्तः शमादिः । यनीति किम् ? शम्यते ।

३३१. ष्ठिवुक्लम्वाचमामनि ।

एषामनि विकरणे परे दीर्घो भवति । ष्ठीवति, क्लामति, आचामति । आङीति किं ? विचमति, चमति ।

३३२. क्रम: परस्मै: ।

क्रम: परस्मैपदेऽनि दीर्घो भवति । क्रामति । कथं क्राम ? हेर्लोपात् । परस्मा इति किं ? पराक्रमते, उपक्रमते ।

३३३. गमिष्यमाञ्छ: ।

सामान्यमनुवर्त्तते, एषामन्तस्य छो भवति अनि परे । गच्छति, संगच्छते, इच्छति, यच्छति, आयच्छते ।

३३४. प: पिब: ।

पाधातोरनि परे पिबादेशो भवति । पिबति । अदन्तो वा । अनि पारुपस्येति किं ? पं ओ वं – पायति ।

३३५. घ्रो जिघ्र: ।

घ्राधातोरनि परे जिघ्रादेशो भवति । जिघ्रति ।

३३६. ध्मो धम: ।

ध्माधातोरनि परे धमादेशो भवति । धमति ।

३३७. स्थस्तिष्ठ: ।

स्थाधातोरनि परे तिष्ठादेशो भवति । तिष्ठति ।

३३८. म्नो मन: ।

म्नाधातोरनि परे मनादेशो भवति । मनति ।

३३९. दाणो यच्छ ।

दाण्धातोरनि परे यच्छादेशो भवति । यच्छति ।

३४०. दृशे: पश्य: ।

दृशेरनि परे पश्यादेशो भवति । पश्यति ।

३४१. अर्त्तेर्ऋच्छ: ।

अर्त्तेरनिपरे ऋच्छादेशो भवति । ऋच्छति, तिवनिर्देशार्थं एव ।

३४२. सर्त्तेर्धाव: ।

सर्त्तेरनिपरे धावादेशो भवति । धावति । ननु धावु गतावप्यस्ति ? जवाभिधाने यथा स्यादिति वचनं तेन—प्रियामनुसरति ।

३४३ शदे: शीय: ।

शदेरनि परेशीयादेशो भवति । शीयते ।

३४४. सदेः सीदः ।

सदेरनि परे सीदादेशो भवति । सीदति ।

३४५. जा जनेर्विकरणे ।

जनेर्विकरणे जादेशो भवति । जनी—जायते । याणि तु ये वा स्यात्—जायते, जन्यते ।

३४६. ज्ञश्च ।

ज्ञाधातोर्विकरणे जादेशो भवति । जानति ।

३४७. प्वादीनां ह्रस्वः ।

प्वादीनां विकरणे ह्रस्वो भवति । पुनाति, लुनाति । ल्वी चेत्यतो ल्वादिप्वादि-व्यवच्छित्तये वृत् । पूङस्तु-पवते, मूङस्तु—मवते ।

३४८. उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके ।

धातोरुतो वृद्धिर्भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे । रौति, रौषि, रौमि एवं नौति, स्तौति । कथं जुहोति ? जुहोतेरिति निर्देशात् । धातोरिति किम् ? तनोति, सुनोति ।

३४९. ऊर्णोतेर्गुणः ।

परयोगेणात्र वा गम्यते । ऊर्णोते र्व्यञ्जनादौ गुणिनि सार्व्वधातुके परे गुणो भवति वा । प्रार्णोति, प्राणौति ।

३५०. ह्यस्तन्याञ्च ।

ऊर्णोतेर्व्यञ्जनादौ गुणिनि ह्यस्तन्याञ्च नित्यं गुणो भवति । प्रोर्णोत्, प्रोर्णोः । चकारोऽनुक्तसमुच्चयार्थः । तेनेटि वा स्यात्– प्रोर्णविता, प्रोर्णुवीत्, प्रोर्णावीत्, प्रोर्णुवीदित्यपि स्यात् ।

३५१. तृहेरिड्विकरणात् ।

प्रकृतत्वात् सार्व्वधातुकमनुवर्त्तते । तृहेर्विकरणात् पर इडागमो भवति व्यञ्जनादौ गुणिनि सर्वधातुके परे । तृनेढि, तृनेक्षि, तृणेह्मि ।

३५२. ब्रुव ईड्वचनादिः ।

ब्रुव ईड्भवति वचनादिर्भूत्वा व्यञ्जनादौ गुणिनि सार्वधातुके परे, ब्रवीति, ब्रवीतु, अब्रवीत् । चर्करीतादवेति केचित्—बोभवीति, बोभोति ।

३५३. अस्तेर्दिस्योः ।

अस्तेः परयोर्दिस्योर्वचनादि रीड् भवति । आसीत् । आसीः । साहचर्यात्—तिपाधातुस्वरुपनिर्देशात्—अभूत् ।

३५४. सिचः ।

सिचः परयोर्दिस्योर्वचनादिरीड् भवति । अकार्षीत्, अकार्षीः । आगमशासनमनित्यमिति केचित्—मा भैः ।

३५५. रुदादिभ्यश्च ।

रुदादिभ्य परयोर्दिस्योर्वचनादीड् भवति । अरोदीत्, अरोदीः, अस्वपीत्, अस्वपीः, अश्वसीः, अश्वसीत्, प्राणीत्, प्राणीः, अजक्षीत्, अजक्षीः । पञ्चैते रुदादयः ।

३५६. अदोऽट् ।

अदः परयोर्दिस्योर्वचनादिरड् भवति । आदत्, आदः । रुदादेरपि केचित्—अरोदत्, अरोदः ।

३५७. सस्य सेऽसार्वधातुके तः ।

सस्य तकारो भवति असार्वधातुके से परतः । जिघत्सति, वत्स्यति, दित्सा । असार्वधातुके इति किं ? वससे ।

३५८. अणि वचेरोदुपधायाः ।

वचेरुपधाया ओद् भवति अणि परे । अवोचत्, अवोचः । कथं पुस्तकवाचः ? असार्वधातुक इति विशेषणात् । एवमुत्तरत्रापि ।

३५९. अस्यते स्थोऽन्तः ।

अस्यतेरन्तस्थो भवति अणि परे । अपास्थत ।

३६०. पतेः पप्तः ।

पतेः पप्तिर्भवति अणि परे । अपप्तत् । श्वेरद् वक्तव्यः । अश्वत् ।

३६१. कृपे रोलः ।

कृपे रेफस्य लकारो भवति । क्लप्ता, कल्पयति, कल्पः । कथं कॢप्तः कॢप्तिरिति ? रश्रुतेर्लश्रुतिरिति वक्तव्यं वा । इह ऋकारस्थस्य रेफस्यावर्णात्मन ऌकारस्थो लकारोऽवर्णात्मा आन्तरतम्याद् भवन् ऋकारस्य ऌकार एव स्याद् अव्यतिरिक्तत्वात् । कथं कृपा ? लाक्षणिकत्वात् । कृपणादयो ह्यौणादिका इति ।

३६२. गिरतेश्चेक्रीयिते ।

गिरते रेफस्य चेक्रीयिते परे लकारो भवति । गर्हितं गिरति— निजेगिल्यते ।

३६३. वा स्वरे ।

गिरते रेफस्य लत्वं भवति वा स्वरे परे । गिरति, गिलति, निगरणम् निगलनम् । निगल्यते इति इनः स्थानिवद्भावात् । गलः प्राण्यङ्गे, विषे तु गर इति । कपिरिकादेर्लोकतः सिद्धिः—कपिरिका, कपिलिका, रोहिणी, लोहिनी, रोम, लोम, पर्यङ्क, पल्यङ्क, परिघ, पलिघः, परियोगः, पलियोगः, चूडा, चूला, वडभी,

वलभी, जडं, जलं, जडधि, जलधि, डलयोरेकरूपत्वम् । तथोपसर्गस्यायतौ—पलायते, पल्ययते । निर्दुरोर्वा स्यात्—निरयणं, निलयनम्, दुरयनं, दुलयनम् । अतिव्यवहिते नेष्टं—प्रत्ययते ।

३५४. **तृतीयादेर्घढधभान्तस्य धातोरादि चतुर्थत्वं सिध्वोः ।**

धातोरवयवस्य तृतीयादेर्घढधभान्तस्यादेश्चतुर्थत्वं भवति आन्तरतम्यात् सकारे ध्वे च परतः । दुधुक्षति, अधोक्ष्यत्, अधुग्ध्वम्, अघुक्षत्, अघुढ्वम्, बुभुत्सते, अभुद्ध्वम्, धीप्सति, भोत्स्यते, निघोश्यते, इत्याद्यन्तवद्भावात् । सिध्वोरिति किं ? दिदम्भिषति, दुग्धः, दुग्धवान् । पुनर्धातुग्रहणमुत्तरार्थमिह—सुखार्थञ्च ।

३५५. **लोपे च दिस्योः ।**

धातोरवयवस्य तृतीयादेर्घढधभान्तस्यादेश्चतुर्थत्वं भवति दिस्योर्लोपे च सति । अधोक्, अजोघोट्, अबोभोत् । दिस्योरिति किम् ? अदुग्धाः, वर्णाश्रयत्वात् प्रत्ययलोपलक्षणं नास्तीति ।

३६६. **तथोश्च दधातेः ।**

दधातेर्धान्तस्यादेश्चतुर्थत्वं भवति तथोः सिध्योश्च परतः । धत्तः, धत्थः, धत्से, धद्ध्वे । धान्तस्येति किम् ? दधाति, दधासि ।

इति दौर्गसिंह्यां वृत्तावाख्याते षष्ठः पादः समाप्तः ।

३६७. **इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः ।**

धातोर्विहितस्यासार्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिडागमो भवति । भविता, भविष्यति, भवितव्यम् । पुनर्धात्वधिकारो धातुत्वाश्रितासार्वधातुकार्थः, तेन गृह्णाति, वृणोति, जुगुप्सते, मीमांसते । असार्वधातुकस्येति किम् ? शेते, वेत्ति । टकार इटि चेत्यादौ विशेषणार्थः । व्यञ्जनादेरिति किम् ? बभूव, अयकारादेरिति किं ? भूयात् ।

३६८. **स्नुक्रमिभ्यां परस्मै ।**

परस्मैपदविषये यौ स्नुक्रमी ताभ्यां परस्यासार्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिडागमो भवति । प्रस्नविता, प्रस्नविष्यति, क्रमिता, क्रमिष्यति, चिक्रमिषति । परस्मैपदविषये एवेति नियमात्—व्यतिस्नोष्यते, प्रचिक्रंसते, उपचिक्रंसते, प्रोपाभ्यां क्रमी रुचादिः । आदि कर्मणि—प्रस्नवितव्यं, प्रक्रमितव्यमित्यसमानविषयत्वादिट् । कथं प्रक्रान्ता, उपक्रान्ता ? आत्मनेपदविषये क्रमेः कर्त्तरि कृतीटप्रतिषेध एव । प्रस्नवितेवाचरति—प्रस्नवितीयते, आयिरयमात्मनेपदी ।

३६९ **रुदादेः सार्वधातुके ।**

रुदादेर्गणात् सार्वधातुके व्यञ्जनादेरयकारादेरादिरिडागमो भवति । रोदिति,

रुदितः, स्वपिति, स्वपितः, श्वसिति, श्वसितः, प्राणिति, प्राणितः, जक्षिति, जक्षितः। रुद्यत इति परत्वाद् यणा भवितव्यम् :—

> रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा।
> जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः॥

३७०. ईशः से।

ईशः सादौ सार्वधातुके आदिरिड़ागमो भवति। ईशिषे, ईशिष्व।

३७१. ईड्जनोः सध्वे च।

ईड्जनोः सार्वधातुके सकारे ध्वे च परतः आदिरिड़ागमो भवति। ईडिषे, ईडिष्व, ईडिध्वे, ईडिध्वं, व्यतिजज्ञिषे, व्यतिजज्ञिध्वे, व्यतिजज्ञिध्वम्। जन जनने, न जनी यणा व्यवहितत्वात्। सध्वे चेति पठित्वाच्चकारेण ईशिरनुकृष्यते—ईशिध्वे, ईशिध्वम्।

३७२. से गमः परस्मै।

परस्मैपदस्य यो गमिस्तस्मात् परे आदिरिड़ागमभो भवति। गमिष्यति, जिगमिषति, अधिजिगमिषे त्वं, जिगमिषा, जिगमिषु, जिगमिषितव्यम्। परस्मैपदस्येति किम् ? अधिजिगांसते, सङ्गसीष्ट। केचिद् योगं विभज्यात्मनेपदेऽपीट्मिच्छन्ति, तन्मते—सजिगमिषुः, अधिजिगमिषितव्यम्। अनिङ्गमः कृतीत्येके। तदा अधिजिगांसुरिति।

३७३. हनृदन्तात् स्ये।

हन्तेर्ऋदन्ताच्च धातोः स्ये परे आदिरिड़ागमो भवति। हनिष्यति, हनिष्यमाणः, करिष्यति, करिष्यमाणः, स्मरिष्यति, स्मरिष्यमाणः, अस्मरिष्यत्।

३७४. अञ्जेः सिचि।

अञ्जेः सिच्यादिरिड़ागमो भवति। आञ्जीत्, आञ्जिष्टाम्। ऊदनुबन्धत्वाद्विकल्पे प्राप्ते नित्यार्थं वचनम्।

३७५. स्तुसुधूञ्भ्यः परस्मै।

एभ्यः परस्मैपदे सिच्यादि रिडागमो भवति। प्रास्तावीत्, प्रासावीत्, प्राधावीत्। परस्मा इति किं ? प्रास्तोष्ट, प्राधोष्ट। धूञ् कम्पनेऽप्यधावीत्।

३७६. यमिरमिनम्यादन्तानां सिरन्तश्च।

एषां परस्मैपदे सिच्यादिरिड़ागमो भवति सिश्चान्तः। अयंसीत्, अयंसिष्टाम्। व्यरंसीत्, व्यरंसिष्टाम्। अनंसीत्, अनंसिष्टाम्। अयासीत्, अयासिष्टाम्। अम्लासीत्, अम्लासिष्टाम्। अदरिद्रासीत्, अदरिद्रासिष्टाम् ? अन्तग्रहणाद् दरिद्रातेरालोपो न स्यात्। कथम् अदरिद्रीत्, अदरिद्रिष्टाम् ? आगमस्यानित्वाद्विभाषैव।

३७७. स्मिङ-पूङ्-रञ्ज्वशू-कृ-गॄ-दृ-धृ-प्रच्छां सनि ।

एषां सनि परे इडागमो भवत्यादिः । स्मिङ्—सिस्मयिषते । पूङ्—पिपविषते । पूञ्स्तु—पुपूषति, ऋ—अरिरिषति, अन्जू—अञ्जिजिषति, अशू—अशिशिषते, कृ—चिकरिषति, गॄ—जिगरिषति, दृङ् आदरे—दिदरिषते, धृङ् अवस्थाने-दिधरिषते. प्रच्छ् ज्ञीपसायां—पिपृच्छिषति । प्रच्छिसहचरिताः कृ, गॄ, धृ तौदादिकाः । कृञ् हिंसायां—चिकरिषति, चिकीर्षति । गृशब्दे—जिगरिषति, जिगीर्षति । कृगनो-र्ज्ञापकस्य सविकल्पत्वादन्येषामृदन्तानां वा स्यादेव । कथं प्रावुवूर्षते, प्राविवरिषते, संवुवूर्षति, संविवरिषति ? वृङ् वृञोर्नञा निर्दिष्टस्यानित्यत्वात् ।

ऋद्दृङ्वृञ्भ्यां सनीड् वा स्यादात्मने च सिजाशिषोः ।
संयोगादे ऋंतो वाच्यः सुडसिद्धो बहिर्भवः ॥

तॄ—तितरिषति, तितीर्षति, अतरिष्ट, अतीर्ष्ट, तरिषीष्ट, तीर्षीष्ट । वृङ् वृञ् वा—अवरिष्ट, अवृत, वरिषीष्ट, वृषीष्ट । ध्वृ—अध्वरिष्ट, अध्वृत, ध्वरिषीष्ट । समस्कृत, संस्कृषीष्ट इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति ।

३७८. इटो दीर्घो ग्रहेरपरोक्षायाम् ।

ग्रहे परस्य इटो दीर्घोभवति न तु परोक्षायाम् । ग्रहीता, ग्रहीष्यति । अग्रहीत—इट्वात् सिचो लोप स्यात् । अस्य च दीर्घो न स्यात् । कथं ग्राहिता, ग्राहिष्यते ? इज्वादिटोऽश्रुतत्वात् । अपरोक्षायामिति किम् ? जगृहिव, जगृहिम ।

ऋद् वृङ् वृञोऽपि वा दीर्घो न परोक्षाशिषोरिटः ।
न परस्मै सिचि प्रोक्त इति योग विभञ्जनात् ॥

तॄ—तरिता, तरीता । वृङ् वृञ् वा—वरिता, वरीता । वर्ज्जने तु विशशरिव, विशशरिम, ववरिथ, तरिषीष्ट, वरिषीष्ट, अतारिष्टाम्, अवारिष्टाम् ।

३७९. अनिडेकस्वरादातः ।

एकस्वरादाकारान्ताद्धातो परमसार्व्वधातुकमनिड् भवति । दाता, दास्यति, दातव्यम् । एकस्वरादिति किम् ? दरिद्रिता ।

अनात्मने पदस्यात्तु वृत्तादेरिड न स्ये सनि ।
श्वस्तन्याञ्च कृपेर्णेव कृतादेर्व्वापि सेऽसिचि ॥

वृतु—वर्त्स्यति विवृत्सति । वृधु—वर्त्स्यति विवृत्स्यति । शृधु—शर्त्स्यति, शिशृत्स्यति । स्यन्दू—स्यन्त्स्यति सिस्यन्त्सति । कृपू—कल्पस्यति चिक्लृप्सति, कल्प्ता, कल्प्तासे, कृपेः श्वस्तन्यां वा रुचादित्वम् । कृती—कर्त्स्यति, कर्त्तिष्यति । एवं चृती हिंसायां—चर्त्स्यति, चर्तिष्यति । उच्छृदिर्—छर्त्स्यति, छर्दिष्यति । नृती—नर्त्स्यति, नर्त्तिष्यति । असिचीति किम् ? अकर्त्तीत् ।

३८०. इवर्णादश्विश्रिडीङ् शीङः ।

इवर्णान्तादेकस्वरात् श्वि श्रि डीङ् शीङ् वर्जितात् परमसार्वधातुकमनिड् भवति । चेता, चेत्स्यति, चेष्यति, नेता, नेष्यति । अश्विश्रिडीङ् शीङ् इति किम् ? श्वि—श्वयिता । श्रिङ्—श्रयिता । डीङ्—डयिता । शीङ्—शयिता । एकस्वरादिति किम् ? आदीधिता, आवेविता ।

३८१. उतोऽयु-रु-नु-स्नु-क्षु-क्ष्णुवः ।

उकारान्तादेकस्वराद् यु-रु-नु-स्नु-क्षु-क्ष्णुवर्ज्जितात् परमसार्व्वधातुकमनिड् भवति । होता, स्तोता । अयु-रु-नु-स्नु-क्षु-क्ष्णुव इति किम् ? यविता, रविता, नविता, स्नविता, क्षविता, क्ष्णविता । उत इति किं ? लविता । एकस्वरादिति किम् ? प्रोर्णविता ।

३८२. ऋतोऽवृङ् वृञः ।

ऋकारान्तादेकस्वरात् वृङ् वृञ् वर्जितात् परमसार्वधातुकमनिड् भवति । कर्त्ता, हर्त्ता । अवृङ् वृञ् इति किम् ? वृ—वरिता, ऋत इति किम् ? कॄ—करिता । एकस्वरादिति किम् ? जागरिता ।

३८३. शकेः कात् ।

शकेः कान्तात् परमसार्व्वधातुकमनिड् भवति । शक्लृ-शक-शक्ता, शक्ष्यति ।

३८४. पचि-वचि-सिचि-रिचि-मुचेश्चात् ।

एभ्यः पञ्चभ्योऽनिड् भवति । डुपचष् पाके, पच व्यक्तीकरणे वा—पक्ता । वच वचिश्च—वक्ता । सिचिर—सेक्ता । रिचिर्—रेक्ता । मुच्लृ—मोक्ता ।'

३८५. प्रच्छेश्छात् ।

प्रच्छेश्छान्तादनिड् भवति । प्रष्टा, प्रक्ष्यति ।

३८६. यजि-रुचि-रन्जि-भुजि-भजि भन्जि-सन्जि-त्यजि-भ्रस्जि-यजि-मस्जि, सृजि निजि-विजि-स्वन्जेर्ज्जात् ।

एभ्यः पञ्चदशभ्योऽनिड् भवति । युजिर युज्—योक्ता । रुज्—रोक्ता । रन्ज्—रङ्क्ता । भुज्, भुजो—भोक्ता । भज्—भक्ता । भन्—भङ्क्ता । सन्ज्—सङ्क्ता । त्यज्—त्यक्ता । भ्रस्ज्—भ्रष्टा । यज्—यष्टा । टुमस्जो—मङ्क्ता । सृज्—स्रष्टा । निजिर—नेक्ता । विजिर—वेक्ता, न त्वो विजी ईदनुबन्धबलात् । स्वनज्—स्वङ्क्ता ।

३८७. अदि-तुदि-नुदि-क्षुदि-स्विद्यति-विद्यति, विन्दति, विनत्ति-भिदि-भिदि-हृदि-छदि-सदि-पदि-स्कन्दि-खिदेर्दात् ।

एभ्यः षोडशेभ्योऽनिड् भवति। अद्—अत्ता, तुद्—तोत्ता, नुद्—नोत्ता, क्षुदिर—क्षोत्ता, स्विद्—स्वेत्ता, विद सत्तायां, विदॢ लाभे, विद् विचारे वा—वेत्ता। छिदिर—छेत्ता, भिदिर्—भेत्ता, हद्—हत्ता, शदॢ शातने—शत्ता, सदॢ—सत्ता, पद्—पत्ता, स्कन्दिर्—स्कन्ता, खिद्—दैन्ये, खिद् परिघाते वा—खेत्ता।

१८८. राधि-रुधि-क्रुधि-क्षुधि-बन्धि-शुधि-सिध्यति-बुध्यति-युधि-व्यधि-साधेर्धात्।

एभ्य एकादशभ्योऽनिड् भवति। राध्—राद्धा, रुधिर्—रोद्धा, क्रुध्—क्रोद्धा, क्षुध्—क्षोद्धा, बन्ध—बन्द्धा, शुध्—शोद्धा, सिधु—सेद्धा, बुध् अवगमने—बोद्धा, युध्—योद्धा, व्यध—व्यद्धा, साध्—साद्धा।

१८९. हनमन्यतेर्नात्।

आभ्यामनिड् भवति। हन्—हन्ता, मन्—ज्ञाने—मन्ता। कथमवधीत्? नायं नान्त इति।

१९०. आपि-तपि-तिपि-स्वपि-वपि-शपि-छुपि-क्षिपि-लिपि-लुपि सृपेः पात्।

एभ्य एकादशेभ्योऽनिड् भवति। आप्त—आप्ता, तप धूप सन्तापे तप ऐश्वर्ये वा—तप्ता, तिप्त—तेप्ता, ञिष्वप् शये—स्वप्ता। डुवपो—वप्ता, शप आक्रोशे—शप्ता, छुप—छोप्ता, क्षिप—क्षेप्ता, लिप—लेप्ता, लुप्लृ—लोप्ता, सृप्त—सर्प्ता। कथं तर्प्ता, दर्प्ता? रुधादित्वाद्विभाषैव।

१९१. यभरभिलभेर्भात्।

एभ्यस्त्रिभ्योऽनिड् भवति। यब्धा, रब्धा, लब्धा।

१९२. यमि-रमि-नमि-गमेर्मात्।

एभ्यश्चतुर्भ्योऽनिड् भवति। यन्ता, रन्ता, गन्ता।

१९३. रिशि-रुशि-क्रुशि-लिशि-विशि-दिशि-दृशि-स्पृशि-मृशि-दन्शेः शात्।

एभ्यो दशभ्योऽनिड् भवति। रिशि रुश हिंसायां—रेष्टा, रोष्टा, क्रुश—क्रोष्टा, लिश—लेष्टा, विश—वेष्टा, दिश—देष्टा, दृश्—द्रष्टा, स्पृश—स्पर्ष्टा, दन्श—दंष्टा।

१९४. द्विषि-पुष्यति-कृषि-श्लिष्यति-त्विषि पिषि-विषि-शिषि-शुषि-तुषि-दुषेः षात्।

एभ्य एकादशेभ्योऽनिड् भवति। द्विष—द्वेष्टा, पुष्—पोष्टा, कृष—क्रष्टा, श्लिष—श्लेष्टा, त्विष—त्वेष्टा, पिषॢ—पेष्टा, विषॢ—वेष्टा, शिष्ॢ—शेष्टा, शुष—शोष्टा, तुष्—तोष्टा, दुष—दोष्टा।

३९५. वसति घसेः सात् ।

आभ्यामनिड् भवति । वस्—वस्ता, जिघत्सति । नायं दान्त इति ।

३९६. दहि-दिहि-दुहि-मिहि-रिहि-रुहि-लिहि-लुहि-नहि-वहेर्हात् ।

एभ्यो दशभ्योऽनिड् भवति । दह—दग्धा, दिह—देग्धा, दुह—दोग्धा, मिह—मेढा, रिह—रेढा, रुह—रोढा, लिह—लेढा, लुह—लोढा, नह—नद्धा, वह—वोढा । रिहिलुही सौत्रौ धातू, केचिन्न पठन्त्येव । कथं मोढा, सोढा ? मुहे रधादित्वात् सेहू "स्वेषु सहे" त्यादिना विकल्प एव ।

३९७. ग्रहगुहोः सनि ।

ग्रहगुहोः सनि नेड् भवति । ग्रह—जिघृक्षति, गुह—जुघुक्षति ।

३९८. उवर्णान्ताच्च ।

उवर्णान्ताच्च धातोः सनि नेड् भवति । वर्णग्रहणं रुनु-स्नु-क्षु- क्ष्णुवर्थम् । रुरूषति, नूनूषति, सुस्नूषति, चुक्षूषति, चुक्ष्णूषति, लुलूषति ।

३९९. इवन्तर्ध-भ्रस्ज-दम्भु-श्रि-यूर्णु-भर-ज्ञपि-सनि तनि-पति-दरिद्रां वा ।

एषां सनि परे इड् भवति वा । इवन्त—दिदेविषति, दुद्यूषति, ऋधु—अर्दिधिषति, ईर्त्सति, भ्रस्ज्—बिभ्रज्जिषति, बिभ्रक्षति, दम्भु—दिदम्भिषति, धिप्सति, धीप्सति; श्रिञ्—शिश्रयिषति, शिश्रीषति; यु—यियविषति, युयूषति; ऊर्णुञ्—प्रोर्णुनविषति, प्रोर्णुनूषति; भर—बिभरिषति, बुभूर्षति; ज्ञप—जिज्ञपयिषति, ज्ञीप्सति; सनु—सिसनिषति, सिषासति; तनु—तितनिषति, तितांसति; पत्लृ—पिपतिषति, पित्सति; दरिद्रा—दिदरिद्रिषति, दिदरिद्रासति । भ्रस्जभृषणामप्राप्ते विभाषा ।

४००. भुवः सिच् लुकि ।

भुवो धातो सिज्लुकि सति नेड् भवति । अभूत्, अभूताम् । सिज् लुकीति किम् ? व्यत्यभविष्ट ।

४०१. सृ-वृ-भृ-स्तु-द्रु-श्रु-स्रुव एव परोक्षायाम् ।

एभ्य एव परोक्षायामनिड भवति । सृ—ससृव, ससृम, वृङ् वृञ् वा—ववृवहे, ववृमहे, डुभृञ्, भृञ् वा—बभृव, बभृम, ष्टुञ्—तुष्टुव, तुष्टुम; द्रु—दुद्रुव, दुद्रुम; श्रु—शुश्रुव, शुश्रुम; स्रु—सुस्रुव, सुस्रुम; एभ्य एवेति किम् ? पेचिव, शेकिव, देदिव, रुरुन्धिव, नेशिव । रधादित्वाद्विभाषापि बाध्यते । परत्वाद्विकल्प इत्येके—ररन्धिव, रेध्वेति ।

४०२. थल्यृकारात् ।

ऋकारान्ताद्धातोस्थलि नेड्भवति । दधर्थ, जहर्थ । थलीति किम् ? दद्रिव, दद्रिम । ऋकारान्तादिति किम् ? स्तृञ्—तस्तरिथ ।—

"नित्यात्वतां स्वरान्तानां सृजिदृशोश्च वेट थलि ।
तृचि नित्यानिटः स्युश्चेद्वृव्येऽदां नित्यमिट् थलि ॥

पपक्थ, पेचिथ, पपाथ, पपिथ; चिचेथ, चिचयिथ; सस्रष्ठ, ससर्जिष्ठ; दद्रष्ठ, ददर्शिथ । तृचि योऽकारवान् नित्यानिट् इति विशेषणात् । अदेर्घस्लृ—जघसिथ, वेञो वयिः—उवयिथ, अनूजेर्विकल्पेटत्वात् आनञ्जिथ, आरिथ, ववारिथ, विव्ययिथ, आदिथ ।

४०३. कृञोऽसुटः ।

असुटः कृञः परोक्षायां थलि च नेड् भवति। चकृव, चकृम, चकर्थ । असुट इति किम् ? सञ्चस्करिव, सञ्चस्करिम, सञ्चस्करिथ । "स्यसिजाशीः श्वस्तनीषु भावकर्मार्थिकासु च" । "स्वरहनग्रहदृशामिड्वेज्वच्चे" ति, वक्तव्यम् ; चेष्यते, चायिष्यते । दास्यते, दायिष्यते । अचेष्यते, अचायिष्यत; अदास्यत, अदायिष्यत । हनिष्यते, घानिष्यते । अहनिष्यत, अघानिष्यत । ग्रहीष्यते, ग्राहीष्यते । अग्रहीष्यत, अग्राहिष्यत; द्रक्ष्यते, दर्शिष्यते; अद्रक्ष्यत, अदर्शिष्यत । सिचि च—अचेषाताम् अचायिषाताम् । अदिषाताम्, अदायिषाताम् । अवधिषाताम्, अघानिषाताम् । अग्रहीषाताम्, अग्राहिषाताम् । अदृक्षताम्, अदर्शिषाताम् । आशिषि च—चेषीष्ट, चायिषीष्ट । दासीष्ट, दायिषीष्ट । वधिषीष्ट, घानिषीष्ट, ग्रहीषीष्ट, ग्राहिषीष्ट, द्रक्षीष्ट, दर्शिषीष्ट । श्वस्तन्याञ्च—चेता, चायिता, दाता, दायिता, हन्ता, घानिता; ग्रहीता, ग्राहिता, द्रष्टा, दर्शिता । इज्वद्भावादिटस्तु कारितलोप; स्यात्—कारयिष्यते, कारिष्यते, चोरयिष्यते, चोरिष्यत । मानुबन्धानां ह्रस्वो नित्यं गमिष्यते ।

४०४. सुड्-भूषणे सम्पर्युपात् ।

भूषणेऽर्थे सम्पर्युपात् परस्य कृञः सुडादिर्भवति । संस्कर्त्ता, सञ्चस्कार, सञ्चस्कार्षीत्, परिष्कर्त्ता, परिचस्कार, पर्यस्कार्षीत् । अडभ्यासव्यवधानेऽपि षत्वमिष्यते उपस्कर्त्ता, उपचस्कार, उपास्कार्षीत । एवं समवायेऽपि वक्तव्यम् । भूषणसमवायाभ्यामन्यत्रापि दृश्यते—संस्कृतमिश्मनित्यमिति । उपात् प्रतियत्नविकृतवाक्याध्याहारेषु वक्तव्यः । असिपत्रस्योपस्कुरुते, उपस्कृतं भुङ्क्ते— विकृतं भुङ्क्ते इत्यर्थः । उपस्कृतं जल्पति—वाक्याध्याहारं जल्पतीत्यर्थः ।

इति दौर्गसिंह्यां वृत्तावाख्याते सप्तमः पादः समाप्तः ।

अष्टमः पादः

४०५. **पदान्ते धुटां प्रथमः ।**

पदस्यान्ते वर्त्तमानानां धुटां वर्णानामन्तरतमः प्रथमो भवति । त्वन्नाथः, षण्मुखानि, ज्ञानभुट्टीकनम्, त्वच्छत्रम्—ककुब्भासः । वर्गप्रथमलक्षणं स्यात् । अलेट्, अलेड्, आसीत्, आसीद्—वा विराम इत्यस्य बाधकत्वात् प्रथमतृतीयौ । पदग्रहणम प्रकृतस्यापि लिङ्गस्य परिग्रहार्थम्, तेन च धातोरन्ते न स्यात्—वदति, एधते । धुटामिति किम् ? अहन्, अपचम् ।

४०६. **रसकारयोर्विसृष्टः ।**

पदान्ते वर्त्तमानयो रेफसकारयोर्विसृष्टो भवति । अबिभः, पचावः । पदान्त इति किम ? बिभर्ति, आस्महे । अत एवारम्भ इति । कथमभिनस्त्वम्, अभिनत्वम्, अरुणस्त्वम्, अरुणत्वम् ? सो पदान्ते रेफप्रकृत्योरपि वा दधोरत्वं स्यात् ।

४०७. **घढधभेभ्यस्तथोर्धोऽधः ।**

घढधभेभ्यः परयोस्तथोर्धो भवति न तु धाञः । अदुग्ध, अदुग्धाः, अलीढ, अलीढाः, अबुद्ध, अबुद्धाः, अलब्ध, अलब्धाः, अध इति किम् ? धत्तः, धत्थः ।

४०८. **षढो कः से ।**

षढो को भवति से परे । पेक्ष्यति, पिपिक्षति, लेक्ष्यति, लिलिक्षति । स इति किम् ? पिनष्टि लेढि ।

४०९. **तवर्गस्य षटवर्गाट्टवर्गः ।**

षाट्टवर्गाच्च परस्य तवर्गस्य टवर्गो भवति आन्तरतम्यात्, वपुष्टरम्, वपुष्टा, द्वेष्टि, द्विष्टः पिण्ढि, कृष्णाति, ईट्टे, लीढः, अलीढ्वम् । टवर्गाट्टवर्ग इति किम् ? वक्ता, पपक्थेति सिद्धयर्थम् । कथं मधुलिट् तरति– मधुलिड् तरः ? अन्त्यत्वात् ।

४१०. **ढे ढलोपो दीर्घश्चोपधायाः ।**

ढे परो ढलोपो भवति उपधायाश्च दीर्घः । लीढः, मूढः । कथं लेढा, द्रोढा, अन्तरङ्गत्वादगुणे कृते ढलोप एव स्यात् । उपधाग्रहणस्य संज्ञा पूर्वकत्वादृतो न स्यात्, तेन वृह्-वृढः, दृह्-दृढः ।

४११. **सहिवहोरोदवर्णस्य ।**

सहिवहोर्ढे परे ढलोपो भवति, अवर्णस्योद् भवति । सोढा, वोढा । कथमूढः,

ऊढवान् ? अन्तरङ्गत्वान्नित्यत्वाद् वा सम्प्रसारणम् । वर्णग्रहणं किम् ? उदवोढाम् । सिचि अस्य च दीर्घत्वेऽपि स्यात् ।

४१२. धुटान्तृतीयश्चतुर्थेषु ।

धातूनां धुटां वर्णानां तृतीयो भवति चतुर्थेष्वेव परतः । दोग्धा, द्विड्ढि, चकाद्धि, लब्धा । चतुर्थेष्वेवेति नियमात् शक्यते, द्विष्टः ।

४१३. अघोषेष्वशिटां प्रथमः ।

अघोषेषु परतो धातूनामशिटामेव धुटां प्रथमो भवति । घोक्षि, भेत्ता, बुभुत्सते, युयुत्सते, आरिप्सते । अशिटामेवेति किम् ? अस्ति ।

४१४. भृजः स्वरात् स्वरे द्विः ।

भृजः स्वरात् परस्य स्वरे द्विर्भवति । भृजी-बभृज्जे, बभृज्जाते, बभृज्जिरे । आद्यव्याकरणमतमेतत् ।

४१५. अस्य वमोर्दीर्घः ।

अकारस्य दीर्घो भवति वमोः परतः । पचामि, पचावः, पचामः, दीव्यामि दीव्यावः, दीव्यामः । अस्येति किम् ? दध्वः, दध्मः । यदि दीर्घः स्यात् तदा आलोपो न स्यात् । कथं पचमानः, अपचम् ? वमोर्वर्णयोराद्ययो साहचर्यात् ।

४१६. स्वरान्तानां सनि ।

स्वरान्तानां धातूनां सनि परे दीर्घो भवति । चिचीषति, जुहूषति, चिकीर्षति, तुष्टूषति । कथं शिश्रयिषति, बिभरिषति ? गुणेनाघ्रातत्वात् । स्वरान्तानामिति सुखार्थमेव ।

४१७. इनिङ्गमोरुपधायाः ।

इङो गम इङ्गम् । इनिङ्गमोरुपधाया दीर्घो भवति सनि परे । जिघांसति, अभिजिगांसते । इङो गम इति किं ? संजिगंसते । तितांसति, तितनिषतीति वा वक्तव्यम् ।

४१८. नामिनोर्वोरकुर्च्छुरोर्व्यञ्जने ।

नात्र तदन्त विशेषणम् । र्वोरुपधाया धातोर्नामिनो दीर्घो भवति व्यञ्जने परे, न तु कुर्च्छुरोः । चिकीर्षति, बुभूर्षति, दीव्यति, सीव्यति, कूर्दते, खूर्दते । धातोरिति किं ? कुक्कुरः । कथं कुकुरीयति नामधातुत्वात् ? नामिन इति किम् ? कर्त्ता, भव्यम् । र्वोरिति किम् ? नृत्यति । अकुर्च्छुरोरिति किं ? कुर्य्यात्, दीर्घविधि प्रति न स्थानिवद्भिति छुर्य्यते । कथं री रेषणे—रिय्यतुः, वी प्रजने—विव्यतुः, अभ्यासे प्रतिषेध इति । व्यञ्जन इति किम् ? किरति, गिरति, नुवति ।

४१९. सस्य ह्यस्तन्यां दो तः ।

सस्य ह्यस्तन्यां दो परे तो भवति । अचकात्, अन्वशात् । ह्यस्तन्यामिति किम् ? अभैत्सीत्—ईटस्तद्ग्रहणेन ग्रहणात् । ह्यस्तन्यां सो वा वक्तव्यम् । अचकात्त्वम्, अचकास्त्वम् ।

४२०. अडागमो धातोरादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु ।

ह्यस्तन्यादिषु परतो धातोरादिरडागमो भवति । अकरोत्, अकार्षीत्, अकरिष्यत् । धातोरिति किं ? न्यविशत ।

४२१. स्वरादीनां वृद्धिरादेः ।

स्वरादीनां धातूनां ह्यस्तन्यादिष्वादे स्वरस्य वृद्धिर्भवति आन्तरतम्यात् । ऐधत, ऐधिष्ट, ऐधिष्यति । कथं ऐज्यते, औप्यते, औह्यते । अन्तरङ्गत्वादडागमे यणि सम्प्रसारणे च सन्धौ पदान्तरङ्गा वा यणादयः ।

४२२. अवर्णस्याकारः ।

स्वरादीनां धातूनामादेरवर्णस्याकारो भवति ह्यस्तन्यादिषु परतः । आटत्, आटीत, आटिष्यत आप्नोत आपत्, आप्स्यत् । "अवर्ण सर्व्वमुखस्थान" मित्येके, एकदेशेनान्तरतम्यात् सर्वा वृद्धयो मा भूवन्निति वर्णग्रहणम् ।

४२३. अस्तेः ।

अस्तेर्ह्यस्तन्यामगुणेऽवर्णस्याकारो भवति । आस्ताम्, आसन्, व्यत्यास्त । परोऽप्यवर्णस्याकारो लोपेन बाध्यते, अस्तिमात्राश्रयत्वात् ।

४२४. एतेर्ये ।

ह्यस्तन्यामि एतेर्ये परेऽटो वर्णस्याकारो भवति । आयन्, अध्यायन् । परापि वृद्धिरिणमात्राश्रितेन यत्नेन बाध्यते । य इति किं ? अगात् ।

४२५. न मामास्मयोगे ।

मायोगे मास्म योगे च धातोर्ह्यस्तन्यादिष्वडागमादयो न भवन्ति । मा भवान् करोत्, मास्म करोत् । "जुगुप्सत स्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्त इति मतम् । मा भवान् कार्षीत् । मास्म कार्षीत् । संयुक्ते न स्यादिति मास्म ग्रहणम् । साहचर्यान्मनो न स्यात्, मा भवानपश्यत् ।

४२६. नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु यो धकारस्तस्य ढकारो भवति । चेषीढ्वम्, कृषीढ्वम्, अच्योढ्वम्, सर्नेरिढ्वम्, तुष्टुढ्वे, चकृढ्वे । अन्तग्रहणं

भूतपूर्वनाम्यन्तार्थम्, तेन प्रावरिषीढ्वम्, अलविढ्वम्, लुलुविढ्वे, धातोरिति संज्ञा पूर्वकत्वादनित्यार्थम् । तेनामु, सेटसु विभाषा सिद्धा—प्रावरिषीढ्वम् प्रावरिषीध्वम्, अलविढ्वम्, अलविध्वम्, दिदीयिढ्वे, दिदीयिध्वे इत्यपि स्यात् ।

४२७. **मर्ज्जो मार्ज्जिः ।**

मर्ज्ज इत्येतस्य मार्ज्जिरादेशो भवति । मार्ष्टा, मार्क्ष्यति, अमार्ट्, मार्ज्जो वर्त्तते । मर्ज्ज इति किं ? मृष्टः, मृष्टवान् । अगुणे स्वरे वा वक्तव्यम् । परिमार्ज्जन्ति । परिमृजन्ति ।

४२८. **धात्वादेः षः सः ।**

धातोराद्यावयवस्य षकारस्य सकारो भवति । षह—सहते । षिचिर्—सिञ्चति । धातोरिति किम् ? षट्, षण्डः । आदेरिति किं ? लषिता, लषितुम् । कथं षण्डीयति ? नामधातुत्वात् ? धातोश्चारम्भको यिन्, न षकार इति, "ष्ठिवुक्लम्वाचमामनी" इति निर्देशात् ष्ठीवति, ष्ठीवेरपि षकारः ष्ठकारपरस्थकार परो वेति मतं, तेन टेष्ठीव्यते तेष्ठीव्यत इति सिद्धम् । ष्वक्केर्न स्यादिति वक्तव्यम्, ष्वक्कते । इह निमित्ताद् विकारस्य सस्य षत्वार्थः षोपदेशो धातूनामिति । तत्र च स्वरदन्त्यपराः सादयः षोपदेशा इति, ष्मिङ्—ष्विदि-ष्वदि-ष्वपयश्च । सृपि-सृजि-स्तृ-स्त्या-सीकृ-सेकृ-वर्ज्जम् ।

४२९. **णो नः ।**

धात्वादेर्णकारस्य नकारो भवति । णीञ्—नयति । णम—नमति । धात्वादेरिति किम् ? क्वणति, कथं णकारीयति ? नामधातुत्वात् । इहाप्युपसर्गादसमास इति णोपदेशस्य नस्य णत्वार्थो णकारपाठ इति । सर्वे नादयो णोपदेशा नृति-नन्दि-नर्द्दि-नक्कि-नाटि-नटि-नॄ-नाथृ-नाधृवर्ज्जम् ।

४३०. **निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम् ।**

अन्त्यार्थोऽयमारम्भः । निमित्तान्नामिककाररेफात् परः प्रत्ययविकारागमस्थ सः षत्वमापद्यते । नामिनस्तावत्—चिचीषति, लूलूषति, सर्पिष्यति, धनुष्यति ककारात्—शक्ष्यति, विवक्षति । रेफात्—चिकीर्षति । विकारस्थः—सिषेवे, सुष्वाप । आगमस्थः—परिष्करोति, वचनाद्भिन्नपदेऽपि व्यपदेशिवद्भावात् । प्रत्ययविकारागमस्थ इति किम् ? सृप्लृ—सिसृप्सति । सेकृ—सिसेकिषति । तस्यैवापिशब्दस्यायं प्रपञ्चार्थ इति । तथा उपसर्गात् सुनोति-सुवति-स्यति-स्तौति-स्तोभतं नामडन्तरो अपि —अभिषुणोति, अभ्यषुणोत्, अभिषुवति, अभ्यषुवत्, अभिष्यति, अभ्यष्यत्, अभिष्टौति, अभ्यष्टौत्, अभिष्टोभते, अभ्यष्टोभत । तथा स्था सेनिसेधति-सिच्-सञ्ज्-स्वञ्जा-मडभ्यासान्तरश्च—अभिष्ठास्यति, अभ्यष्ठात्, अभितष्ठौ । सेनया

अभियाति—अभिषेणयति, अभ्यषेणयत्, अभिषिषेणयिषति। प्रतिषेधति, प्रत्यषेधत्, प्रतिषिषेधयिषति। अभिषिञ्चति अभ्यषिञ्चन् अभिषिषिक्षति, अभिषजति, अभ्यषजत्, अभिषिषङ्क्षति। परिष्वजते, पर्यष्वजत, परिषिष्वङ्क्षते। सदेरप्रतेः। —निषीदति, न्यषीदत्, निषिषत्सति। अप्रतेरिति किम् ? प्रतिसीदति, प्रत्यसीदत्, प्रतिसिसत्सति। प्रतेरपि स्तम्भेः। प्रतिष्टभ्नाति, प्रत्यष्टभ्नात्, प्रतितष्टम्भ। एवम् अभिष्टभ्नाति, अभ्यष्टभ्नात्, अभितष्टम्भ। अवादौर्जित्यनिकटाश्रयेषु—मल्लस्यावष्टम्भः, अवष्टब्धा सेना, दण्डमवष्टभ्यास्ते। एष्विति किम् ? अवस्तब्धो वृषल (णः)—शीतेन सङ्कुचित इत्यर्थः। वेश्च स्वनो भोजने—विष्वणति, अवष्वणति, व्यष्वणत्, अवाष्वणत्, विषष्वाण, अवषष्वाण—'सशब्दं भुङ्क्त' इत्यर्थः। एवमन्येऽप्यनुसर्त्तव्याः।

४३१. **शासि-वसि-घसीनाञ्च।**

निमित्तात् परः शासिवसिघसीनाञ्च स षत्वमापद्यते। शिष्यते, उष्यते, जक्षतुः। अविकारस्थ इत्यारम्भः।

४३२. **स्तौतीनन्तयोरेव षनि।**

निमित्तात् परः प्रत्ययविकारागमस्थ स्तौतीनन्तयोरेव षत्वभूते षनि सः षत्वमापद्यते। तुष्टूषति, सिषेधयिषति, सुष्वापयिषति। स्तौतीनन्तयोरेवेति किम् ? सिसिक्षति, सुसूषति, षत्वभूत इति किम् ? तिष्ठासति, सुषुप्सति। कथं सोषुपिषते ? चेक्रीयिते षत्वं पश्चात् सन्। अर्थात् प्रतीषिषति इति सनोऽवयवस्यानभ्यासस्यानिमित्तात् षत्वं स्यादेव। स्विदि-स्वदि-सहीनामिनन्तानां नेष्यते—सिस्वेदयिषति, सिस्वादयिषति, सिसाहयिषति। तेनैवापिशब्देनान्यदपि व्यभिचार्यते। तथा सिचश्चेक्रीयिते न स्यात्—सेसिच्यते। सुनोतेः स्ये—अभिसोष्यते। सेधतेर्गतौ—अभिसेधयति गां—गमयतीत्यर्थः। एवमन्येऽप्यनुसर्त्तव्याः।

४३३. **लुग्लोपे न प्रत्ययकृतम्।**

लुका लोपे सति प्रत्यये परे प्रकृतेर्यत् कार्यं तन्न भवति। लुका लोपो यस्येति विग्रहः। अङ्गा, वङ्गा, कलिङ्गा, पञ्च, कति, दुग्धे, स्तुते। विकरणस्य लुकि न गुणः, लुकीति न कृतं लुग्लोपयोर्विशेषप्रतिपत्त्यर्थम्, तेन प्रत्ययलोपे प्रत्ययलक्षणमवधार्यते—अभित्त, अच्छित्त। प्रत्ययकृतमिति किम् ? परस्यान उस्—उद्गुः, अदुः। कतीह, पञ्चात्र सन्धिः स्यादेव।

४३४. **स्वरविधिः स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने।**

द्विर्वचननिमित्ते स्वरादौ प्रत्यये परे प्रकृतेः पूर्वस्मिन् परस्मिन् वा द्विर्वचने कृते पश्चात् स्वरस्य स्थाने विधिर्भवति। पपतुः, आटिटत्, जग्मतुः इयाय, निनाय, लुलाव, निनयिथ, लुलविथ, निन्यतुः, चक्रतुः। स्वरविधिरिति किम् ? असूषुपत्—

सपरस्वरायाः सम्प्रसारणे कृते पश्चाद् द्विर्वचनम्। स्वर इति किम् ? जेघ्रीयते, द्विर्वचननिमित्त इति किम् ? दुद्यूषति। येन विना यन्न भवति तत्तस्य निमित्तम्। इह पुनरिटो विधिना सनि द्विर्वचनं तेनारिरिषतीति सिद्धम्। कथमियेष उवोष ? न स्थानिवत्त्वम् असवर्ण इति वचनात्।

४३५. योऽनुबन्धोऽप्रयोगी।

अनुबध्यत इत्यनुबन्धः, अप्रयुक्तिरप्रयोगः। अनुबन्धो य सोऽप्रयोगी अनुच्चारणीयो भवति। इङ्—अधीते। डु कृञ्, कुरुते। एवमन्येऽपि।

४३६. शिडिति शादयः।

शादयो वर्णा हपर्यन्ता शिडिति संज्ञिताः। शिट् प्रदेशाः "शिट् परोऽघोष" इत्येवमादयः।

४३७. सम्प्रसारणं यवृतोऽन्तस्थानिमित्ताः।

इश्च उश्च ऋश्चेति द्वन्द्वः। तकारसुखनिर्देशार्थः। अन्तस्थैव निमित्तमुत्पत्तिर्येषां तेऽन्तस्थनिमित्ता यृतः सम्प्रसारणमिति संज्ञिताः। सम्प्रसारणप्रदेशाः— "सपरस्वरायाः सम्प्रसारणमन्तस्थायाः" इत्येवमादयः। अन्तस्थानिमित्ता इति किं ? स्थितं, स्थितः, स्थितवान्, तद्दीर्घमन्त्यं न स्यात्।

४३८. अर् पूर्व्वे द्वे सन्ध्यक्षरे च गुणः।

अर् पूर्व्वे द्वे सन्ध्यक्षरे च गुण इति संज्ञिते। एकं पूर्व्वमेकारमपेक्ष्य अपरञ्चौकारमपेक्ष्य इति। गुणप्रदेशाः "नाम्यन्तयोर्धातुविकरणयोर्गुणः" इत्येवमादयः।

४३९. आरुत्तरे च वृद्धिः।

आर् उत्तरे च द्वे सन्ध्यक्षरे वृद्धिरिति संज्ञिते। आर्, ऐ, औ। वृद्धिप्रदेशाः वृद्धिरादौ सणे" इत्येवमादयः।

इति दौर्गसिंह्यां वृत्तावाख्यातेऽष्टमः पादः समाप्तः।

कलाप-व्याकरणम्

(कातन्त्रम्)

कृद्वृत्तिः

नमो गणेशाय

प्रथमः पादः

वृक्षादिवदमी रुढ़ा कृतिना न कृताः कृतः ।
कात्यायनेन ते सृष्टा विबुद्धि-प्रतिबुद्धये ॥

१. **सिद्धिरिज्वञ्-ञ्णानुबन्धे ।**

ञानुबन्धे, णानुबन्धे च कृत्प्रत्यये परे धातोरिचीव कार्य्यस्य सिद्धिरतिदिश्यते । "इज्वद्भावेऽस्योपधाया दीर्घो वृद्धिश्च नामिनाम् । हन्तेर्घो जनवधोह्रस्वः कुटादीनां गुणो भवेत् । स्यादादन्तानामायिश्च इर्नोचोति निबन्धनात् । न ह्रस्वो मानुबन्धानामिचि व वचनेन च"—"पाठः, पाठकः, कारः, कारकः, घात,, घातकः, जनः, जनकः, वधः, वधकः, उत्कोटः, उत्कोटकः, पायः: पायकः, सिद्धिग्रहणं भिन्नकर्त्तृकत्वान्मङ्गलार्थम् ।

२. **हन्तेस्तः ।**

हन्तेर्नकारस्य तकारो भवति ञानुबन्धे णानुबन्धे च कृत्प्रत्यये परे । घातः, घातकः । कथं भ्रौणहत्यमिति ? रुढ़ितः सिद्धिः ।

३. **न सेटोऽमन्तस्यावमिकमिचमाम् ।**

इञ् मात्रमिह स्मर्यते । सेटोऽमन्तस्य वमि.कमि-चमि-वर्ज्जितस्य इचि कृतं कार्यन्न भवति । अशमि, अतमि, ञानुबन्धे कृतीज्वद्भावाच्च—शमः, शमकः, शमी, तमः, तमकः, तमी । सेट इति किम् ? अयामि, यामः, यामकः । अवमि कमिचमामिति किम् ? अवामि, अकामि, अभिधानाद् आङ्पूर्वश्चमिः—आचामि, वामः, कामः, आचामः । कथमामः ? अम रोग इति चौरादिक इनि दीर्घः । वौ श्रमेर्नञा निर्दिष्टस्यनित्यत्वाद् विश्रामः । कथमुद्यमः । ? यम इति चुरादौ मानुबन्धः, उपरम इति च दृश्यते ।

४. **प्रत्ययलुकञ्चानाम् ।**

प्रत्यये लुक् येषां धातूनामेकदेशस्य ते प्रत्ययलुकः, अर्थात् अनामित्यनकारकाणां प्रत्ययलुकां धातूनां नलोपवर्ज्जितानां यत्प्राप्तं तन्न भवति, अर्थात्

तस्मिन्नेव प्रत्यये परे। समिधिता, समिधकः, अदृशदि, दृशदकः—यिन्। नोनुवः, मरीमृजः, तस्य लुगचि, अस्योपधाया दीर्घो गुणश्च न स्यात्, प्रत्ययस्य लुग्येभ्यः इत्युक्ते—मेघात्, वेत्तीति इन्ननोलुकि प्रतिषेधः स्यात्। अनामिति किम्? घञोन्धेः—एधः, उन्देर्म्मनि—ओद्म, रञ्जेः—रागः। कथं कुञ्चेर्निकुचितमिति? सन्निपात-लक्षणत्वादगुणस्य।

५. सार्व्वधातुकवच्छे।

शानुबन्धे कृति परे सार्व्वधातुक इव कार्यम्भवति। जुह्वत्, पचमानः, "कृञः श च"—क्रिया, यस्य यदुक्तं तस्य तदेव श्रुतत्वात्।

६. ङे न गुणः।

ङानुबन्धे कृति परे गुणो न भवति। बिभ्यत्, विद्वन् सुन्वन्, चिन्वन्। कतीह मधु लिहानाश्चिन्वानाः।

७. के यण्वच्च योक्तवर्ज्जम्।

कानुबन्धे कृति परे यणीव कार्य्यम्भवति। ये उक्तं वर्ज्जयित्वा। कृतः, कृतवान्, गृहीत्वा, इष्टिः यण्वद्भावेऽगुणत्वं सम्प्रसारणञ्च स्यात्। योक्तवर्ज्जमिति किम्? कृतः, चितः, स्मृतः, इकाराऽगम-दीर्घ-गुणा न स्युः।

८. जागुः कृत्यशन्तृङ्व्योः।

जागर्त्तेः कृति परे यणीव कार्यम्भवति, न तु शन्तृङ्व्योः। यणाशिषोर्य्ये—जागरूकः, जागरितः, जागर्त्ति। कृतीति किम्? जागृयात्। अशन्तृङ्व्योरिति किम्? जाग्रत, जागृविः,—"कृ-गृ-जागृभ्यः क्विः"—

९. गुणी क्त्वा-सेड्रुद-विद-क्षुध-कुश-क्लिश-गुध-मृड-मृद-वद-वस-ग्रहाम्।

अरुदादि क्षुधादीनां क्त्वा सेड्गुणी भवति। यस्मिन् यो भवति स तस्येति विवक्षायाम्। शयित्वा, देवित्वा, स्रंसित्वा। क्त्वेति किम्? निकुचितिः? कृत्वा। अरुदादिक्षुधादीनामिति किम्? रुद्विद्मुषां सनीत्यत्र रुदिसहचरितो विदिज्ञानार्थः—रुदित्वा, विदित्वा, मुषित्वा, क्षुधित्वा, कुशित्वा, क्लिश, क्लिशू-क्लिशित्वा, गुधित्वा। व्युपधत्वाद् वा न स्यात्। मृडित्वा, मृदित्वा, वद—उदित्वा, वस निवास एव यजादित्वात्,-उषित्वा, क्षुधिवसोश्चेतीट्। गृहीत्वा।

१०. स्कन्द-स्यन्दोः क्त्वा।

अनयोः क्त्वा गुणी भवति। स्कन्दिर्-स्कन्त्वा। स्यन्दू—स्यन्त्वा। असेडर्थमिदं। पुनः क्त्वा ग्रहणं यद्गुणी माभूत्—प्रस्कद्य प्रस्यद्य।

११. व्यञ्जनादेर्व्युपधस्यावो वा।

उश्च इश्च वी, ते उपधे यस्य स व्युपधः। व्यञ्जनादेर्धातोरुकारेकारोपध-स्याकारान्तस्य क्त्वा सेड्गुणी भवति वा। द्युतित्वा, द्योतित्वा, लिखित्वा, लेखित्वा।

व्यञ्जनादेरिति किम् ? एषित्वा, उषित्वा । अव इति किम् ? देवित्वा, संश्चेति वा वक्तव्यम्—रुरुचिषते, रुरोचिषते, लिलिखिषति, लिलेखिषते ।

१२. तृषि-मृषि-कृशि-वञ्चि-लुञ्च्यृताञ्च ।

एषां सेट्क्त्वा गुणी भवति वा । तर्षित्वा, तृषित्वा, मर्षित्वा, मृषित्वा, कृश-तनूकरणे—कर्शित्वा, कृशित्वा, वञ्चित्वा, वचित्वा, लुञ्चित्वा, लुचित्वा । ऋत इति सौत्रो धातुः अर्तित्वा, ऋतित्वा ।

१३. थ-फान्तानाञ्चानुषङ्गिणाम् ।

थान्तानां फान्तानाञ्चानुषङ्गिणां सेट् क्त्वा गुणी भवति वा । श्रन्थित्वा, श्रथित्वा, ग्रन्थित्वा, ग्रथित्वा, गुम्फित्वा गुफित्वा । अनुषङ्गिणामिति किं ? कोथित्वा, रेफित्वा, व्युपधत्वेऽपि विकल्पो न स्यात् ।

१४. जान्तनशामनिटाम् ।

जान्तनशामनिटामनुषङ्गिणां क्त्वा गुणी भवति वा । भङ्क्त्वा, भक्त्वा; रङ्क्त्वा, रक्त्वा, नंष्ट्वा, नष्ट्वा —"मस्जिनशोर्धुटीति नकारागमः । अनिटामिति किम् ? अञ्जित्वा ।

१५. शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदां निष्ठा सेट् ।

शीङादीनां सेड्निष्ठा गुणी भवति । शयितः, शयितवान्, परितः, परितवान्, पूङ्क्लिशोर्वेतीट् । धर्षितः, धर्षितवान्, क्ष्वेदितं, स्वेदितं, मेदितं, प्रक्ष्वेदितः, प्रस्वेदितः, प्रमेदितः,—आदनुबन्धत्वाद्भावादिकर्म्मणोर्वेतीट् । सेडिति किम् ? पूतः, धृष्टः । उत्तरत्र वावचनान्नित्यमिहेति ।

१६. मृषः क्षमायाम् ।

क्षान्तौ वर्त्तमानान्मृषो धातोर्निष्ठासेड्गुणी भवति । मर्षितः, मर्षितवान् । क्षमायामिति किम् ? अपमृषितं वाक्यमाह ।

१७. भावादिकर्म्मणोर्वोदुपधात् ।

उदुपधात् धातोर्भावे आदिक्रियायाञ्च निष्ठासेड्गुणी भवति वा । द्युतितमनेन, द्योतितमनेन, प्रद्युतितः, प्रद्योतितः—आदिकर्मणि क्तः कर्त्तरि च । व्यवस्थित-वाधिकाराद्गुप्यनः स्यात्—[नि] गुधितम् ।

१८. ह्लादो ह्रस्वः ।

ह्लादो दीर्घो ह्रस्वो भवति निष्ठामात्रे । प्रह्लन्नः, प्रह्लन्नवान् । प्रह्ल-त्तिरिति क्तौ चेष्यते ।

१९. छादेर्घस्-मन्-त्रन्-क्विप्सु च ।

छादेर्धातोर्घं इस्-मन-त्रन्-क्विप्-एषु परयो दीर्घो ह्रस्वो भवति । छद खट्व संवरणे-उरश्छदः, प्रच्छदः । एकोपसर्गस्यैव घे व्यवस्थितत्वास्मरणात्, तेन—समुच्छादः । अचि-शुचि-रुचि-हु-सृपि-छादि-छर्दिभ्य इस्—छादयतीति छदिः, छदिषी, छदींषि । मन्-छद्म, त्रन्-छाद्यतेऽनेनेति छत्रम् । क्विप्—तनुच्छत् ।

२०. दीर्घस्योपपदस्यानव्ययस्य खानुबन्धे ।

दीर्घान्तस्योपपदस्यानव्ययस्य खानुबन्धे प्रत्ययान्ते धातौ परे ह्रस्वो भवति । वधुम्मन्यादासी, ग्रामणिम्मन्यो दासः । वृद्धम्मन्या, कालिम्मन्या, हरिणिम्मन्येति विवक्षितकर्त्तृकर्म्मैकवस्तुप्राप्तं पुंवद्भावं बाधते [परत्वात्] । दीर्घग्रहणं तदन्तसुखार्थमित्येके, वाङ्मन्या । उपपदस्येति किम् ? पट्वी प्रियंवदा । अनव्ययस्येति किं ? दिवामन्या रात्रिः ।

२१. नामिनोऽम् प्रत्ययवच्चैकस्वरस्य ।

उपपदस्यानव्ययस्यैकस्वरस्य नामिनः परोऽम् भवति खानुबन्धप्रत्ययान्ते धातौ परे, स च प्रत्यय इव सान्निध्याद्द्वितीयैकवचनवत्, यथा—रविकरस्तरुषु किशलयमिव (किसलयमिव) रक्त इति गम्यते । नावम्मन्य , नरम्मन्यः, श्रियम्मन्यः, माम्मन्यः । नामिन इति किं ? ज्ञम्मन्या । एकस्वरस्येति किम् ? सेनानिम्मन्यः ।

२२. ह्रस्वारुषोर्मोऽन्तः ।

उपपदस्यानव्ययस्य ह्रस्वान्तस्यारुषश्च मकारोऽन्तो भवति खानुबन्धप्रत्ययान्ते धातौ परे । नाडिन्धमः, अङ्गमेजयः [जनमेजयः] अरुन्तुद. ।—संयोगादेर्धुट इति सलोपः । अनव्ययस्येति किं ? सुकरः कटः ।

२३. सत्यागदास्तूनां कारे ।

सत्यादीनां कारशब्दे परे मोऽन्तो भवति । सत्यंकरोतीति सत्यङ्कारः, एवमगदङ्कारः, अस्तुङ्कारः । उपोच्चारिपदानामपि कारे घञन्तेऽपीच्छन्ति,—सत्यस्य कारः —सत्यङ्कारः । एवमन्यत्रापि मकारवर्णागमो दृश्यते—लोकम्प्रीणः, भ्राष्टमिन्धः, अग्निमिन्धः, भद्रङ्करणम्, उष्णङ्करणम्, मध्यन्दिनं, श्येनम्पाता, क्रीड़ा ।

२४. गिलेऽगिलस्य ।

गिलादन्यस्य गिलशब्दे परे मोऽन्तो भवति । गिलतेः क-प्रत्ययः । तिमेर्गिलः—तिमिङ्गिल । एवं रिपुङ्गिल- । अगिलस्येति किम् ? गिलगिलः । "तिमिङ्गिलगिलोऽप्यास्ति तद्गिलोऽप्यस्ति राघवः ।

२५. उपसर्गादसुदुर्भ्यां लभेः प्राग्भात् खलघञोः ।

उपसर्गात् परस्य लभेर्भात् प्राङ् मकारागमो भवति खलघञोः परतः, न तु सुदुर्भ्याम् । ईषत्प्रलम्भः, सुप्रलम्भः, दुष्प्रलम्भः । घञि च—प्रलम्भः, विप्रलम्भः । उपसर्गादेवेति नियमात्—ईषल्लभः, लाभो वर्त्तते । असुदुर्भ्यामिति किं ? सुलभः, दुर्लभः । केवलाभ्यामेवेष्यते—तेनातिसुलम्भः, अतिदुर्लम्भः । कथमतिसुलभः अतिदुर्लभः ? पश्चादतिना समासः ।

२६. आङो यि ।

आङः परस्य लभेर्भात् प्राङ्मकारागमो भवति यकारादौ प्रत्यये परे । आलम्भ्या गौः ।

२७. उपात् प्रशंसायाम् ।

उपात् परस्य लभेर्भात् प्राङ्मकारागमो भवति ये परे प्रशंसायां गम्यमानायाम् । उपलम्भानि धनानि प्रशंसनीयानीत्यर्थः । प्रशंसायामिति किम् ? उपलभ्युं शवगम्—उपलभ्यं धनम् । कथमालभ्य, उपलभ्यते ? लभेर्यकार इति विशेषणात् ।

२८. वा कृति रात्रेः ।

कृदन्ते धातौ परे रात्रेर्मोऽन्तो भवति वा । रात्रिञ्चरः, रात्रिचरः, रात्रिमटः, रात्र्यटः;—पचादित्वादच् । रात्रिम्मन्य इति नित्यमुपपदाश्रयत्वात् ।

२९. पुरन्दर-वाचंयम-सर्वंसह-द्विषन्तपाश्च ।

एतेऽण् प्रत्ययान्ता निपात्यन्ते । पुरं दारयतीति पुरन्दरः शक्रः, वाचं यच्छतीति वाचंयमो व्रत एव, सर्वं सहते सर्वंसहः, द्विषं तापयतीति द्विषन्तप । यल्लक्षणेनानुत्पन्नं तत् सर्वं निपातनात् सिद्धम् । भगं दारयतीति भगन्दरो रोगो रूढित एव ।

३०. धातोस्तोऽन्तः पानुबन्धे ।

ह्रस्वारुषोर्मोऽन्त इत्यतो ह्रस्वानुवर्त्तते । ह्रस्वान्तस्य धातोः पानुबन्धे कृति परे तोऽन्तो भवति । अग्निचित्, सोमसुत्, प्रकृत्य, इत्वरः । धातोरिति किम् ? उपपदस्य मा भूत्—ग्रामणीः, सेनानिकुलम् । वृत्रहभ्यामिति असिद्धं बहिरङ्गमन्तरङ्गे इति । ह्रस्वान्तस्येति किम् ? आनीय, आपूय । कथमुपेत्य ? साधनायत्तत्वात् क्रियायाः प्रत्ययकार्यमेव । अन्तग्रहणं सुखार्थम् ।

३१. ओदौद्भ्यां कृद्यः स्वरवत् ।

ओदौद्भ्यां परः कृद्यः स्वरवद् भवति । लव्यम्, अवश्यलाव्यम् । ओदौद्भ्यामिति किम् ? चेयम् । कृद्य इति किम् ? उपोयते, औयत इह कृद्ग्रहणादन्यत्र सामान्यमवगम्यते ।

३२. जिक्ष्यो शक्ये ।

जिक्ष्योः शक्येऽर्थे विहितः कृद्यः स्वरवद् भवति । जेतुं शक्यं—जय्यं, क्षेतुं शक्यं—क्षय्यम् । शक्य इति किम् जेयं, क्षेयम् । [जिक्ष्योरिति किम् ? चेतुं शक्यः—चेयः] ।

३३. क्रीञस्यदर्थे ।

तस्यार्थो द्रव्य विनिमयः, क्रीञः परस्यदर्थे वर्त्तमानः कृद्यः स्वरवद् भवति । क्रय्या गौः । कश्चित् क्रेष्यतीति कृत्वा हट्टेऽवतारिता गौरित्यर्थः । तदर्थः इति किम् ? क्रेयं मे धान्यं—नास्ति क्रय्यं न प्रसारितमित्यर्थः ।

३४. वेर्लोपोऽपृक्तस्य ।

वेः कृत्संज्ञकस्यापृक्तस्य वर्णान्तरेणासंयुक्तस्य लोपो भवति । क्विप्—घृतं स्पृशतीति घृतस्पृक् । विन्—अर्द्धभाक् । विच्—कीलालपाः । कृत इति किम् ? उपेयिवांसमाचष्टे—उपेयिवयतीति क्विप्—उपेयिव्, उपेयिवौ । अपृक्तस्येति किम् ? क्विबादीनां विशेषकराननुबन्धानुत्सृज्य इकारोपलक्षितस्य वमात्रस्य लोपार्थं—तेनेह न स्यात्, जागृविः—कृ-गृजागृभ्यः क्विः ।

३५. य्वोर्व्यञ्जनेऽये ।

यकार-वकारयोः कृति व्यञ्जने परे यकारवर्जिते लोपो भवति । क्नूयी—क्नूतः, क्नूतवान्, दिदिवान्, सिषिवान्, व्यञ्जन इति किम् ? क्ष्मायिता, देविता । अय इति किम्? प्रक्नूय्य, प्रदीव्य । कथं कण्डूः, लोलूः ? वर्णाश्रयेऽपि प्रत्ययलोपलक्षणं क्वचित् । लब्ध्वा, लब्धुमित्योष्ठ्योऽयं वकारः ।

३६. निष्ठेटीनः ।

निष्ठायामिटि परे इनो लोपो भवति । हारितः, हारितवान्, लक्षितः, लक्षितवान् । इटीति किम् ? संज्ञपितः पशुः । इवन्तर्द्धेत्यादिना सनि वेट्—

वेटामेकस्वरस्मृत्या संज्ञपित इडस्ति ते ।
पाचिते प्रागिनो लोप एकस्वान्न चेट् पचेः ॥

३७. नाल्विष्ण्वाय्यान्तेत्नुषु ।

आलु, इष्णु, आय्य, अन्त, इत्नु एषु परत इनो लोपो न भवति । स्पृहयालुः, पारयिष्णुः, स्पृहयाय्यः—श्रि-दृ-क्षि-स्पृहि-गृहिभ्य आय्यः । गण्डयन्तः मण्डयन्तः—गण्डि-मण्डि-जि-नन्दिभ्यो झच् । स्तनयित्नुः—स्तनि-कृषि-घुषि-गदि-मदिभ्य इन इत्नुः ।

३८. लघुपूर्व्वोऽय् यपि ।

लघु पूर्व्वं इन् अय् भवति यपि परे । वचनादेकवर्णव्यवधानेऽपि । प्रशमय्य,

विगणय्य । लघुपूर्व्वं इति किं ? सम्प्रधार्य गतः । आपः परस्य वा वक्तव्यम्—प्रापय्य गतः, प्राप्य गतः । इङादेशस्य लाक्षणिकत्वादध्याप्य गतः ।

३९. मीनात्यादिदादीनामा ।

मीनाति-मिनोति-दीङां दा-मा-गायति-पिबति स्था-स्यति-जहातीनाञ्च यपि परे आकारो भवति । मीञ्—प्रमाय, डुमिञ्—निमाय, दीङ्—उपदाय । दामादीनामीत्वबाधनार्थमेव—प्रदाय, प्रधाय; अवसाय, ओहाक्—अवहाय ।

४०. क्षेर्दीर्घः ।

क्षेर्दीर्घो भवति यपि परे । प्रक्षीय, उपक्षीय, कथं प्रक्षिय्य गतः ? क्षिणु हिंसायामिति लाक्षणिकत्वात् ।

४१. निष्ठायाञ्च ।

क्षेर्दीर्घो भवति निष्ठायाञ्च । प्रक्षीणः [उपक्षीणः] प्रक्षीणवान् । प्रक्षीयतेऽस्मिन्निति प्रक्षीणमिदं छात्रस्य, दीर्घ इति संज्ञापूर्व्वकत्वादनित्यार्थं, तेन भावकर्म्मणोर्नस्यात्—प्रक्षितमनेन, प्रक्षितश्छात्रो भवता । तथा आक्रोश-दैन्ययोश्च वा—क्षितायुः, क्षीणायुः । दैन्ये च—क्षितकः, क्षीणकः; क्षितोऽयं तपस्वी— क्षीणोऽयं कर्त्रधिकरणयोरेवात्रापि ।

४२. स्फायः स्फीः ।

स्फायः स्फीरादेशो भवति निष्ठामात्रे । स्फीतः, स्फीतवान् । स्फायीतीदनुबन्धबलादादेशोऽयमनित्य इति—स्फातः, स्फातवान्, इहेट् प्रतिषिध्यते ।

४३. प्यायः पीः स्वाङ्गे ।

स्वमङ्गं स्वाङ्गं । स्वाङ्गे वर्त्तमानस्य प्यायतेर्निष्ठायां पीर्भवति । पीनं मुखं पीनवन्मुखम् । स्वाङ्ग इति किम् ? प्यानः स्वेदः, प्याना बुद्धिः, प्यानं मुखं बालायाः, प्यानः शोथः । कथं पीनो बाहुः रथ्यायां पतितः, पीनं मुखं प्रतिमायाः ? स्यादेव—

अद्रवं मर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टञ्च तेन चेत्तत्तथायुतम् ॥

पीनाङ्गयोगात् पीनो वटुरिति । कथं पीनः श्लेष्मा, पीनो वायुरिति ? उपमानात् । आपीनोऽन्धुः, आपीनमूधः, आङोऽन्धूधसोरेव ।

४४. शृतं पाके ।

श्रातेः श्रयतेश्च शृतमिति निपात्यते पाकेऽर्थे । क्षीरहविषोरेव निपातनस्येष्टविषयत्वात् । शृतं क्षीरं, शृतं हविः । अन्यहेतौ न स्यात्—क्षीरं श्रपितं देवदत्तेन यज्ञदत्तेनेति । क्षीरहविषोरेवेति किम् ? श्राणा यवागूः, श्रपिता यवागूः ।

४५. प्रस्त्यः संप्रसारणम् ।

प्रपूर्वस्यस्त्यायतेर्निष्ठायां सम्प्रसारणम्भवति। प्रस्तीतः, प्रस्तीतवान् । प्रेण स्त्या इति समासात्—प्रसंस्तीमः, प्रसंस्तीमवान्—अन्तरङ्गत्वात् कृते सम्प्रसारणे मत्वन्तु स्यादेव पक्षे ।

४६. द्रवघनस्पर्शयोः श्यः ।

द्रवघने स्पर्शे चार्थे श्यायतेर्निष्ठायां संप्रसारणं भवति । शीनं घृत, शीनवद् घृतम् । शीतो वायुः ।—द्रवीभूय, घनं कठिनमित्यर्थः। त्वगिन्द्रियग्राह्यो गुणविशेष स्पर्श इति । द्रवघनस्पर्शयोरिति किम् ? संश्यानो वृश्चिकः शीतेन सङ्कुचित इत्यर्थः ।

४७. प्रतेश्च ।

प्रतिपूर्व्वस्य श्यायतेर्निष्ठायां सम्प्रसारणम्भवति । प्रतिशीनः, प्रतिशीनवान् । प्रतिपूर्व्वोऽयं रोग एव वर्त्तते ।

४८. वाभ्यवाभ्याम् ।

अभ्यवाभ्यां परस्य श्यायतेर्निष्ठायां सम्प्रसारणम्भवति वा । अभिशीनः, अभिश्यानः, अवशीनः, अवश्यानः, अभिशीनवान्, अभिश्यावान्, अवशीनवान् अवश्यानवान् । उभयत्र विभाषेयम् ।

४६. न वेञ्ज्योर्यपि ।

वेञ्-ज्या इत्येतयोर्यपि परे सम्प्रसारणं न भवति । प्रवाय, प्रज्याय । एतौ यजादि-ग्रहादौ ।

५०. व्येञश्च ।

व्येञश्च यपि परे सम्प्रसारणं न भवति । प्रव्याय, उपव्याय । यजादिरियम् ।

५१. संपरिभ्यां वा ।

संपरिभ्यां परस्य व्येञः सम्प्रसारणं भवति वा यपि परे । संव्याय, संवीय, परिव्याय, परिवीय । समो न विभाषेत्येन्ये ।

५२. तद्दीर्घमन्त्यम् ।

तत्संप्रसारणं दीर्घमापद्यते अन्तश्चेत् । हूतः, संवीतः, प्रस्तीतः, मिवहूः, संवीय—इत्यन्तरङ्गत्वात्तकारागमं बाधते । अन्त्यग्रहणमाख्यातार्थञ्च । तद् ग्रहणम-भिन्न—बुद्धयर्थं, तेन सपरस्वरायाः संप्रसारणं सिद्धम् ।

५३. वः क्वौ ।

वेञः क्वौ एव संप्रसारणं दीर्घमापद्यते । ऊः, उवौ, उवः । क्वाविति किम् ? ऊतः ऊतवान् ।

५४. च्या-व्योः ।

छ्या-व्योः संप्रसारणं क्वौ परे दीर्घमापद्यते । धीः, आपीः । वचनात् सम्प्रसारणं सिद्धम् ।

५५. पञ्चमोपधाया धुटि चागुणे ।

पञ्चमान्तस्योपधाया दीर्घो भवति क्वौ धुट्यगुणे च । प्रशान्, प्रतान्, शान्तः, शान्तवान्, शान्तिः, शान्त्वा । धुटीति किम् ? अवमत्य । अगुण इति किम् ? गन्ता । दीर्घ इति संज्ञापूर्वकत्वात् कमेः प्रत्यये वा - क्रान्त्वा, क्रन्त्वा ।

५६. छ्वो शूटौ पञ्चमे च ।

छकारवकारयोः श ऊट् इत्येतौ भवतः यथासंख्यं क्वौ धुट्यगुणे पञ्चमे च । विच्छ—गोविट् । प्रच्छ्—पर्थप्राट् । दिव—अक्षद्यूः । पृष्टः, पृष्ट्वा । द्यूतः, द्यूत्वा, दुद्यूषति । विश्नः, प्रश्नः । सर्वधातुभ्यो मन्—स्योमा, अन्तरङ्गत्वाद्यत्वमेव । छस्य द्विपाठो नैमित्तिकस्याप्यभावो वा ।

५७. श्रिव्यवि—मवि—ज्वरि—त्वरामुपधया ।

एषामुपधया सह वकारस्योड् भवति क्वौ धुट्यगुणे पञ्चमे च । श्रिवु—श्रूः, श्रुवौ, श्रुवः । अव—ऊः, उवौ, उवः । मव—मूः मुवौ, मुवः । ज्वरः—जूः, जुरौ, जुरः । त्वर—तूः, तुरौ, तुरः । श्रूतः (श्रुतः) श्रूतवान् (श्रुतवान्) श्रूतः (श्रुतिः) ऊतिः, मूतिः, जूर्तिः, तूर्तिः । मन्—श्रोमा, अवतेरन्त्यस्वरादिलोपश्च - ओम् ।

५८. राल्लोप्यौ ।

रेफात् परौ चकार-वकारौ लोप्यौ भवतः क्वौ धुट्यगुणे पञ्चमे च । मूर्च्छा—मूः मुरौ, मुरः । धुर्वी—धूः, धुरौ, धुरः । धूर्तः, धूर्तिः, मूर्त्तः, मूर्तिः, निष्ठानत्वं नेष्यते । इहागुण पञ्चमानुवृत्तिर्न प्रयोजयति ।

५९. वनति-तनोत्यादि-प्रतिषिद्धेटां-धुटि पञ्चमोऽञ्छातः ।

वनतेस्तनोत्यादेः प्रतिषिद्धेटश्च पञ्चमो लोप्यो भवति धुट्यगुणे यथा सम्भव-मातश्चाद् भवति । वन—वतिः । तनोत्यादिम्मंनु बोधने पर्यन्तः । तनु—ततः, ततवान्, ततिः, तत्वा । । प्रतिषिद्धेटश्च—हतः, हतवान्, यतः, यतवान् । ऋणु-घृणु-तृणु-एषां न दीर्घः संज्ञा-पूर्वकत्वात्—ऋतं, घृतं, तृतमिति । पक्षे येषामिडस्ति—तेऽप्यनिट उच्यन्ते ।

६०. यपि च ।

वनतेस्तनोत्यादेः प्रतिषिद्धेटश्च यपि परे पञ्चमो लोप्यो भवति । वन—प्रवत्य, तनु—प्रतत्य, षणु—प्रसत्य, हन—प्रहत्य, मन्—प्रमत्य । एषामिति किम् ?

६१. वा मः ।

प्रतिषिद्धेटां वा मकारो लोप्यो भवति यपि परे । प्राप्ते विभाषा । प्रत्यय, प्रयम्य, प्रणत्य, प्रणम्य ।

६२. न तिकि दीर्घश्च ।

वनति—तनोत्यादेः प्रतिषिद्धेटां तिकि दीर्घो न भवति न च पञ्चमो लोप्यो भवति । वन्यात्, वन्तिः, तन्यात्—तन्तिः, यम्यात्—यन्तिः, वध्यात्—हन्तिः ।

६३. उन्देर्मनि ।

उन्देर्मनि पञ्चमो लोप्यो भवति । ओम, ओमनी ।

६४. घञीन्धे ।

इन्धेर्घञि पञ्चमो लोप्यो भवति । एधः ।

६५. स्यदो जवे ।

स्यन्देर्घञि स्यद इति दीर्घाभावो निपात्यते वेगेऽर्थे । स्यदः । अवोद हिमश्रथ-, प्रश्रथाश्च निपातयितव्याः । —अवपूर्वस्य उन्देः—अवोदः, हिमपूर्वस्य च श्रन्थे।— हिमश्रन्थः, प्रश्रथः ।

६६. रञ्जेर्भावकरणयोः ।

रञ्जेर्भाव—करणयोर्विहिते घञि पञ्चमो लोप्यो भवति । रञ्जनं रागः । रज्यतेऽनेनेति रागः । भावकरणयोरिति किं ? रजत्यस्मिन्निति—रङ्गः ।

६७. वुषघिणिनोश्च ।

रञ्जेर्वुषि घिणिनि च पञ्चमो लोप्यो भवति । शिल्पिनि वुष्—रजकः, रजकी; युजभजेत्यादिना घिणिन्—रागी । चकारोऽनुक्तसमुच्चयार्थः । तेन घुटि च— रजनं, रजनी ।

६८. बृंहेः स्वरेऽनिटि वा ।

बृंहेः स्वरादावनिटि पञ्चमो लोप्यो भवति वा । बर्हकः, बृंहकः, बर्हणं बृंहणं, बर्हति, बृंहति । अनिटीति किं ? बृंहितव्यम् । स्वर इति किं ? बृंहेर्मन् दृष्यते—परिबृंह्या, परिबृन्ढिः, स्त्रियां क्तिः । कथं बृह्लते, बृंह्यते, बर्हिता, बृंहिता ? येषां [मते] प्रकृत्यन्तरमस्ति, तेषां मते व्यञ्जनादाविट्यपि स्यात् ।

६९. यम—मन—तन—गमां क्वौ ।

एषां धातूनां पञ्चमो लोप्यो भवति आतश्चाद् भवति क्वौ परे । यम— संयत्, मन—सम्मत; तन्—परीतत्, ह्रस्वस्य दीर्घता । गमॢ -जगत् ।

हनेः सिच्यात्मने दृष्टः सूचनार्थे यमेरपि ।
विवाहे तु विभाषैव सिजा शिषोर्गमेस्तथा ॥

आहत, उदायत, उपायत, उपायंस्त कन्यां छात्रः, समगत, समगंस्त, सङ्गसीष्ट सङ्गंसीष्ट ।

७०. विड्-वनोरा ।

विटि वनि च प्रत्यये परे पञ्चमस्याकारो भवति । विट्—अजाः, गोषाः सनोते षत्वम् । वनि—विजावा; अग्रेगावा, ओणृ—अवावरी वनो रच । घुण्—घ्वावा—क्वनिप् । सानुनासिकमप्याकारमिच्छन्ति ।

७१. घुडि—खनि—सनि—जनाम् ।

एषां धुडादौ प्रत्यये पञ्चमस्याकारो भवति । खातः खातिः; सातः, सातिः; जातः, जातिः; सनि च सिषासति ।

७२. येवा ।

एषां पञ्चमस्याकारो भवति वा ये परे । प्रखाय, प्रखन्य, प्रसाय, प्रसत्य, प्रजाय, प्रजन्य । एवं खायते, खन्यते, चाखायते, चंखन्यते । जा जनेर्विकरणे नित्यं जायते । व्यवस्थितविभाषया ध्यणि ये न स्यात्—सान्यं, जन्यम् । अगुणं स्मरन्त्येके । तनोतेर्यणि वा वक्तव्यम्- तायते, तन्यते ।

७३. सनस्तिकि वा ।

सनोतेस्तिकि परे पञ्चमस्याकारो भवति वा । सनुतात्—सातिः, सन्तिः पुनर्वाविचनात् लोपश्च—सतिः ।

७४. स्फुरि स्फुल्योर्घञ्योतः ।

स्फुरि स्फुल्योर्घञि परे ओत आकारो भवति वा । विस्फारः, विस्फोरः, विस्फालः, विस्फोलः ।

७५. इज्जहातेः क्त्वि ।

वा न वर्त्तते । क्त्वा प्रत्यये परे जहातेरिद् भवति हित्वा, गतः । जहातेरिति किं ? हाङ्—हात्वा ।

७६. द्यति—स्यति—मास्थां त्यगुणे ।

एषां तकारादावगुणे इद् भवति । दो—दितः, दितवान्, दितिः, दित्वा । सो—अवसितः, अवसितिः । मा—मितः, मितवान्, मितिः, मित्वा । स्था—स्थितः, स्थितवान्, स्थिति स्थित्वा । अगुण इति किम् ? दाता, माता, माता, स्थाता । तिपा निर्देश किं ? धेट्—धीतः, धीतवान्, षणु— सातः, सातवान् ।

७७. वा छा-शोः ।

छा—शोस्तकारादावगुणे इट् भवति वा । अवच्छितः, अवच्छितिः, अवच्छातः, अवच्छातिः । निशितः निशितिः, निशातः निशातिः । श्यतेर्व्रते नित्यं व्यवस्थित—विभाषया—संशिता ब्राह्मणः, अन्यथा शिता सिद्ध एव ।

७८. दधातेर्हि ।

दधातेस्तकारादवगुणे हिर्भवति, हितः, हितवान्, हितिः, हित्वा । दधातेरिति किं ? —धेट्—धीतः, धीतवान् । वा न वर्त्तते धात्वन्तरबलात् ।

७९. चरफलोरुत्वस्य ।

चरफलोकारस्य तकारादावगुणे इद् भवति । चूर्त्तं, चूर्तिः । प्रफुलतत् प्रफुल्तिः ।

८०. ददातेरधः ।

दा संज्ञकस्य धेट् वर्जितस्य तकारादावगुणे दद् भवति । दत्तः, दत्तवान्, दत्त्वा । दासंज्ञकस्येति किम् ? अवदातः । अध इति किम् ? धेट्—धीतः, धीतवान्, दान्ते तस्य नत्वं, धान्ते षत्वं स्यात्; सन्निपातलक्षणस्य वर्णग्रहणं निमित्तत्वात् ।

८१. स्वरादुपसर्गात्तः ।

उपसर्गात् स्वरान्तात् परस्य धेट् वर्जितस्य दासंज्ञकस्य तकारो भवति तकारादावगुणे प्रत्यये परे । प्रत्तं, नीत्तं, परीत्तं,—दस्ति, क्वचिन्नामिनो ह्रस्वस्य दीर्घता । स्वरादिति किं ? निर्दत्तम्, दुर्दत्तम् । सस्वरोऽस्वरो वायमादेशो न कश्चिद्दोषाय इति । कथं निदत्तम्, अवदत्तम्, प्रदत्तमिति ? वादिकर्म्मणि प्रादिसमासो निपाता वा ।

८२. यपि चादो जग्धिः ।

तकारादावगुणे यपि च परेऽदो जग्धिर्भवति । जग्धः, जग्धवान्, जग्धिः, जग्ध्वा, प्रजग्ध्य, गतः । कथमन्नम् ? अदोऽनन्त इति ज्ञापकात् । अगुण इति किम् । अत्तव्यम्—

जग्धौ सिद्धेऽन्तरङ्गत्वाद्यपि चेति यदुच्यते ।
ज्ञापयत्यन्तरङ्गाणां यपा भवति बाधनम् ॥

इत्यन्ये, तेन—प्रणम्य आप्रच्छ्य, प्रदीव्य, पञ्चमोपः प्रभृतीनां दीर्घादयो न भवन्ति ।

८३. घञलोर्घस्लृः ।

अदेर्घञि अलि च प्रत्यये घस्लृर्भवति । लृकार उच्चारणार्थः । घासः, उपसर्गेऽदेरल्—विघसः । प्राप्तीति प्रथमः,—अचि वक्तव्यम् ।

८४. क्त-क्तवतू निष्ठा ।

क्तक्तवतू प्रत्ययो निष्ठासंज्ञौ भवत: । शब्दस्य नित्यत्वादन्वाख्याने भाविनोर्नेतरेतराश्रयदोष इति । शीर्ण:, शीर्णवान् । भिन्न:, भिन्नवान् । निष्ठाप्रदेशा— निष्ठेत्यवमादय: । क्त्वा मकारान्तश्च कृत स्वभावादसत्त्वयत्वव्ययमेव ।

इति दौर्गसिंह्यां वृत्तौ कृत्सु प्रथम: समाप्त: ।

द्वितीयः पादः

८५. **धातोः** ।

धातोरिति पञ्चम्यन्तमनुकृतम् । अविशेषे धातोरित्यमधिकारो वेदितव्यः । कर्त्तव्यं, करणीयम् । धातोरिति किं ? कुम्भता, कुम्भं करोतीति भावकर्म्मणोर्नं तव्यादयः, युष्मदि मध्यम इति सप्रयुक्तं नोपपदं, उत्सर्गः सिच सन् विषये न स्यात् । अथ धातोस्थोऽन्तः पानुबन्ध इत्यतो धातोरित्यनुवर्त्तते, तर्हि दुवृष्यतीत्यूङ् न सिध्यति ।

८६. **सप्तम्युक्तमुपपदम्** ।

धात्वाधिकारेऽत्र सूत्रे सप्तम्या निर्दिष्टमुपपदसंज्ञम्भवति । कर्म्मण्यण्, नाम्नि स्थश्चेत्येवमादयः । उक्तमिति किं ? सप्तम्यन्तमात्रे माभूत्—स्तम्बेरमः, कुरुचरः ।

८७. **तत्प्राङ् नाम चेत्** ।

तदुपपदं नाम चेद्धातो, प्राग्भवति । कुम्भकारः, ग्रामस्थः । नामेति किं ? भोक्तुमिच्छति ।

८८. **तस्य तेन समासः** ।

तस्य नामोपपदस्य तेन कृदन्तेन धातुना सह समासो भवति । गोदः, जलजम् क्रोधजम् । यथा हि प्रादयः क्रियाद्योतका उपसर्गा इति धातोः प्रागेव सिद्धास्तथोर्या-दयोऽपि क्रियायोगे कृभ्वस्तिभ्य एव प्राक्सिद्धाः । प्रकृत्य, ऊरीकृत्य, उररीकृत्य, तथा शुक्लीकृत्य, पटपटाकृत्य, नाम्नां युक्तार्थत्वात् समासोऽपि सिद्ध एव । यथाभिधानमेते त्रयोऽपि योगा वक्ष्यमाणाभ्यां सह प्रपञ्चार्था एव, धातोरित्ययमपि वासरूपे कृत्सम्बन्धादिति ।

८९. **नाव्ययेनानमा** ।

तस्य नामोपपदस्याव्ययकृदन्तेनामन्तवर्ज्जितेन प्राग्भावसमासो न भवतः । कृत्वा अलम्, अलंकृत्वा, भोक्तुं कालः, कालो भोक्तुम्, तस्येति किं ? प्रकृत्य । अननेति किं ? निमूलकाषं कषति ।

९०. **तृतीयादीनां वा** ।

तृतीयायामुपदंशेरित्यारभ्य यान्युपपदानि तानि तृतीयादीनि, तेषाम-मन्तेनापि प्राग्भावे समासो भवति वा । मूलकेनोपदंशं भुङ्क्ते—मूलकोपदंशं भुङ्क्ते,

भ्राष्ट्रादपकर्षं-भ्राष्ट्रापकर्षं, घातो भक्षयति, तृतीयादीनमिति किं ? समर्थो भोक्तुम् ।

६१. कृत् ।

अधिकारोऽयं साध्यैरेव सम्बध्यते, प्रथमान्तत्वात् । तेन वक्ष्यमाणाः प्रत्ययाः कृत्संज्ञकावेदितव्याः । कर्त्तरि कृतः—पाचकः, पक्ता । एवमन्येऽपि ।

६२. वाऽसरूपोऽस्त्रियाम् ।

न विद्यते समानं रूपं यस्येति विग्रहः । स्त्र्यधिकारविहितं [प्रत्ययं] वर्ज्जयित्वा असरूपः कृत्प्रत्ययो वा बाधको भवति ।

"विकल्पितेऽपवादेऽपि बाधनं तदवस्थितम् ।
उत्सर्गे न च लाभस्तबाधकत्वं विकल्प्यते ॥"

स्वरादयोऽपवादस्तद्विषये तव्यानीयौ—चेयं, चेतव्यं, चयनीयम् । एवं नन्दादेर्युः—नन्दनः, नन्दकः, नन्दयिता । एवमन्योऽपि । असरूप इति किं ? घ्यणि यो न स्यात्—कार्य्यं करिष्येऽण् न स्यात्—गोदः,—अनुबन्धाऽप्रयोगीति सारूप्यमेव । अस्त्रियामिति किं ? चिकीर्षा,—क्तिनं स्यात् । तथा—ईशना, श्रन्थना,—युरेव । वाशब्दो व्यवास्थावचीति-क्त-युट्-तुम्-खलर्थेषु वासरूपविधिर्नास्तीति ।

६३. तव्यानीयौ ।

धातो परो तव्यानीयौ कृत्संज्ञको भवतः । कर्त्तव्यं, करणीयम् । कृत्यत्वा-द्भावेऽपि कर्म्मणि च स्यात् । केलिम, कर्मकर्त्तरीष्यते, भिदेलिमा माषाः, पचेलिमा-स्तण्डुलाः । वास्तव्य इति वसेः कर्त्तरि तव्यो दीर्घश्च णिद्वात् ।

६४. स्वराद् यः ।

स्वरान्ताद्धातोर्यो भवति । चेयं, भव्यम् स्वरादिति सुखार्थमेव ।

६५. शकि-सहि-पवर्गान्ताच्च ।

शकि-सहि-पवर्गान्ताच्च धातोर्यो भवति । शक्यं, सह्यं, जप्यं, लभ्यम् ।

६६. आत्खनोरिच्च ।

आकारान्ताद्धातोः खनेश्च यो भवति—अनयोरन्तस्य चेकारो भवति । देयं, घेयं, खेयम् । अत एत्वेऽसिद्धं बहिरङ्गमन्तरङ्ग इत्यनित्येऽयम् ।

६७. यमि-मदि-गदान्त्वनुपसर्गे ।

एषामुपसर्गाभावे (तु) यो भवति । यम्यं, मद्यं, गद्यं । अनुपसर्ग इति किम् ? प्रयाम्यम्, प्रमाद्यं । यमो नियमार्थं वचनम् ।

९८. **चरेराङि चागुरौ।**

अनुपसर्गे चरेर्यो भवति आङि चागुरावर्थे। चर्य्यम्, आचार्यो (आचर्यो) देशः आङीति किम् ? अभिचार्यम्। अगुराविति किम् ? आचार्यो गुरुः।

९९. **पण्यावद्यवर्या विक्रेयगर्ह्य निरोधेषु।**

पण्यमिति निपात्यते विक्रेयेऽर्थे। पण्यं विक्रेय द्रव्यं, पाण्यमन्यत्। नञ्-पूर्वस्य वदेरवद्यमिति निपात्यते गार्ह्येऽर्थे। अवद्यम्। अनूद्यमन्यत् नाम्निवदः क्यप् च। वृङो वर्या इत्यनिरोधे गम्यमाने। वर्या। वृत्या, अन्या। स्त्रीलिङ्गनिर्देशादिति मतं, वार्य्यं ऋत्विजः।

१००. **वह्यं करणे।**

वह्यमिति निपात्यते करणेऽर्थे, वह्यं शकटं। वाह्यम् अन्यत्।

१०१. **अर्य्यं-स्वामि-वैश्ययोः।**

अर्य्यं इति निपात्यते स्वामिनि वैश्ये चार्थे। अर्य्यः स्वामि, अर्य्यो वैश्यः। आर्योऽन्यः।

१०२. **उपसर्या काल्या प्रजने।**

प्राप्तः कालो यस्या सा काल्या इति संज्ञिता। प्रजननं प्रजनो गर्भग्रहणम्, प्रजने प्राप्त काला चेत् उपसर्येति निपात्यते। उपस्रियत इत्युपसर्या गौः--ऋतुमतीत्यर्थः। उपसार्या अन्या।

१०३. **अजर्यं सङ्गते च।**

अजर्यमिति निपात्यते सङ्गते कर्त्तरि। न जीर्यतीत्यजर्यं सङ्गतमित्यर्थः। सङ्गत इति किम् ? अजरिता कम्बलः।

१०४. नाम्नि **वदः क्यप् च।**

नाम्न्युपपदे वदेः क्यप् भवति चकाराद घञ्च। ब्रह्मणो वदनं—**ब्रह्मोद्यम्, ब्रह्मवद्यम्।** **ब्रह्मणा उद्यते** कथा—**ब्रह्मोद्या,** ब्रह्मवद्या। नाम्नीति किम् ? **वाद्यम्, अनुवाद्यम्।**

१०५. **भावे भुवः।**

नाम्न्युपपदे भुवे भावे क्यप् भवति। ब्रह्मभूयं गतः—ब्रह्मत्वं गत इत्यर्थः। नाम्नीति किम् ? भव्यं, प्रभव्यम्। भावग्रहणमुत्तरार्थमिह सुखार्थञ्च।

१०६. **हनस्त च।**

नाम्न्युपपदे हन्तेर्भावे क्यप् भवति तकारश्चान्तादेशः। ब्रह्मणो हननं ब्रह्महत्या। भाव इति किं ? श्वघात्यो मृगः। नाम्नीति किं ? घातः, उपघातः, हन्तेर्भावेघ्यण् न दृश्यते। यपि सति तोऽन्तो नास्ति क्यपो द्व्यनुबन्धकत्वात्।

१०७. वृञ्-दृ-जुषीण-शासु-स्तु-गुहां-क्यप् ।

नाम्नि भावे चेति निवृत्तम् । एभ्यो क्यप् भवति । वृञ्-वृत्यः, वृङस्तु-वार्य्याः ऋत्विजः । दृङ्- आदृत्यः, जुषी—जुष्यः, इण्—इत्यः, इङ्स्तु—उपेयम्, शासोरुदनुबन्ध, सुखार्थः । शिष्यः, स्तुत्यः, गुह्यः, अवश्यस्तुत्य इति पुन क्यप् ग्रहणात् । "कथमनिवार्यो गर्जैरन्यैः स्वभाव इव देहिनाम्" इति ? सम्भवन्तेरन्यत्रापि ? वृञ् इनन्तोवा ।

१०८. ऋदुपधाच्चा क्लृपिचृतेः ।

ऋदुपधाद्धातोः क्लृपिचृति वर्ज्जितात् क्यप् भवति । वृत्यं, वृध्यम् । अक्लृपि-चृतेरिति किम् ? विकल्प्यं, विचर्त्यम्, ऋदिति तपरः सुखार्थः ।

१०९. भृञोऽसंज्ञायाम् ।

भृञोऽसंज्ञायां क्यप् भवति । भरणं—भृत्यं, भ्रियत इति वा भृत्यः । असंज्ञा-यामिति किं ? भार्या नाम क्षत्रिया, भार्या वधूः । ननु च संज्ञायामपि स्त्रियां क्यबस्ति, न तस्य भावेऽभिधानात् ।

११०. ग्रहोऽपि-प्रतिभ्यां वा ।

अपिप्रतिभ्यां परात् ग्रहेः क्यप् भवति वा । अपिग्रह्यम्, अपिग्राह्यम्, प्रतिग्रह्यम् प्रतिग्राह्यम् ।

१११. पदपक्ष्योश्च ।

पक्षे भवः पक्ष्यो वर्गः । पदपक्षयोरर्थयोर्ग्रहेः क्यप् भवति । प्रग्रह्यं पदं यत् स्वरेण न सन्धीयते । अवग्रह्यं पदं, यस्यावग्रहः क्रियते । पक्षे -अर्ज्जुनग्रह्या सेना । चकारादस्वैरिणि बाह्यायाञ्चार्थे ग्रह्यका इमे, अवरुद्धका इत्यर्थः । ग्रामग्रह्या स्त्री, ग्रामबाह्येत्यर्थः ।

११२. वौ-नीपूङ्भ्यां कल्कमुञ्जयोः ।

वावुपपदे नीपूङ्भ्यां कल्कमुञ्जयोरर्थयोर्यथासंख्यं क्यप् भवति । विनीयः कल्कः, विनेयमन्यत् । विपूयो मुञ्जः, विपव्यमन्यत् ।

११३. कृ-वृ-मृजां वा ।

कृञादिभ्यो विभाषया क्यप् भवति । कृत्यं, कार्य्यं, वृष्यं, वर्ष्यं, मृज्यं, मार्ग्यं । दुह्यं, दोह्यं, शस्यं, शंस्यं,—दुहिशासिभ्यां, क्यबपि कृत्ययुटोऽन्यत्रापीति वचनात् । तथा मृषोद्यमिति क्यव । तथा पाणिसमवाभ्यां सृजो घ्यणेव पाणिसर्ग्या, समवयसर्ग्या रज्जुः । तथा समो वा भृञः क्यप्-संभृत्य, संभार्य्यः । तथा तकि-चति-पति-शसि-यजिभ्यो य एव—तक्यं, चत्यं, पत्यं, शस्यं, यज्यं । तथा गुहो घ्यणपि—गुह्यं, गोह्यं । तथा जयतेर्हलौ क्यबेव,—जित्या हलिः, महद्धलं हलिरुच्यते ।

११४. सर्य-रुच्याव्यथ्याः कर्त्तरि ।

एते निपात्यन्ते कर्त्तरि षू प्रेरणे—सुवति लोकान्। सरति वा—सूर्य्यः। रोचत इति रुच्यः। न व्यथत इति—अव्यथ्यः।

११५. भिद्ययोद्धयौ नदे ।

एतौ नदे कर्त्तरि निपात्येते। भिनत्ति कूलानीति-भिद्यो नदः। उज्झत्युदकमिति उद्धयो नदः। कथं भेद्यो नदः, उज्झ्यो नद इति कर्म विवक्षायाम्।

११६. पुष्य सिध्यौ नक्षत्रे ।

एतौ निपात्येते नक्षत्रे कर्त्तरि, अधिकरणे वा। पुष्णाति कार्य्याणि, पुष्यत्यस्मिन्निति वा—पुष्यः। साधयति कार्य्याणि, सिध्यन्त्यस्मिन्निति वा—सिध्यः पुष्य एव।

११७. युग्यं पत्रे ।

युग्यमिति निपात्यते पत्रे वाहनेऽर्थे। युज्यतेऽनेनेति युज्यत इति वा—युग्यं पत्रम्।

११८. कृष्टपच्य-कुप्ये संज्ञायाम् ।

एते निपात्येते संज्ञायाम्। कृष्टे पच्यन्ते स्वयमेव—कृष्टपच्याः व्रीहयः, कुप्यत इति कुप्यं, सुवर्णरजताभ्यामन्यदुच्यते।

११६. ऋवर्ण-व्यञ्जनान्ताद् घ्यण् ।

ऋवर्णान्ताद्व्यञ्जनान्ताच्च धातोर्घ्यण् भवति। कृ-कार्यं, शॄ-शार्यम्, वाक्यं, पाक्यं। णकार इज्वद्भावार्थः। घकार सामान्याभिघातार्थः।

१२०. आसु-यु-वापि-रपि-लपि त्रपि-दभि-चमाञ्च ।

आङ् पूर्वात् सुनातेर्यौत्यादिभ्यश्च घ्यण् भवति। आसाव्यं, याव्यं, वाप्यं, राप्यं, लाप्यं, अपत्राप्यं, दम्भूरिह कृतनलोपः—अवदाभ्यम्, आचाम्यम्।

१२१. उवर्णादावश्यके ।

अवश्यं भावः आवश्यकम्। उवर्णान्ताताद्धातोरवश्यम्भावे गम्यमाने घ्यण् भवति। नाव्यं, लाव्यं, लाव्यमवश्यम्, अवश्यलाव्यम्,—अवश्यमः कृत्ये मस्य लुक्। लव्यमन्यत्।

१२२. पाधाम्मीन-सामिधेन्योः ।

पा-धा इत्येततोर्म्मान-सामिधेन्योरर्थयोर्यथासङ्ख्य घ्यण् भवति। पाय्यं, मानं, वचनात् स्वार्थं त्यजति, पेयमन्यत्। दधात्यग्निमिति धाय्या सामिधेनी, समिधादानमंत्र इति उपचारात् ऋत्विग्विशेषेऽपि वर्त्तते—धाय्याः शंसन्ति, धेयमन्यत्।

१२३. **प्राङोर्नियोऽसम्मतानित्ययोः स्वरवत् ।**

प्राङोरुपपदयोर्नियो धातोरसम्मतानित्यनोरर्थयोर्यथासंख्यं घ्यण् भवति स च स्वरवत् । प्रणाय्यश्चोरः असम्मत इत्यर्थः, आनाय्यो दक्षिणाग्निः—यो गार्हपत्यादानीय प्रणीयते, स चानित्यो रूढितः सिद्धः । कथं ज्येष्ठाय पुत्राय पिता ब्रह्म ब्रूयात् प्रणाय्य चान्तेवासिन इति ? अन्यत्रापीति वचनात् ।

१२४. **सञ्चिय-कुण्डपः क्रतौ ।**

सम्पूर्वात् चिनोते, कुम्भपूर्वाच्च पिबते क्रतावभिधेये घ्यण् भवति, स च स्वरवत् । सञ्चीयतेऽसौ सञ्चायः क्रतुः, कुम्भं पीयतेऽसौ इति कुम्भपाय्यः क्रतुः—ससोमको हि यागः क्रतुरर्थात् सोम पीयतेऽस्मिन्निति अभिधानादधिकरणे वा ।

१२५. **राजसूयश्च ।**

क्रतावभिधेये राजसूयश्च निपात्यते । षुञ् अभिषवे, राज्ञा सोतव्यो राजा वा सूयतेऽस्मिन्निति— राजसूयः क्रतुः ।

१२६. **सान्नाय्य-निकाय्यौ हविर्निवासयोः ।**

एतौ निपात्येते हविर्निवासयोरर्थयोर्यथासंख्यम् । सान्नाय्यं हविः, विशिष्टमेव यत्, सन्नेयमन्यत् । निकाय्यो निवासः, निचेयमन्यत् ।

१२७. **परिचाय्योपचाय्यावग्नौ ।**

एतावग्नावर्थे निपात्येते । परिचीयतेऽसौ परिचाय्योऽग्निः । उपचीयतेऽसाविति उपचाय्योऽग्निः ।

१२८. **चित्याग्निचित्ये च ।**

एतावग्नावर्थे निपात्येते । चीयत इति चित्योऽग्निः, अग्नेश्चयनम्—अग्निचित्या भावे । समूह्य इति ऊहिना सिद्धम्, अस्यापि क्वचिद्वहत्यर्थे प्रयोगः । संवाह्य इति चाग्नौ भवत्येव ।

१२९. **अमावस्या वा ।**

अमेह सहार्थे अमापूर्व्वाद्वसतेर्घ्यणि कालाधिकरणे दीर्घाभावो निपात्यते वा । सह वसतोऽस्यां चन्द्रार्कावित्यमावस्या, अमावास्या तिथिः । यल्लक्षणेनानुत्पन्नं तत्सर्व्वं निपातनात् सिद्धम् ।

१३०. **ते कृत्याः ।**

ते तव्यादयः कृत्संज्ञका वेदितव्याः । कृत्यप्रदेशाः—भावकर्म्मणोः कृत्य-क्त-खलर्था इत्येवमादयः ।

१३१. **वुण्-तृचौ ।**

धातोः परो वुण् तृचौ भवतः । कर्त्तरि कृतः । पाचकः, पक्ता, एवमन्येऽपि । कथं गले चुप्यत इति गले चोपकः, पादाभ्यां ह्रियत इति पादहरकः ? इत्यभिधानात् ।

१३२. **अच् पचादिभ्यश्च ।**

सर्वे धातवः पचादिषु नामगणेषु पठ्यन्ते । तेभ्यः पचादिभ्योऽच् भवति । पचः, पठः, भवः । पचादिग्रहणं बाधकबाधनार्थं, श्वपच, जारभर, इत्यण् न स्यात् । देवः, सर्पः, मेषः इति को न स्यात् । एवन्येऽप्यनुसर्त्तव्याः ।

१३३. **नन्द्यादेर्युः ।**

नन्द्यादेर्नामगणनिर्दिष्टाद् युर्भवति, नन्दि-वासि-मदि-दुषि-साधि-शोभि-वर्द्धिभ्य इनन्तेभ्योऽसंज्ञायाम् । नन्दयतीति नन्दनः, एवं वासनः, मदनः, दूषणः, साधनः, शोभनः, वर्द्धनः । सहि-तपि-दमः संज्ञायामनित्यत्वात्—सहनः, तपनः, एवं जल्पनः, दपणः, रमणः, चन्दनः, संकर्षणः, संहर्षणः, जनार्दनः, मधुसूदनः, पवनः । लक्षण इति नामगण निपातनाण्णत्वम् : विभीषणः, चित्तविनाशनः, कुलदमनः,—कर्म्मपूर्व्वाणामण् विषयेऽपि स्यात् ।

१३४. **ग्रहादेर्णिन् ।**

ग्रहादेर्नामगण निर्दिष्टाण्णिन् भवति । गृह्णातीति ग्राही, तिष्ठतीति-स्थायी, निरक्षी, विश्रावी, याचि-व्रज्-वद-वसतो नञ्-पूर्व्वात्—अयाची, अव्राजी, अवादी, अवासी, स्वरान्तादचित्तकर्त्तृकात्—अकारी धर्म्मस्य बालातपः । विषयी, देशे, विभावी, प्रभिभावी, भूतेऽर्थे-परिभावी, परिभवी, पक्षे ह्रस्वत्व निपातनात् : कथमुत्साही, संसर्गी, उद्वाही, सम्मर्दी, निवेशी ? अस्त्यर्थ इवा सिद्धम् । एवमध्याहारी, संव्याहारी, अपराधी, उपराधीति ।

१३५. **नाम्युपध-प्री कृ-गृ-ज्ञां-कः ।**

नाम्युपधात् प्रीणातेः किरतेर्गिरतेर्जानातेश्च को भवति । विक्षिणः, विलिखः, प्रियः, उत्किरः, गिरः, गिल, ज्ञः ।

१३६. **उपसर्गे त्वातो डः ।**

उपसर्ग उपपदे आकारान्ताद्धातोर्डो भवति । सुग्लः, सुम्लः, प्रह्वः,—ह्वे सति सम्प्रसारणमुव् च न स्यात् । गोसन्दाय इति—परत्वादण् । णस्यापवादोऽयम् ।

१३७. **धेट्-दृशि-पा-घ्रा-ध्मः शः ।**

उपसर्गे उपपदे एभ्यः शो भवति । उद्धयः उत्पश्यः, उत्पिबः, साहचर्यात्

पिबते घ्रेटष्टकार: सुखार्थ: । उज्जिघ्र:, उद्धूम: । कथं पश्य ? अन्यत्रापीति वचनात् । तथा व्याजिघ्रतीति—व्याघ्र: ।

१३८. साहि-साति-वेद्य-देजि-चेति-धारि-पारि-लिम्प-निन्दान्त्वनुपसर्गे ।

एषामुपसर्गाभावे शो भवति । साहयतीति—साहय: । एव सातय: । विदि सामान्यं—वेदय, । उदेजृ—उदेजय: । चेति --चेतय: । धृङ्—धृम् वा धारय: । पृ—पारय: । लिम्पतीति लिम्प: । निन्दतीति निन्द: । साहचर्यान्न विदि अवयवे । विन्दुरिति निपातनाद् वा । कथं निलिम्पा नाम देवा: ? अन्यत्रापीति वचनात् । तथा गां विन्दतीति—गोविन्द:, एव: अरविन्द:—इत्यण् न स्यात् । दद: दध इति दद-दधोरचा सिद्धम् ।

१३९. वा ज्वलादि-दु-नी-भुवो ण: ।

ज्वलादिभ्यो दुनोतेर्नयतेश्चानुपसर्गे णो भवति वा । ज्वल:, ज्वाल:, चल:, चाल: । कसपर्यन्ता ज्वलादयो गणे वृत्करणात् । दव:, दाव:, नय, नाय, (इति केचिन्नेच्छन्ति ।) भव:, भाव: । अनुपसर्ग इति किं ? प्रज्वल:, प्रदव:, प्रणय:, प्रभव: ।

१४०. समाङो: स्रुव: ।

समाङोरुपपदयो: स्रुवतेर्णो भवति । वा न स्मर्यते । संस्राव:, आस्राव: । समाङोरिति किं ? स्रव:, परिस्रव: ।

१४१. अवे ह्रसो: ।

अव उपपदे हरते स्यतेश्च णो भवति । अवहार:, अवसाय: । अव इति किं ? हर:, विहर ।

१४२. दिहि-लिहि-श्लिषि-श्वसि-व्यधत्यतीणस्यातान्च ।

एषां णो भवति । देह:, लेह:, श्लेष: । के प्राप्ते वचनम् । श्वास:, व्याध:, अत्याय । उपसर्गे डबाधानार्थं श्या-ग्रहणम्,—अवश्याव: । दाव:, धाय: । प्रत्यय इत्यपि दृश्यते । अवतार इति इति चकारात् ।

१४३. ग्रहोऽर्वा ।

ग्राहो जलचर:, ग्रह सूर्य्यादि: ।

१४४. गेहे त्वक् ।

ग्रहेर्गेहेऽभिधेये त्वग् भवति । गृह्णातीति गृहं, गृहा: ।

१४५. शिल्पिनि वुष् ।

शिल्पिन्यभिधेये वुष् प्रत्ययो भवति । अभिधानात् नृति—खनि—रञ्जिभ्य: एव । नर्त्तक:, नर्त्तकी, खनक:, खनकी, रजक:, रजकी । शिल्पं विज्ञानकौशलम्-इनन्तश्च निकृष्टेऽभिधानात् ।

१४६. गस्थक: ।

गायते: शिल्पिन्यभिधेये थक: प्रत्ययो भवति । गाथक: ।

१४७. ण्युट् च ।

गायते: शिल्पिन्यभिधेये ण्यूट् प्रत्ययो भवति । गायन:, गायनी । एतौ प्रत्ययावशिल्पिन्यपि दृश्येते ।

१४८. हः काल-व्रीह्योः ।

जहाते: काले व्रीहौ चार्थे ण्युड्भवति । जहाति भावानिति—हायन:, संवत्सर: । जहाति उदकमिति हायना व्रीहय: । काल:—व्रीह्याविति किं ? हाता ।

१४९. आशिष्यक: ।

आशंसायां गम्यमानायां धातोरक: प्रत्ययो भवति । जीवतात्, जीवक:, नन्दतात्—नन्दक: ।

१५०. प्रु-सृ-सृ-ल्वां साधुकारिणि ।

एषां साधुकारिण्यभिधेयेऽक: प्रत्ययो भवति । साधु प्रवते—साधुप्रवक: एवं सवक:, सरक:, लवक: । साधुकरणं शिल्पमेव, एतत् स्त्रियामाप्रपञ्चार्थम् । साधुकारिणीति किं ? प्राता ।

इति दौर्गसिंह्यां वृत्तौ कृत्सु द्वितीयपाद: समाप्त: ।

तृतीयः पादः

१५१. **कर्म्मण्यण्** ।

कर्मसंज्ञोपपदे धातोरण् भवति । कुम्भं करोतीति—कुम्भकारः, एवं काण्डकारः, शरलावः, वेदाध्यायः, आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीत्यनभिधानाद्वाक्यमेव । महान्तं घटं करोतीति सापेक्षत्वात् । अघटं घटं करोतीति—घटीकारः इति च्व्यन्ते प्रागवस्थार्थमात्रापेक्षे त्वण् अभिधीयते ।

१५२. **ह्वा-वा-मश्च** ।

एभ्यः कर्म्मण्युपपदेऽण् भवति । कापवादः । स्वर्गह्वायः, तन्तुवायः, धान्यमायः । वातिरकर्म्मकः । मीनाति-मिनोत्योः, के बुद्धिस्थे सारूप्याभावः ।

१५३. **शीलि-कामि-भक्ष्याचरिभ्यो णः** ।

एभ्य कर्म्मण्युपपदे णो भवति । शीलि-भक्षी चुरादाविनन्तौ, कमेरिनङ् । मांसशीला, मांसकामा, मांसभक्षा । कल्याणमाचरति—कल्याणाचारा स्त्री । अणि हि स्त्रियामी स्यात् । शील्यत इति—शीलं, मासं शीलमस्याः—मांसशीला । कल्याणप्रतीक्षा, दुःखक्षमेति यथाभिधानादण् नास्ति, तथेहापि । यद्येवम् अम्भोऽभिगममस्याः—अम्भोऽभिगमेति स्यात् ? अम्भोऽभिगामी चेष्यते एव, समासेऽभिधानञ्चेत कष्टं स्यादिति वचनम् ।

१५४. **आतोऽनुपसर्गात् क** ।

कर्म्मण्युपपदे आकारान्ताद्धातोरनुपसर्गात् को भवति । गोदः, अङ्गुलित्रः । अनुपसर्गादिति किं ? गोसन्दायं—उपसर्गेरव्यवधानतैवेत्यण् । ब्रह्मज्ञः, मित्रह्वः, अन्यतोऽपि चेति डः ।

१५५. **नाम्नि स्थश्च** ।

नाम्न्युपपदे तिष्ठतेराकारान्ताच्च धातोः को भवति । अनुपसर्गादिति न वर्त्तते । कच्छेन पिबतीति कच्छपः, द्वाभ्यां पिबतीति द्विपः, समे तिष्ठतीति समस्थः, ग्रामे सन्तिष्ठत इति ग्रामसंस्थ ।

१५६. **तुन्दशोकयोः परिमृजापनुदोः** ।

तुन्दशोकयोः कर्म्मणोरुपपदयोः परिमृजापनुद्भ्यां यथासंख्यं को भवति । तुन्दं परिमार्ष्टि—तुन्दपरिमृजः, अलस एवाभिधीयते । तुन्दपरिमार्जोऽन्यः ।

शोकमपनुदति—शोकापनुदः आनन्दकर एव। अन्यत्र शोकापनोदो धर्मकथक एव।

१५७. प्रे दाज्ञः।

कर्म्मणि प्रे नोपपदे दाज्ञाभ्यां को भवति। प्रपाप्रदः। पथिप्रज्ञः। दारूपमिह गृह्यते, न संज्ञा ज्ञासाहचर्यात्, तेन—स्तनौ प्रधयतीति—स्तनप्रधाय।

१५८. समि ख्यः।

कर्म्मणि समि चोपपदे चक्षिङो धातोः को भवति। गां सञ्चष्टे—गोसंख्यः। सोपसर्गत्वाद्वचनम्। मूलानि विभुजतीति—मूलविभुजो रथः, नखमुचानि धनूंषि, अभिधानात् प्राक्तन एव कः। तथा काकेभ्यो गुहितव्याः—काकगुहास्तिलाः—कर्म्मण्यपि दृश्यते।

१५९. गष्टक्।

कर्म्मण्युपपदेऽनुपसर्गाद्गायतेष्टग् भवति। मधुरं गायतीति—मधुरगी एवं सामगी। अनुपसर्गादिति किं? सामसंगाय। षडनुबन्धो नदादि प्रपञ्चार्थः।

१६०. सुरासीध्वोः पिबते।

सुरा-सीध्वोः कर्म्मणोरुपपदयोरनुपसर्गात् पिबतेष्टग् भवति। सुरापी, सीधुपी। सुरासीध्वोरिति किं? क्षीरपा ब्राह्मणी। पिबतेरिति किं? सुरापा स्त्री। अनुपसर्गादिति किं? सुराप्रदायः।

१६१. हृञोऽच्वयोनुद्यमनयोः।

अनुपसर्गादिति न स्मर्यते। कर्म्मण्युपपदे हरतेर्वयसि गम्यमानेऽनुद्यमने चार्थे वर्त्तमानादज् भवति। ऊर्द्ध्वं गमनमुद्यमनं ततोऽन्यनुद्यमनम्। वयोग्रहणमुद्यमनार्थं मंप्राप्यमानञ्चात्र वयो गम्यते। कवचहरः क्षत्रिय कुमारः। अस्थिहरः श्वा। अंशहरः दायादः। वातहरं तैलम्। उद्यमने तु—भारहारः। अणोपवादोऽयम्।

१६२. आङि ताच्छील्ये।

कर्म्मण्युपपदे आङि ताच्छील्ये गम्यमाने हृञोऽज् भवति। फलनिरपेक्षा प्रवृत्तिस्ताच्छील्यम्। पुष्पाण्याहर्त्तुं शीलमस्य—पुष्पाहरो विद्याधरः। तच्छील्य इति किं? भाराहारः।

१६३. अर्हश्च।

ताच्छील्यमाङ् चेति न स्मर्यते। कर्म्मण्युपपदे अर्हतेरज् भवति। पूजार्हा स्त्री।

१६४. धृञः प्रहरण वादण्डसूत्रयोः ।

दण्ड-सूत्र वर्जिते प्रहरणवाचके कर्म्मण्युपपदे धृञोऽज् भवति । वज्रं धरतीति—वज्रधरः एव चक्रधरः । अदण्डसूत्रयोरिति किं ? दण्डधारः, सूत्रधारः । सूत्रप्रतिषेधादप्रहरणोऽपि—भूधरः, जटाधरः ।

१६५. धनुर्दण्ड-त्सरु-लाङ्गलाङ्कुशयष्टि तोमरेषु ग्रहेर्व्वा ।

एषु कर्म्मसूपपदेषु ग्रहेरञ् भवति वा । धनुर्गृह्णातीति—धनुर्ग्रहः, धनुर्ग्राहः, एवं दण्डग्रहः, दण्डग्राहः, त्सरुग्रहः, त्सरुग्राहः, लाङ्गलग्रहः, लाङ्गलग्राहः; अङ्कुशग्रहः अङ्कुशग्राहः, यष्टिग्रहः, यष्टिग्राहः, तोमरग्रहः, तोमरग्राहः । कथं घटग्रहः, घटीग्रहः, पचादित्वादच्; घटग्राहः घटीग्राहः इत्यणपि । तथा सूत्रग्रह इति धारणे; अन्यत्र—सूत्रग्राहः । पचादिप्रपञ्चार्थं प्रकरणमिदम् ।

१६६. स्तम्बकर्णयोरमिजपोः ।

स्तम्बकर्णयोरुपपदयो रमिजपिभ्यां यथा संख्यमज् भवति । स्तम्बे रमते—स्तम्बेरमः, हस्तेन । कर्णे जपतीति कर्णेजपः सूचक एवाभिधीयते । तथा सप्तम्याश्चालुक् ।

१६७. शम्पूर्बेभ्यः संज्ञायाम् ।

सम्पूर्वेभ्यः धातुभ्यः संज्ञायां गम्यमानायामज् भवति शंकरोतीति—शङ्करः, एवं शम्भवः, शंवदः, शम्बरः । शम्पूर्व्वो येभ्यो धातुभ्य इति बहुव्रीहिणा कृञो हेत्वादिष्वपि टो बाध्यते—तेन शङ्करा नाम परिव्राजिका ।

१६८. शीङोऽधिकरणे च ।

अधिकरणे च नाम्न्युपपदे शेतेरज् भवति । खे शेते—खशयः । चकारात् पार्श्वादौ करणे—पार्श्वेन शेते—पार्श्वशयः, एवं पृष्ठशयः, उदरशयः, दिग्धेन सह शेते—दिग्धसहशय इति समासद्वयम् । उत्तानादिषु कर्तृषु—उत्तानः शेते उत्तानशयः ।

१६९. चरेष्टः ।

अधिकरणे च नाम्न्युपपदे चदेष्टो भवति । कुरुषु चरतीति—कुरुचरः, कुरुचरी । चकारादन्यत्रापि—भिक्षया चरतीति—भिक्षाचरः, निशाचरी । सेनया चरतीति—सेनाचरः, सेनाचरी । आदाय चरतीति—आदायचरः, आदायचरी ।

१७०. पुरोऽग्रतोऽग्रेषु सर्त्तेः ।

एषूपपदेषु सर्त्तेष्टो भवति । पुरः सरतीति—पुरःसरः, पुरःसरी । अग्रतःसर, अग्रतःसरा—आद्यादित्वात्तस् । अग्रेसरः, अग्रेसरी—एकारान्तमव्ययं निपातनाद-लुग् वा ।

पूर्वे कर्त्तरि ।

पूर्वशब्दे कर्तृवाचिन्युपपदे सर्ष्टो भवति । पूर्वः सरतीति – पूर्वसरः, पूर्वसरी—कस्मात् पूर्वं इत्यविवक्षैव । कर्त्तरीति किं ? पूर्वं सरतीति—पूर्वसारः :

१७२. कृञो हेतु—ताच्छील्यानुलोम्येष्वशब्द - श्लोक-कलह-गाथा-वैर-सूत्र-मन्त्र-पदेषु ।

अशब्दादिषु कर्म्मसूपपदेषु हेतौ कर्त्तरि ताच्छील्ये आनुलोम्ये च गम्यमाने कृञाष्टो भवति । प्रतीतशक्तिकं कारणं हेतुरिहि गृह्यते कृञोऽनिनन्तत्वात् । हेतौ—विद्या यशस्करी, ताच्छील्ये—श्राद्धकरः, आनुलोम्यमनुकूलता—वचकरः । अशब्दादिष्विति किं ? शब्दकारः, श्लोककारः, कलहकारः, गाथाकारः, वैरकारः, चाटुकारः, सूत्रकारः, मन्त्रकारः, पदकारः, हेत्वानुलोम्योरविवक्षा स्थितैव, ताच्छील्य स्यादिति वर्ज्जनम् । कथं कुम्भाद्विकरणशीलाः—कुम्भकारादयः इति । अभिधानात् ।

१७३. तदाद्याद्य-तानन्तकार बहु-बाहृव-द्दिवा-विभा-निशा प्रभा-भास्चित्र-कर्त्तृ-नान्दी किं लिपि-लिबि-बलि-भक्ति-क्षेत्र-जङ्घा-धेनुररुसङ्ख्यासु च ।

अहेत्वाद्यर्थमिदम् । तदाद्यादिषु कर्म्मसूपपदेषु कृञाष्टो भवति । तच्छब्द-शब्दाच्छन्दसोऽयम् । तत् करोतीति तत्करः, तस्कर इति रुढित्वात्तस्य सकारः । एवं यत्कारः, आदिकः, अन्तकरः, अनन्तकरः, कारकरः, बहुकरः, बाहुकरः, अहस्करः, दिवाकरः. निशाकरः, प्रभाकरः, भास्करः, चित्रकारः, कर्त्तृकरः, नान्दीकरः, किङ्करः, लिपिकरः, लिबिकरः, बलिकरः भक्तिकरः, क्षेत्रकरः, जङ्घाकरः, धनुष्करः, अरुष्करः, एककरः, द्विकरः, त्रिकरः, चतुष्करः । कियत्तद्बहुषु स्त्र्यामादैव कर्त्तव्यः । चकारात—रजनीकरः, क्षपाकरः, क्षणदाकरः इत्यादयोऽप्यनुसर्त्तव्याः ।

१७४. भृतौ कर्म्मशब्दे ।

कर्म्मशब्दे कर्म्मण्युपपदे कृञाष्टो भवति भृतौ गम्यमानायाम् । भृतिः—कर्म्ममूल्यम् । कर्मकरो भृतकः, कर्मकरी दासी । भृताविति किं ? कर्म्मकारः । शब्दग्रहणं प्रत्ययार्थः कर्म्म इति स्यादिति ।

१७५. इः स्तम्ब-शकृतोः ।

स्तम्ब-शकृतो कर्मणोरुपपदयो कृञा इर्भवति । स्तम्बकरिर्व्रीहिरेव, स्तम्बकारोऽन्यः । शकृत्करिर्वत्सव, एवाभिधीयते, शकृत्कारोऽन्यः ।

१७६. हरते दृतिनाथयोः पशौ ।

दृतिनाथयो कर्म्मणोरुपपदयोर्हरते पशौ कर्त्तरि इर्भवति । दृतिहरिः पशुः, नाथहरिः पशुः ।

१७७. फले-मल-रजः सु ग्रहेः ।

एषु कर्म्मसूपपदेषु ग्रहेरिर्भवति । फलानि गृह्णातीति—फलेग्रहिः, सूत्र-निपातनादेत्वम् ; मलं गृह्णातीति—मलग्रहिः, रजो गृह्णातीति रजोग्रहिः ।

१७८. देव-वातयोरापेः ।

देववातयोः कर्म्मणोरुपपदयोराप्नोतेरिर्भवति । देवानाप्नोति—देवापि, वातानाप्नोतीति—वातापि, विशिष्ट एव रुढित्वात् ।

१७९. आत्मोदरकुक्षिषु भृञः खिः ।

एषु कर्म्मसूपपदेषु भृञः खिर्भवति । आत्मानमेव बिभर्त्तीति—आत्मम्भरिः, एवमुदरम्भरिः, कुक्षिम्भरिः ।

१८०. एजेः खश् ।

कर्म्मण्युपपदे एजयतेः खश् भवति । अङ्गमेजयः, जनमेजयः—खानुबन्धान्मोऽन्तः शानुबन्धे सार्व्वधातुकत्वाद् विकरणे इनो गुणः स्यात् ।

१८१. शुनी-स्तन-मुञ्ज-कूलास्य-पुष्पेषु धेटः ।

एषु कर्म्मसूपपदेषु धेटः खश् भवति । शुनीं धयतीतिशुनिन्धयः, स्तनो धयतीति-स्तनन्धयः । एवं मुञ्जन्धयः, कूलन्धयः आस्यन्धयः, पुष्पन्धयः, मुञ्जादिषु केचिन्नेच्छन्ति । प्रकृतावार्थत्वाद्धेष्टकारो नदाद्यर्थो विज्ञायते-शुनीन्धयी, स्तनन्धयी ।

१८२. नाड़ी-कर-मुष्टि-पाणि-नासिकासु ध्मश्च ।

एषु कर्म्मसूपपदेषु धमतेर्धेटश्च खश् भवति । नाडिन्धमः, नाडिन्धयः, करन्धमः, करन्धयः, मुष्टिन्धमः, मुष्टिन्धयः, पाणिन्धमः, पाणिन्धयः, नासिकन्धमः, नासिकन्धयः । शुनी-स्तन-घटी-खरी-वातेषु धमतेरित्येके-शुनिन्धमः, स्तनन्धमः, घटिन्धमः, खरिन्धमः, वातन्धमः ।

१८३. विध्वरुस्तिलेषु तुदः ।

एषु कर्म्मसूपपदेषु तुदतेः खश् भवति । विधुन्तुदः, अरुन्तुदः, तिलन्तुदः ।

१८४. असूर्य्योग्रयोर्दृशः ।

असूर्य्योग्रयोः कर्म्मणोरुपपदयोर्दृशः खश् भवति । न सूर्यम्पश्यन्तीति असूर्यम्पश्या राजदाराः—सूर्यमपि न पश्यन्तीत्यर्थः, दृशिना सह सम्बन्धस्य नञः सूर्येण सह समासो गमकत्वात्, उग्रम्पश्यः ।

१८५. ललाटे तपः ।

ललाटे कर्मण्युपपदे तपतेः खश् भवति । ललाटन्तपतीति ललाटन्तपः ।

१८६. मितनखप्रमितेषु पचः ।

एषु कर्म्मसूपपदेषु पचतेः खश् भवति । मितम्पचा ब्राह्मणी, नखम्पचा यवागूः,

प्रस्थम्पचा माणवकः, द्रोणम्पचा स्थाली। प्रस्थादय एव परिमाणाभ्यत्राभिधीयन्ते न कालः संख्या च, तेन-मासम्पचति, एकम्पचतीति वाक्यमेव।

१८७. कूल उद्रुजोद्वहोः।

कूले कर्म्मण्युपपदे उद्रुजाद्वहो खश् भवति। कूलमुद्रुजा नदी, कूलमुद्वहः समुद्रः।

१८८. वहंलिहाभ्रंलिह-परन्तपेरम्मदाश्च।

एते खश्प्रत्ययान्ता निपात्यते। वहंलिहा गौः, अभ्रंलिहो वायुः, परन्तापयतीति-परन्तपः [शत्रुः] इरया माद्यतीति-इरम्मदो हस्ती। चकारात्-वातमजन्तीति-वातमजा मृगाः, शर्द्धं जहातीति शर्द्धंजहा माषाः।

१८९. वदेः खः प्रिय-वशयोः।

प्रियवशयोः कर्म्मणोरुपपदयोर्व्वदेः खो भवति। प्रियंवदः, वशंवदः। उत्तरार्थमिह प्रक्रियालाघवार्थञ्च क्रियते।

१९०. सर्व-कूलाभ्र-करीषेषु कषः।

एषु कर्म्मसूपपदेषु रुषतेः खो भवति। सर्वङ्कषः खलः, कूलङ्कषा नदी, अभ्रङ्कषो गिरिः, करीषङ्कषा वात्या।

१९१. भयर्त्तिमेघेषु कृञः।

एषु कर्म्मसूपपदेषु कृञः खो भवति। भयङ्करः, अभयङ्करः-भयेन तदन्तविधिरिष्टः। ऋतिङ्करः, मेघङ्करः।

१९२. क्षेम-प्रिय-मद्रेष्वण् च।

एषु कर्म्मसूपपरेषु कृञः खो भवति अण् च। क्षेमङ्करः, क्षेमकारः, प्रियङ्करः, प्रियकारः, मद्रङ्करः, मद्रकारः। वेति सिद्धेऽण् ग्रहणं हेत्वादिष्वपि टो बाधनार्थम्। एष्विति किं? भद्रकारः।

१९३. भावकरणयोस्त्वाशिते भुवः।

आशिते शब्दोपपदे भावे करणे च भवते खो भवति। आशनमाशितम्, आशितस्य भवनम्-आशितम्भवम्, आशितम्भवत्यनया-आशितम्भवा पञ्चपूली।

१९४. नाम्नि-तृ-भृ-वृ-जि-धारि-तपि-दमि सहां संज्ञायाम्।

नाम्न्युपपदे एभ्यः संज्ञायां गम्यमानायां खो भवति। रथेन तरतीति रथन्तर नाम (साम)। विश्वं बिभर्त्तीति-विश्वम्भरा अवनिः। पतिं वृणीते-पतिंवरा कन्या। धनं जितवान्-धनञ्जयोऽर्जुनः। वसु धारयतीति-वसुन्धरा पृथ्वी,—अभिधानाद् ह्रस्वः। शत्रून्तपतीति शत्रुन्तपः। अरीन् दाम्यति दमयति वा-अरिन्दमः। सर्वं सहते-सर्वंसहा। नामकर्म च यथासम्भवं संज्ञात्वाद् गम्यते, नाम्नीति सुखार्थम्।

१९५. गमश्च ।

नाम्न्युपपदे गमश्च खो भवति संज्ञायां गम्यमानायाम् । सुतङ्गमः, ऋतङ्गमः । भुजाभ्यां गच्छतीति भुजङ्गम, मितं गच्छतीति-मितङ्गमो हस्ती, पूर्व्वङ्गमाः पन्थानः, हृदयङ्गमा वाचः ।

१९६. उरोविहायसोरुर-विहौ च ।

उरोविहायसोरुपपदयोर्गमश्च संज्ञाया खो भवति, तयोर्यथा संख्यमुरविहौ च भवतः । उरसा गच्छतीति उरङ्गमः । विहायसा गच्छतीति-विहङ्गमः ।

१९७. डोऽसंज्ञायामपि ।

नाम्न्युपपदे गमेर्डो भवति संज्ञायामसंज्ञायामपि उरो-विहायसा उर-विहौ च यथासंख्यं भवतः । भुजगः, तुरग, प्लवगः, पुरगः, पतगः, अन्तगः, अत्यन्तगः, ग्रामगः, अध्वगः, दूरगः, पारगः, सर्व्वगः, सर्व्वत्रगः, पन्नगः, गुरुतल्पः । मुगः, दुर्गः,—देश । नगः, अगः, तीरगः, पीठगः, जरगः, विहगः ।

१९८. विहङ्ग-तुरङ्ग-भुजङ्गाश्च ।

एते ड-प्रत्ययान्ता निपात्यन्ते संज्ञायामेव । विहायसा गच्छतीति-विहङ्गः तुरो गच्छतीति-तुरङ्गः, भुजाभ्यां गच्छतीति-भुजङ्गः । चकारात् पतो गच्छतीति पतङ्गः; प्लवेन गच्छतीति-प्लवङ्गः ।

१९९. अन्यतोऽपि च ।

गमेरन्यस्मादपि संज्ञायायामसंज्ञायामपि नाम्न्युपपदे डो भवति । वारि चरतीति-वार्चो हंसः, गिरौ शेते-गिरिशः, वरानाहन्ति-वराहः, परिखन्यते-परिखा, कर्मण्यपि दृश्यते ।

२००. हन्तेः कर्म्मण्याशीर्गत्योः ।

हन्तेः कर्म्मण्युपपदे आशिषि गतौ च वर्त्तमानाद् हन्तेर्डो भवति । शत्रुं वध्यात्-शत्रुहः, क्रोशं हन्ति-क्रोशहः कर्म्मण्येव निरपेक्षत्वात्—कर्म्मग्रहणं सुखार्थम् ।

२०१. अपात् क्लेश-तमसोः ।

क्लेशतमसोः कर्म्मणोरुपपदयोरपात् हन्तेर्डो भवति । क्लेशापहः, तमोपहः । कथं सुखावहः, दुःखावह, ज्वरावहः, वातपित्तकफावहः, विषाग्निदर्पापहः ? अन्यतोऽपि चेति सिद्धं, प्रपञ्चार्थं उविधानम् । कथं दार्वाघाटः, चार्व्वाघाटः । वर्णसंघाटः ? घटतेर्भविष्यति, चारु आहन्ति-चार्व्वाघाटः एवं वर्णसंघाटः—दार्व्वाघाटोऽपि तर्हि स्यात् ? असंज्ञायामिष्यत एव ।

२०२. कुमार-शीर्षयोर्णिन् ।

शिरः पर्यायः शीर्षशब्दः । कुमारशीर्षयोः कर्म्मणोरुपपदयोर्हन्तेर्णिन् भवति । कुमारघाती, शीर्षघाती ।

२०३. **टग्लक्षणे जाया-पत्योः ।**

लक्षणयोगाल्लक्षणम् । जायापत्योः कर्म्मणोरुपपदयोर्हन्तेर्लक्षणवति कर्त्तरि टग्भवति । जायाघ्नो ब्राह्मणः, पतिघ्नी वृषली ।

२०४. **अमनुष्यकर्त्तृकेऽपि च ।**

कर्म्मण्युपपदेऽमनुष्यकर्तृके धात्वर्थे वर्त्तमानाद्हन्तेष्टग् भवति । जायाघ्नस्तिलकः, पतिघ्नी पाणिरेखा, श्लेष्मघ्नं त्रिकटुकं, पित्तघ्नं घृतं, वातघ्नं तैलम् । अमनुष्यकर्तृक इति किम् ? आखुघातः शूद्रः, ब्राह्मणघातो वृषलः । कथं चौरघातो गजः, शस्यघातो वृषलः ? अपिशब्दात्कृतघ्नः खलः, शत्रुघ्नः शूरः इत्यापि भवति ।

२०५. **हस्ति-बाहु-कपा (वा) टेषु शक्तौ ।**

एषु कर्म्मसूपपदेषु शक्तौ गम्यमानायां हन्तेष्टग् भवति । हस्तिघ्नः, बाहुघ्नः इति मतं, कपाटघ्नः, नगरे त्वहस्तिन्यपि वचनात्-नगरघ्नोऽग्निः, नगरघातो हस्ती चेत् ।

२०६. **पाणिघ-ताड़घौ शिल्पिनि ।**

एतौ शिल्पिनि कर्त्तरि निपात्येते । पाणिभ्यां पाणौ वा हन्ति-पाणिघः, ताड़ं हन्ति-ताड़घः । शिल्पिनीति किं ? पाणिघातः, ताड़घातः । राजनं हन्ति-राजघ इत्यप्यधिकारात् ।

२०७. **नग्न-पलित-प्रियान्ध-स्थूल-सुभगाढ्येष्वभूततद्भावेषु कृञः ख्युट् करणे ।**

अभूततद्भावे वर्त्तमानेषु नग्नादिषूपपदेषु कृञः ख्युड्भवति करणे कारके । अनग्नो नग्नः क्रियतेऽनेनेति-नग्नङ्करणं द्यूतम्, एवं पलितङ्करणं तैलं, प्रियङ्करणं शीलम्' अन्धङ्करणं शोकः, स्थूलङ्करणं दधि, सुभगङ्करणं रूपम्, आढ्यङ्करणं वित्तम् । अनग्नङ्करणमित्यादि तदन्वविधिना । अभूततद्भाव इति किम् ? आढ्यङ्करोति तैलेनाभ्यञ्जयतीत्यर्थः - उत्पादार्थेऽप्यभूततद्भावस्याविवक्षितत्वात् । व्यक्तेर्विवक्षितत्वात् च्व्यन्तेषु न भवति । उत्तरत्राप्येवं-नग्नीकरोत्यनेनेति युडपि नैवाविशेषात् ।

२०८. **भुव खिष्णु-खुकञौ कर्त्तरि ।**

अभूततद्भावे वर्त्तमानेषु नग्नादिषूपपदेषु भुवः खिष्णुखुकञौ भवतः कर्त्तरि । नग्नम्भविष्णुः, नग्नम्भावुकः, पलितम्भविष्णु, पलितम्भावुकः, प्रियम्भावुकः, अन्धम्भविष्णुः, अन्धम्भावुकः; स्थूलम्भविष्णुः, स्थूलम्भावुकः, सुभगम्भविष्णुः, सुभगम्भावुकः, आढयम्भविष्णुः, आढ्ययम्भावुकः । अनग्नम्भविष्णुः, अनग्नम्भावुकः इत्यादि तदन्तविधिना । च्व्यन्तेषु न भवति-आढ्यीभविता । ताच्छीलिकत्वान्नास्त्यभूततद्भाव इति न परावपिष्णुष्णुनुकञौ इकारः सुखार्थः । तथा कर्त्तरीति ।

२०९. **भजो विण् ।**

कर्म्मण्युपपदे भजो विण् भवति । अर्द्धभाक्, पाद् भाक् । उपसर्गेऽपि केचित्-अर्धप्रभाक् ।

२१०. **सहश्छन्दसि ।**

नाम्न्युपपदे सहश्छन्दसि संज्ञायां विण् दृष्टः—स च लोके प्रयुज्यत इति वचनम् । तुराषाट् । "तुरासाहं पुरोधाये" ति ।

२११. **वहश्च ।**

नाम्न्युपपदे वहेश्छन्दसि संज्ञायां विण् दृष्टः । प्रष्ठवाट्, प्रष्ठौहः—वाहेर्वाशब्दस्योरिति । इदमपि पूर्ववत् ।

२१२. **अनसि डश्च ।**

अनस्युपपदें वहेर्विण दृष्ट, अनसश्च डो भवति । अनो वहतीति अनड्वान् । अनडुहीति रूढ़ित्वात् ।

२१३. **दुहः को घश्च ।**

कर्म्मण्युपपदे दुहः को भवति, घश्चान्तादेशः । ब्रह्मदुघा गौः । "गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः । दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति" ।

२१४. **विट्-क्रमि-गमि-खनि-सनि-जनाम् ।**

नाम्न्युपपदे एभ्यो विड्भवति ।

"अग्रेवा उदधिक्राश्च गोषाश्च बिशखास्तथा ।

श्रियन्दधतु राजेन्द्र तवाजा सहिता इमे ।"

छन्दसि संज्ञात्वेन विश्रुतो प्रयुज्यन्ते इति मतम् ।

२१५. **मन्त्रे श्वेत-वहूक्थशंस-पुरोडाशावयजिभ्यो विण् ।**

एभ्यो विण् भवति मन्त्रेऽर्थे । श्वेतैरुह्यते-श्वेतवा इन्द्रः, उक्थान्युक्थैर्व्वा शंसति उक्थशा यजमानः, पुरो दाशत्येनं-पुरोडाः-दस्य उत्व निपातनात्, पुरो दश्यत इति वा अकारान्तश्च निपात्यते—"सदा पुरोडाशपवित्रिताधरः" इति । अवयजते अवयाः । विरामे व्यञ्जनादौ चैषामन्तस्य डस्—श्वेतवोभ्याम् । उक्थशोभ्यां पुरोडोभ्यां । अदन्तपक्षे तु पुरोडाशाभ्याम् । स्वरादौ तु—श्वेतवाहौ, उक्थशंसौ, पुरोडाशौ, अवयाजौ । मन्त्रे रूढ़ित्वाद् यथा दर्शनं गम्यते । संज्ञात्वाल्लोके प्रयुज्यन्त इति मतम् ।

२१६. **आतो-मन्-क्वनिब्वनिब्विचः ।**

आकारान्ताद्धातोर्म्मन् वनिप् विच् इत्येते प्रत्यया भवन्ति । मन्-शोभनं ददातीति-सुदामा । अश्व इव तिष्ठति-अश्वत्थामा । क्वनिप्-सुधीवा, सुपीवा । वनिप्-भूरिदावा, घृतपावा । विच्-कीलालपाः ।

२१७. **अन्येभ्योऽपि दृश्यते ।**

अन्येभ्योऽपि धातुभ्य एते प्रत्यया दृश्यन्ते । मन्-सुशर्म्मा, क्वनिप्-प्रातरित्वा, वनिप्-विजावा, विच्-रिश्-अश हिंसायां-रेट्, रोट् । दृशिग्रहणं प्रयोगानुसारार्थम् ।

२१८. **क्विप् च ।**

धातोः क्विप् च दृश्यते उखायाः स्रंसते-उखास्रत्, पर्णानि ध्वंसते-पर्णध्वत्, दिव-अक्षद्यूः, क्रुङ्, प्रत्यङ्, ऊः, कीः, गीः, धूः, लूः।"

२१९. **वहे पञ्चम्यां भ्रंशेः ।**

वहे पञ्चम्यन्तोपपदे भ्रंशे क्विप् भवति। वहाद् भ्रश्यतीति-वहभ्रट् ।

२२०. स्पृशोऽनुदके ।

अनुदके नाम्न्युपपदेऽदः स्पृशः क्विब् भवति। (२२०)घृतं स्पृशतीति—घृतस्पृक्, मन्त्रेण स्पृशतीति मन्त्रस्क् । अनुदक इति किम् ? उदकं स्पृशत इति उदकस्पृशः ।

२२१. **अदोऽनन्ने ।**

अनन्ने नाम्न्युपपदेऽदः क्विब् भवति । शस्यमत्ति-शस्यात्, आममत्ति-आमात् । अनन्न इति किम् ? अनन्नादः । कणाद इत्यपि दृश्यते ।

२२२. **क्रव्ये च ।**

क्रव्ये चोपपदेऽदः क्विब् भवति । पुनर्व्वचनात् पक्वे-क्रव्यात्, अपक्वे त्वणेव-क्रव्यादाः राक्षसाः । चतुसूत्रीयं प्रपञ्चार्थेति ।

२२३. **ऋत्विगृदधृक्-स्रग्दिगुष्णिहश्च ।**

एते क्विबन्ता निपात्यन्ते । ऋतौ यजतीति-ऋत्विक् । रूढित एव धृषो द्विर्वचनं—दधृक्, सृजेर्ऋतः परोऽत, कर्म्मणे च क्विप्, सृजति तामिति-स्रक् । दिशः कर्म्मणि च क्विप्,-दिशति तामिति-दिक्, ऊर्द्ध स्निह्यति-उष्णिक्,—उदो लोपः, षत्वञ्च, गत्वन्तु दृगादित्वात् ।

२२४. **सत्सू-द्विष्-द्रुह-दुह-युज-विद-भिद-छिद-जि नी-राजामुपसर्गेऽपि ।**

एषामुपसर्गेऽनुपसर्गेऽपि नाम्न्युपपदे क्विब् भवति । उपसीदति-उपसत्, सत्, सभासत् । द्विषः साहचर्यात् सूरदादिः, प्रसूते-प्रसूः, सूः, अण्डसूः । विद्विट्, द्विट्, मित्रविट् । प्रध्रुक्, ध्रुक्, मित्रध्रुक् । अधुक्, धुक्, गोधुक् । अयुक्, युङ्, अश्वयुक् । संवित्, वित्, वेदवित् । लाभार्थान्न दृश्यते । प्रभित्, भित् काष्ठभित् । प्रच्छित्, छित्, रज्जुच्छित् । अभिजित्, जित्, अरिजित् । प्रणीः, नीः, सेनानीः । विराट्, राट्, गिरिराट् । प्रपञ्चार्थमिदम् ।

२२५. **कर्म्मण्युपमाने त्यदादौ दृशष्टक्सकौ च ।**

त्यदादावुपमाने उपपदे कमण्युपमेयेऽर्थे कर्म्मणि दृशष्टक्सकौ भवतः क्विप् च । स्य इव दृश्यते-त्यादृशः, त्यादृशी, त्यादृक्षः, त्यादृक् । स इव दृश्यते-तादृशः, तादृशी, तादृक्षः, तादृक् । एषु समानस्य स इति—सदृशः, सदृशी, सदृक्षः, सदृक् । आ सर्वनाम्नः इति वचनात्—अन्यादृश, अन्यादृशी, अन्यादृक्षः, अन्यादृक् ।

त्यदादाविति किं ? वृक्ष इव दृश्यते। उपमान इति किं ? स दृश्यते। कर्म्मणीति किं ? स इव पश्यति ।

२२६. **नाम्न्यजातौ णिनिस्ताच्छील्ये ।**

तच्छब्देन धात्वर्थो निर्दिश्यते। तदेव शीलमस्य कर्त्तुरिति विग्रहः। अजातिवाचके नाम्न्युपपदे धातोस्ताच्छील्ये गम्यमाने णिनिर्भवति। उष्णभोजी, धर्म्मविभाषी। नाम्नीति किम् ? उपभोक्ता, संभोक्ता, कथमुदासारी, प्रत्ययसारी, ब्रह्मवादी ? साधौच—साधुदरातीति—साधुदायी, साधु करोतीति साधुकारीति वक्तव्यमेव। अजाताविति किं ? ब्राह्मणानामामन्त्रयिता ?—

"आकृति ग्रहणा जाति लिङ्गानाञ्च न सर्वभाक्।
सकृताख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥
प्रागुत्पत्तिविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।
असर्वलिङ्गां बह्वर्थां तां नाति कवयो विदुः॥"

इत्यन्ये, तदाकुमारवादीति भवितव्यमेवाजातित्वात्।

२२७. **कर्त्तर्य्युपमाने ।**

उपमानेऽर्थे नाम्नि कर्त्तृवाचिन्युपपदे धातोर्णिनिर्भवति। जात्यर्थमताच्छील्याभीक्ष्ण्यार्थञ्च। उष्ट्र इव क्रोशति-उष्ट्रक्रोशी। ध्माङ्क्ष इव रौति-ध्माङ्क्षरावी। कर्त्तरीति किं ? शालीनिव कोद्रवान् भुङ्क्ते। उपमान इति किम् ? उष्ट्रः क्रोशति। उपपद-वाच्यः कर्त्ता णिन्यर्थस्य कर्त्तुरुपमानं न्याय्यं—उष्ट्रस्येव क्रोशनमस्येति वाक्यन्तरङ्ग-सम्बन्धेऽपि गौणत्वमिति।

२२८. **व्रताभीक्ष्ण्ययोश्च ।**

व्रतं शास्त्रविहितो नियमः। आभीक्ष्ण्यं पौनपुन्यं, आसेवा वा। नाम्न्युपदे धातो व्रताभीक्ष्ण्योर्गम्यमानयोर्णिनिर्भवति। अश्राद्धभोजी, अलवणभोजी। अर्थित्वात् प्रवृत्तौ नियमः सति भोजनेऽश्राद्धवमेव भुङ्क्ते, न श्राद्धमिति। आभीक्ष्ण्ये-क्षीरपायिण उशीनराः, सौवीर पायिणो बाह्लीकाः।—तत्रान्यत् पेयं नास्तीति, रुचिं विनाऽपि क्षीरे तात्पर्यमिति। शीलादन्यदाभीक्ष्ण्यम्।

२२९. **मनः पुंवच्चात्र ।**

कर्म्मण्युपपदे मन्यतेर्णिनिर्भवति, अस्मिश्च णिनि प्रत्ययान्ते धातावुपपदस्य पुंवच्चोपतिष्ठते यथा संभवम्। पटुम्मन्यते-पटुमानी, पट्वीम्मन्यते-पटुमानिनी पुंवच्चेति पुंवदादि-शास्त्रमत्राभिप्रेतं तेन-खट्वामानिनी, ब्रह्मबन्धूमानिनी, द्रोणीमानिनीति सिद्धम्।

२३०. **खश्चात्मने ।**

कर्म्मण्युपपदे आत्मार्थो यो मन्यतिस्तस्माण्णिनिर्भवति खश्च । विदुषीमात्मानं मन्यते-विद्वन्मानिनी, विदुषिम्मन्या:, विद्वांसमात्मानम्मन्यते-विद्वन्मानी, विद्वन्मन्य:, पट्वीमात्मानम्मन्यते-पटुमानिनी, पट्विम्मन्या, पटुमात्मानं मन्यते-पटुमानी, पटुम्मन्य: । तुल्याधिकरणत्वाण्णिनि पुंवद्भाव: । तादर्थ्यंमत्रार्थद्वारेण, आत्मशब्द: कर्म्मभूतो वाक्ये सुखार्थ: । कारकशक्ति-भेदाद्भेद इति, एक एव कर्त्ता कर्म्म च स्यात्, यथा पीयमानं मधु मदयति । बाह्योत्रात्मवचनात् ।

२३१. **करणेऽतीते यज: ।**

करणवाचिन्युपपदेऽतीते क्रियायां वर्त्तमानाद्यजतेर्णिनिर्भवति । अग्निष्टोमयाजी, वाजपेययाजी । अग्निष्टोमाख्यैर्यागै: स्वर्गाख्यं फलं भावितवानित्यर्थ:, स्वर्गशब्दस्तु वृत्तावन्तर्भूतो वाक्ये न प्रयुज्यते, यदि विशेषव्यापार: सामान्यव्यापारस्य करणं तत्कथमग्निहोत्रं जुहुयात् स्वर्गकाम: ? अपौरुषेयाणि वेदवाक्यानीति । अतीत इति किम् ? अग्निष्टोमेन यजति । करण इति किम् ? ग्रामे यजति स्म—अविवक्षित-करणत्वात् ।

२३२. **कर्म्मणि हन: कुत्सायाम् ।**

कर्म्मण्युपपदे अतीते वर्त्तमानादहन्ते: कुत्सायां गम्यमानायां णिनिर्भवति । पितृघाती, मातृघाती, कुत्सायामिति किं ? चौरं हतवान् । दण्डेन हतवान् पितृव्यमिति सापेक्षत्वात् । कर्मग्रहणं सुखार्थम् ।

२३३. **क्विप् ब्रह्म-भ्रूण वृत्रेषु ।**

ब्रह्मादिषु कर्म्मसूपपदेषु अतीते वर्त्तमानाद् हन्ते: क्विप् भवति । ब्रह्महा, भ्रूणहा, वृत्रहा । ब्रह्मादिष्वेव हन्तेरेव अतीत एव क्विबेवेति चतुर्विधोऽत्र नियम:, तेन गां हतवान्, ब्रह्माधीतवान् ब्रह्म हन्ति, ब्रह्म हतवान्—अतो नाण् । विनियमोऽपि दृश्यते-मधुहा, अहिहा, गोत्रहा, वृत्रघ्न: वृत्रस्य हन्तु:, ब्रह्मवित् ।

२३४. **कृञ: सु-पुण्य-पाप-कर्म्म-मन्त्र-पदेषु ।**

एषु कर्म्मसूपपदेषु अतीते वर्त्तमानात् कृञ: क्विप् भवति । सुष्ठु कृतवान् सुकृत्, एवं पुण्यकृत्, पापकृत्, कर्म्मकृत्, मन्त्रकृत्, पदकृत् । स्वादिषु कृञरेवातीते एव क्विवेति त्रिविध एवात्र नियम:, तेन मन्त्रानधीतवान्, कर्म्मकरोति, कर्म्मकृतवान्—अतो नाण् । शास्त्रकृत्, सूत्रकृदिति भवितव्यमेव ।

२३५. **सोमे सुञ: ।**

सोमे कर्म्मण्युपपदेऽतीते वर्त्तमानात् सुञ: क्विब् भवति । सोमं सुतवान्—सोमसुत् । चतुर्विधोऽत्र नियम: । तेन सुरां सुतवान्, सोमं विक्रीतवान्, सोमं सुनोति, सोमं सूतवान्-अतो नाण् । अन्येभ्य: क्विबभावेऽण् स्यादेव ।

२३६. **चेरग्नौ ।**

अग्नावुपपदेऽतीते वर्त्तमानाच्चिनोतेः क्विब् भवति । अग्निं चितवान्—अग्नि-चित् । चतुर्विधोऽत्रापि नियमः तेन पुष्पं चितवान् अग्निं हुतवान्, अग्निं चिनोति, अग्निं चितवान्—अतो नाग् । अन्यर्थे त्विष्टकानां रचनाविशेषे गम्यमाने कर्म्मण्यपि दृश्यते—श्येन इव चीयते स्म श्येनचित्, रथचक्रमिव चीयते स्म—रथचक्रचित् । इयमपि चतुःसूत्री प्रपञ्चार्थेति ।

२३७. **विक्रिय इन् कुत्सायाम् ।**

कर्म्मण्युपपदे विपूर्व्वादतीते क्रीणातेः कुत्सायां गम्यमानायाम् इन् भवति । सोमं विक्रीतवान्—सोमविक्रयी, तैलं विक्रीतवान् तैलविक्रयी; एवं मांसविक्रयी । अलन्तादस्त्यर्थे इना सिद्धे कुत्सायाम् अणवाधनार्थं वचनाभिदम् ।

२३८. **दृशेः क्वनिप् ।**

कर्म्मण्युपपदेऽतीते वर्तमानाद्दृशेः क्वनिप् भवति । मेरुं दृष्टवान्—मेरुदृश्वा । अतीते क्विबादीनां बाधनार्थमिदम् ।

२३९ **सहराज्ञोर्युधः ।**

सहराज्ञोः कर्म्मणोरूपपदयोरतीते वर्त्तमानाद् युध्यतेः क्वनिप् भवति । सह युध्यते स्म—सहयुध्वा, राजानं युध्यते स्म—राजयुध्वा, अन्तर्भूतेनर्थः सकर्म्मकः—राजानं योधितवानित्यर्थः ।

२४०. **कृञश्च ।**

सह राज्ञोः कर्म्मणोरूपदयोरतीते वर्त्तमानात् कृञः क्वनिप् भवति । सह करोति स्म—सहकृत्वा, एवं राजकृत्वा ।

२४१. **सप्तमी-पञ्चम्यन्ते जनेर्डः ।**

सप्तम्यन्ते पञ्चम्यन्ते चोपपदे अतीते वर्त्तमानाज्जनेर्डो भवति । जले जातं जलजं, सरसि जातं—सरसिजं, बुद्धिजः, क्रोधजं, संस्कारजः, ब्राह्मणजो धर्म्मः, क्षत्रियजं युद्धम् । कथमश्वाज्जातः, हस्तिना जात इति ? प्रायः पञ्चम्यामजातावेव दृश्यते :

२४२. **अन्यत्रापि च ।**

अन्यस्मिनुपपदेऽतीते वर्त्तमानात् जनेर्डो भवति । न जातोऽजः, द्विर्जातो द्विजः, प्रजः, प्रभिजः, परिजः, पुमासमनुजातः पुमनुजः, स्त्रियमनुजातः स्त्र्यनुजः ।

२४३. **निष्ठा ।**

अतीते वर्त्तमानाद्धातोर्निष्ठाप्रत्ययो भवति । कृतः, कृतवान् शयितः, शयितवान् ।

२४४. **ङ्वनिप्-सु-यजोः ।**

अतीते वर्त्तमानयोः सुयजोर्ङ्वनिब् भवति । सुतवान्-सुत्वा, इष्टवान्—यज्वा, यज्वानौ । ङकारोऽगुणार्थः ।

२४५. **जीर्यतेरन्तृन् ।**

अतीते वर्तमानात् जीर्यतेरन्तृन् भवति । जरन्, जरती । ऋकारो नकारश्चो च्चारणार्थः ।

इति दौर्गासिंह्यां वृत्तौ कृत्सु तृतीयः पादः समाप्तः

चतुर्थः पादः

२४३. **क्वन्सूकानौ परोक्षावच्च ।**

अतीते वर्त्तमानाद्धातोः क्वन्सू—कानौ भवतः, तौ च परोक्षे इव व्यपदिश्येते। पेचिवान्, पाचयाञ्चकृवान्, ररज्वान्, ओषाम्बभूवान्, शिशीर्व्वान्, दिदीर्व्वान्. जजागर्व्वान्, बभज्वान्, यणि—दृष्टत्वादेरेव जागर्त्तेर्गुणोऽनुषङ्गलोपश्च । व्यतिपेचानः, चक्राणः । अतीताधिकार किं ? श्रु-सद्-वसामतीतमात्रे क्वन्सुरभिधातव्यः । उपशुश्राव, उपाश्रौषीत्—उपसेदिवान् । अनुवास, अन्ववात्सीत्, अन्ववसत्—अनूषिवान् । तथा इगो नञ्पूर्वाच्चाश्नातेः । ईयिवान्, समीयिवान्, उपेयिवान्, अनाश्वान् । तथा अनुपूर्वाद्वचेः कानः कर्त्तर्येव—अनूचानः । अतीताभिधायिनोऽपि पूर्ववत् प्रयोक्तव्याः । शृणोत्यादय एवामी भाषायां रूढ़ाः ।

२४७ **वर्त्तमाने शन्तृङानशावप्रथमैकाधिकरणामन्त्रितयोः ।**

वर्त्तमानक्रियायां वर्त्तमानाद्धातोः शन्तृङानशौ भवतः प्रथमैकाधिकरणे आमन्त्रिते विषये च—प्रथमान्तेन चेत् शन्तृङानशोः सामानाधिकरण्यं न भवतीत्यर्थः । पचन्तं पचमानं छात्रं पश्य, पचता पचमानेन छात्रेण कृतमित्यादि । आमन्त्रिते विषये च—हे पचन्, हे पचमान । अप्रथमैकाधिकरणामन्त्रितयोरिति किं ? पचति छात्रः । नञा निर्दिष्टस्यानित्यत्वात्— जुहोति, जुह्वत् । यथा मायोगे त्वाक्रोशे । मा पचन्, मा पचमानः, आनश्च क्रियापेक्षायां—पचन्नास्ते, पचमानस्तिष्ठति । सत्तायां वा—सन् गुणः, अस्ति गुणः विद्यमानो ब्राह्मणः, विद्यते ब्राह्मणः ।

२४८. **लक्षण-हेत्वोः क्रियायाः ।**

अभूताद्वर्त्तमानाधिकारः । क्रियायां लक्षणे हेतौ चार्थे वर्त्तमानाद्धातोः शन्तृङानशौ भवतः । तिष्ठन्तोऽनुशासति गणकाः, शयाना भुञ्जते यवनाः । हेतौ च—अर्ज्जयन् वसति, अधीयानो वसति । लक्षणं चिह्नं, हेतुः लक्षणहेत्वोरिति किं ? पचति च, पठति च । क्रियायां इति किं ? य कम्पते सोऽश्वत्थः, यदुत्प्लवते तल्लघु ।

२४९. **वेत्तेः शन्तुर्वन्सुः ।**

वत्ते परस्य शन्तुर्वन्सुर्भवति वा । विद्वान्, विद्वान्सौ; विदन्, विदन्तौ । तिब् निर्देशः सुखार्थः—वेत्तेरेवानन्तरः शन्तृङिति ।

२५०. **आनोऽत्रात्मने।**

अत्र एतेषु क्वन्नसुप्रभृतिषु मध्ये आन एव आत्मनेपदसंज्ञो भवति। इतरः परस्मैपदमर्थात्। अधीयमानं, स्थीयमानं, पचमानः, रोचमानः, चक्राणः, व्यतिबभूवानः। आत्मनेपदत्वाद् भावकर्म्मणोः कर्त्तरि रुचादिभ्यश्च भवति।

२५१. **ई तस्यासः।**

आसः परो य आनस्तस्यादेरीर्भवति। आसीनः, तस्येति रूपमात्रानुकर्षणार्थं, तेन शानङोऽपि कतीहोदासीनाः सन्ति।

२५२. **आन्मोऽन्त आने।**

अकारात् परो य आनस्तस्मिन् परे अकारान्तस्य मकारोऽन्तो भवति। पचमानः, क्रियमाणः, करिष्यमाणः।

२५३. **पूङ्-यजोः-शानङ्।**

पूङो यजश्च शानङ् भवति। पवते—पवमान; यजते यजमानः। आभ्यां कर्त्तर्य्येवानस्थित्यर्थं वचनमित्येके, भावकर्म्मणोरानशा भाव्यमिति। प्रथमैकाधिकरणप्रपञ्चार्थमित्यन्ये। बहिष्पवमानं मध्यन्दिनमित्यन्वयवार्थं एवायं संज्ञाशब्दः।

२५४. **शक्ति-वयस्ताच्छील्ये।**

शक्त्यादिषु गम्यमानेषु धातोः शानङ् भवति। कतीह निघ्नानाः, कतीह कवचमुद्वहमानाः, कतीह नृत्यमानाः। अभिधानादसरूप शन्तृङ् न स्यात्।

२५५. **इङ् धारिभ्यां शन्तृङ् कृच्छ्रे।**

इङो धारयतेश्च शन्तृङ् भवति अकृच्छ्रे गम्यमाने। अधीयन् पारायणम्, धारयन्नुपनिषदम्। इङ् आनशि प्राप्ते धारेरुभयप्राप्तौ च वचनम्। वासरूपोऽपि नेष्टव्य एव। अकृच्छ्र इति किम्? कृच्छ्रेणाधीते।

२५६. **द्विषः शत्रौ।**

द्विषः शत्रौ कर्त्तरि शन्तृङ् भवति। द्विषन् द्विषन्तौ। शत्राविति किम्? द्वेष्टि पतिं भार्या।

२५७. **सुञो यज्ञसंयोगे।**

यज्ञफलने संयोगविषये वर्त्तमानात् सुञः शन्तृङ् भवति। सुन्वन्तो यजमानाः। संयोगग्रहणं फलवत्कर्तृं प्रतिपत्त्यर्थम्। यज्ञसंयोग इति किम्? सुरां सुनोति।

२५८. अर्हः प्रशंसायाम् ।

प्रशंसायां गम्यमानायां वर्त्तमानादर्हतेः शन्तृङ् भवति, अर्हन् भवान् विद्याम् । प्रशंसायामिति किं, अर्हति चौरो वधम् ।

२५९. तच्छील-तद्धर्म-तत्साधुकारिष्वाक्वेः ।

आ क्वेः क्विपमभिव्याप्य तच्छीलादिषु कर्त्तृष्वितः प्रत्ययाः वेदितव्याः ।

२६०. तृन् ।

तच्छील-तद्धर्म —तत्साधुकारिणि च कर्त्तरिधातोस्तृन् भवति । तृजाद्यपवादः । वदिता जनापवादान् खलः, मुण्डयितारः श्राविष्ठायना वधूमूढाम्, साधु गच्छति गन्ता खेलं—साधुः कुशलार्थं एवात्र ।

२६१. भ्राज्यलंकृञ्-भू-सहि-रुचि-वृति वृधि-चरि-प्रजनापत्रपेनामिष्णुच् ।

एभ्य इष्णुज् भवति तच्छीलादिषु कर्त्तृषु तृनोऽपवादः । भ्राजिष्णुः, अलङ्करिष्णुः; अलंभूषण-पर्याप्ति-वारणेषु, मण्डने युमपि बाधते । भविष्णुः, सहिष्णुः, चोरिष्णुः, वर्त्तिष्णुः, वर्धिष्णुः, चरिष्णुः, प्रजनिष्णुः, अपत्रपिष्णुः -इनन्तानां छन्दसीत्येके धारयिष्णुः, पारयिष्णुः । निराकरिष्णुरिति वक्तव्यम् ।

२६२. मदि-पति-पचामुदि ।

उद्युपपदे एभ्य इष्णुज् भवति तच्छीलादिषु । उन्मदिष्णुः, उन्पतिष्णुः, उत्पचिष्णुः । यथा संख्यं नास्तीति ।

२६३. जिभुवोः स्नुक् ।

आभ्यां स्नुग् भवति तच्छीलादिषुः, जिष्णुः भूष्णुः ।

२६४. ग्ला म्ला-स्था-क्षि-पचि-परिमृजां स्नुः ।

एभ्यः स्नुर्भवति तच्छीलानि । ग्लास्नुः, म्लास्नुः, स्थास्नुः, क्षेष्णुः, पक्ष्णुः परमाक्ष्णुः ।

२६५. त्रसि-गृधि धृषि-क्षिपां क्नुः ।

एभ्यः क्नुर्भवति तच्छीलादिषु । त्रस्नुः, गृध्नुः धृष्णुः, क्षिप्नुः ।

२६६. शमामष्टानां घिणिन् ।

शमादीनामष्टानां घिणिन् भवति तच्छीलदिषु । शाम्यतीयि शमी, एवं दमी, तमी, श्रमी, भ्रमी, क्षमी, क्लमी, उन्मादी । अष्टानामिति किम् ? असिता ।

२६७. **युज-भज-भुज-द्विष-द्रुह-दुह-दुषा-ङ्-क्रीड्-त्यजानुरुधाङ् यमाङ् यस-रञ्जा-भ्याङ्-हनाश्च ।**

एभ्यो घिणिन् भवति तच्छीलादिषु । युजिर्, युज्-योगी, भज्-भागी, भुज्-भोगी, द्विष्-द्वेषी, द्रुह-द्रोही, दुह-दोही, दुष्-दोषी, आङ्-क्रीड्—आक्रीडी, त्यज्—त्यागी, अनुरुध्-अनुरोधी, आङ्-यम्—आयामी, आङ् यस्—आयासी, रञ्ज्-रागी, अभ्याङ्-हन्—अभ्याघाती ।

२६८. **समि-सृजि-पृचि-ज्वरि-त्वराम् ।**

सम्युपपदे एभ्यो घिणिन् भवति तच्छीलादिषु । संसर्गी, सम्पर्की, संज्वरी, संत्वरी - मानुबन्धत्वात् ह्रस्वः ।

२६९. **वौ विच-कत्थ-स्रम्भु-कष-(लस)-लषाम् ।**

वावुपदे एभ्यो घिणिन् भवति तच्छीलादिषु, विवेकी, विकत्थी, विस्रम्भी, विलाषी ।

२७० **प्रे-द्रु-मथ-वद-वस-लपाम् ।**

प्र उपपदे एभ्यो घिनिण् भवति तच्छीलादिषु । प्रद्रावी, प्रमाथी, प्रवादी । वस निवास एव—प्रवासी; प्रलापी ।

२७१. **परौ सृ-दहोः ।**

परावुपपदे आभ्यां घिनिण् भवति तच्छीलादिषु । परिसारी, परिदाही । अस्तिविवक्षायामिना सिद्धं घिणिन् किमर्थः ? यथा—प्रयमणं प्रयामः सोऽस्यास्तीति प्रयामी एवं प्रयासी, अनुवादी, विवादी, सञ्चारी, व्यभिचारी, विघाती, विद्रावी, संवादी, विसारी, विदाही रोगीत्यादयः, ताच्छील्यादिविवक्षायां तृन् माभूदिति वचनम् ।

२७२. **क्षिप-रट-वद-वादि-देविभ्यो वुण् च ।**

परावुपपदे एभ्यो घिणिन् भवति वुण् च तच्छीलादिषु, परिक्षेपकः, परिक्षेपी, परिराटकः, परिराटी, परिवादकः, परिवादी, परिवादयतीत्यर्थेऽप्येवम्; परिदेवत इति परिदेवकः, परिदेवी; वादि-देविभ्यां घिणिनेवेत्येके । वुण् ग्रहणं ताच्छीलिकेषु वास-रूप विधिर्नास्तीति ज्ञापनार्थम् ।

२७३. **निन्द-हिंस-क्लिश-खादानेकस्वर-विनाशि-व्याभाषासूयां वुञ् ।**

एभ्यो वुञ् भवति तच्छीलादिषु, निन्दकः, हिंसकः, क्लेशकः, खादकः, गणकः, दरिद्रायकः,—अनेकस्वरानेच्छन्त्यन्ये; विनाशयतीति विनाशकः, व्याभाषकः,

असूयकः । कण्डूयदिभ्योऽसूयादेवानेकस्वरादिति—पुनर्वुञ्-ग्रहणात् प्रकृतेऽपि घिणिन्न स्यात् ।

२७४. **देवि-क्रुशोश्चोपसर्गे ।**

उपसर्गे उपपदे देवयतेः क्रुशेश्च वुञ् भवति तच्छीलादिषु—आवेदकः, परिदेवकः, क्रीड़ायामेवाभिधानम्, आक्रोपकः । उपसर्ग इति किं ? देवयिता, क्रोष्टा ।

२७५. **क्रुधि-मण्डि-चलि-शब्दार्थेभ्यो युः ।**

एभ्यो युर्भवति तच्छीलादिषु । अर्थशब्दः प्रत्यकमिसम्बन्ध्यते । क्रुध्यार्थात् - क्रोधनः । मण्ड्यर्थात् —मण्डनः, भूषणः । चल्यर्थात् —चलनः, कम्पनः । शब्दार्थात्—शब्दनः, रवणः, शब्द इति लिङ्गमिनन्तं, चौरादिकमित्येके । कथं पठिता विद्याम् ? अभिधानाच्चलिशब्दार्थाभ्यामकर्म्मकाभ्यामिति ।

२७६. **रुचादेश्च व्यञ्जनादेः ।**

रुचादेर्गणाद्व्यञ्जनादेर्युर्भवति तच्छीलादिषु । येभ्य आत्मनेभाषः श्रूयते, ते रूच प्रकारा गणे ङानुबन्धवर्जिता इति । रोचयः, वर्द्धनः, वर्त्तनः । रूचदिरिति किं ? भविता, शयिता, व्यङ्जननादेरिति किम् ? एधिता । आदिग्रहणं किं ? जुगुप्सनः, तितिक्षणः, मीमांसनः वीभत्सन इत्यपि स्यात् । एभ्योऽन्ये रुचादयो व्यञ्जनान्ता इति । कथं वसिता वस्त्रम् ? अभिधानादिहप्यकर्म्मकेभ्य इति ।

२७७. **जुचङ्क्रम्य-दंद्रम्य-सृ-गृधि-ज्वल-शुच-लष [स] पत-पदाम् ।**

एभ्यो युर्भवति तच्छीलादिषु । जु इति सौत्रो धातुर्गतौ जवनः, चङ्क्रमणः, दन्द्रमणः—यस्याननीति यलोप । रसणः, गर्द्धनः, ज्वलनः, शोचनः, अभिलाषणः, प्रपतनः, प्रपदनः । चलनार्थानां ग्रहणं सकर्म्मकार्थं पतिपदिभ्यामुकञा बाधितत्वात् युप्राप्त्यर्थं वचनं,—तच्छीलिकेषु वासरूपविधिर्नास्तीति । समावेशोऽपि दृश्यते, चेद् यथा—विलत्थीति विकत्थनः, भासुर, भास्वरं, भासनं, जागरिता, जागरुकः, वर्द्धिष्णुः, वर्द्धनः, अपलाषिता, अपलाषुकः, अपलषण इति । एवं सति सकर्मकामिथं-त्यन्ये ।

२७८. **न यान्त-सूद-दीप दीक्षाम् ।**

यान्तानां सूद-दीप-दीक्षाञ्च युर्न भवति तच्छीलादिषु । यान्तानां क्रुध्यादित्वात् सूद-दीप-दीक्षाञ्च रुचादित्वात् प्राप्ते प्रतिषेधः । क्नूयिता, क्ष्मायिता, वयिता, सूदिता । दीपिता, कथमरिसूदन इति ? नन्द्यादित्वात् । दीपे रो युं बाधत एव-दीपिग्रहणं वासरुपविधिर्लक्ष्यते इति ज्ञापनार्थं, तेन तुन्नपि स्यात्—दीपिता, दीप्रः । तथा—कामुकः, कमिता, कमनः, कम्र इति ।

२७९. शॄ-कम-गम-हन-वृष-भू-स्था-लष-पत-पदामुकञ् ।

एभ्य उकञ् भवति तच्छीलादिषु । शारुकः, कामुकः, आगामुकः, आघातुकः, वर्षुकः, प्रभावुकः, अपलाषुकः, प्रस्थायुकः प्रपातुकः, प्रपादुकः ।

२८०. वृङ-भिक्षि-लुन्टि-जल्प-कुट्टां-षाकः ।

एभ्यः षाको भवति तच्छीलादिषु । वराकः, वराकी; भिक्षाकः, भिक्षाकी लुन्टाकः, लुन्टाकी जल्पाकः, जल्पाकी, कुट्टाकः, कुट्टाकी । वृञस्तु—वरिता । षकार ङदार्थः, वराकीत्यादिः ।

२८१. प्रे जु स्वोरिन् ।

प्र उपपदे जवतेः सवतेश्च इन भवति तच्छीलादिषु । प्रजवी । सु प्रसवे—प्रसवी ।

२८२. जीण्-दृ-क्षि-विश्रि-परिभूवमाभ्यामाव्यथाञ्च ।

एभ्य इन् भवति तच्छीलादिषु, जि-जयी, इन्—अत्ययी, दृङ्-आदरी, क्षि—क्षयी, विश्रि-विश्रयी, परिभू—परिभवी, टुवम्—वमी, अभ्यम्—अभ्यमी । न व्यथत इति—अव्यथी । तच्छीलादिविवक्षायां तृन् माभूदिति वचनम् ।

२८३. दयि-पति-गृहि-स्पृहि-श्रद्धा-तन्द्रा-निद्राभ्य आलुः ।

एभ्य आलुर्भवति तच्छीलादिषु । दय-दयालुः, पति-गृहिस्पृह्यश्चुरादाविनन्ताः-पतयालुः, गृहयालुः, स्पृहयालुः, श्रुतपूर्व्वो धाञ्—श्रद्धालुः । तन्द्रेति सौत्रो धातुः—तन्द्रालुः । निपर्व्वो द्रा—निद्रालुः । शयालुरिति वक्तव्यम् । कथं हृदयालुः ? हृदयमस्यास्तीति विवक्षायामालुस्तद्धितो रूढ़ितः ।

२८४. शदि-सदि-धेट्-दा-सिभ्यो रुः ।

एभ्यो रुर्भवति तच्छीलदिषु, शद्रुः, सद्रुः धारुः, ददाति, दयते, यच्छति, द्यति ,वा—दारुः, षिञ् बन्धने—सेरुः ।

२८५. सृ-घसां-मरक् ।

एभ्यो मरग्भवति तच्छीलादिषु । ससर्त्ति, सरति वा—सृमरः, युक्वरपावपि वचनात्—सरणः सृत्वरः, अद्मरः घस्लृ—प्रकृत्यन्तरं घस्मरः ।

२८६. मिदि-भासि-भञ्जां घुरः ।

एभ्यो घुरो भवति तच्छीलादिषु. मेद्यतीति-मेदुरः, भासत इति—भासुरः, भज्यते स्वयमेवेति कर्मकर्त्तर्य्येवमिधानात् भङ्गुरं काष्ठं, यस्तु परं भनक्ति, ततस्तृन्नेव-भङ्क्ता ।

२८७. छिदि-भिदि-विदां कुरः ।

एभ्यः कुरो भवति तच्छीलादिषु । छिदुरः, भिदुरः; वेत्तीति—विदुरः । छिदि

भिद्योः कर्मकर्तर्य्येवाभिधानात् । केचिदकर्मकर्त्तर्य्यपि—दोषान्धकारभिदुरो दृप्तारिपक्षच्छिदुर इति ।

२८८. जागुरूकः ।

जागर्तेरूको भवति तच्छीलादिषु । जागरूकः ।

२८९. चेक्रीयितान्तानां यजि-जपि-दन्शि-वदाम् ।

चेक्रीयितान्तानामेषामूको भवति तच्छीलादिषु । यायजूकः, जञ्जपूकः, दन्दशूकः, वावदूकः । मासाह्नि-चाचलि-पा ातिवावावदयोवद्योऽपिचेक्रीयितान्ताः किप्रत्ययान्ता निपात्यन्ते ।

२९०. तस्य लुगचि ।

तस्य चेक्रीयितस्य लुग् भवति अचि परे तच्छीलादिषु । लोलुवः पोपुवः । व्यञ्जनान्तान् सिद्धएव । केचित् योगं विभजन्ति, तेन, बोभवीति, रारटीति सिद्धम् ।

२९१. ततो यातेर्व्वरः ।

ततश्चेक्रीयितान्तात् यातेर्व्वरो भवति तच्छीलादिषु । यायावरः । वरे विषयभूतेऽस्य च लोपे यस्य व्यञ्जने लोपःस्यात् ।

२९२. कसि-पिषि [सि] भासी-श-स्था-प्रमदाञ्च ।

एषां वरो भवति तच्छीलादिषु । कस्वरः, पेस्वरः, भास्वरः, ईश्वरः, स्थावरः, प्रमद्वरः ।

२९३. सृ-जी-ण नशां क्वरप् ।

एषां क्वरप् भवति तच्छीलादिषु । सृत्वरः, जित्वरः, इत्वरः, नश्वरः । क्वरप् नदादौ-सृत्वरी ।

२९४. गमस्त च ।

गमः क्वरप् भवति तच्छीलादिषु तकारश्चान्तादेशः, गत्वरी ।

२९५. दीपि—कम्प्यजसि-हिंसि-कमि-स्मि-नमां रः ।

एषां रो भवति तच्छीलादिषु । दीप्र, कम्प्रः । नञ्पूर्व्वो जसु मोक्षणे-अजस्रः, हिंस्रः, कम्रः, स्मेरः, नम्रः । युरपि दृश्यते-कम्पनः, कमनः ।

२९६. सनन्ताशंसि-भिक्षामुः ।

सनन्तस्याशंसेभिक्षेश्च उर्भवति तच्छीलादिषु । चिकीर्षुः, आङः शसि इच्छायामिति न्याय्यः पाठः—आशंसुः, भिक्षुः । अन्तग्रहणं षणु दान इति शङ्कानिरासार्थम् ।

२९७. विन्दुविच्छू च ।

विन्दुरिच्छुरिति निपात्यते [निपात्येते] तच्छीलादिषु । अभिधानात्—

विद ज्ञाने —विन्दुः, इषु-इच्छायाम्-इच्छुः। कथं विदि अवयवे-बिन्दुः ? स्तोकः पर्य्याय-संज्ञाशब्द औणादिक इति।

२९८. आदृवर्णोपधालोपिनां किर्द्वे च।

आदन्तस्य ऋवर्णान्तस्य उपधालोपिनश्च किर्भवति तच्छीलादिषु, तत्सन्नियोगे च द्वे उक्ती भवतः। डुधाञ्—दधिः, ऋवर्णान्तात्-चक्रिः, सस्रिः। उपधालोपिनश्च जनी जन –जज्ञिः। एते भाषायां रूढाः, एवमन्येऽपि।

२९९. तृषि-धृषि-स्वपां नजिङ्।

एषां नजिङ् भवति तच्छीलादिषु, तृष्णक्, धृष्णक्, स्वप्नक्। धृषे नेच्छन्त्यन्ये।

३००. शृवन्द्योरारुः।

शृणातेर्वन्दतेश्चारुर्भवति तच्छीलादिषु। शरारुः, वन्दारुः।

३०१. भियोरुक-लुकौ च।

भियोरुक्-लुकौ च भवतः तच्छीलादिषु, भीरुः, भीरूः, भीरुकः, भीलुकः, को बहुलार्थ एव।

३०२. क्विप्-भ्राजि-पॄ-धूर्व्वी भासाम्।

एषां क्विप् भवति तच्छीलादिषु। विभ्राट्, विभ्राजौ, विभ्राजः, पूः, पुरौ, पुरः धूः, धुरौ, धुरः, भाः भासौ, भासः। ताच्छीलिकतृन्बाधनार्थं पुनः क्विप्-ग्रहणम्।

३०३. द्युति-गमोर्द्वे च।

द्युतेर्गमेश्च क्विप् भवति तच्छीलादिषु द्वि उक्ती च भवतः। दिद्युत्, जगत्।

३०४. भुवो डुर्विशंप्रेषु।

विशंप्रेषूपपदेषु भुवो डुर्भवति। विभुः, शम्भुः, डकारोऽन्त्यस्वरादिलोपार्थः।

३०५. कर्म्मणि धेटः ष्ट्रन्।

धेटो धातोः कर्म्मणि कारक ष्ट्रन् भवति। षकारो नदाद्यर्थः। धयति तामिति-धात्री स्तनदायिनी, आमलकी चोच्यते। केचित् दधातेरपीच्छन्ति,—दधाति तां भैषज्यार्थमिति—धात्री, संज्ञा-शब्दत्वाद् विशेषाभावः।

३०६. नी-दाप्-शसु-यु-युज्-स्तु-तुद्-सि-सिच-मिह्-पत्-दन्श-नहां करणे।

एषां करणे ष्ट्रन् भवति। णीञ्-नेत्रं, दाप्-लवणे-दात्रं, शसु-शस्त्रं, यु-योत्रं, युजिर्-योक्त्रं, ष्टुञ्-स्तोत्रं, तुद्-तोत्रं, षिञ्-सेत्रं, षिच्-सेक्त्रं, मिह्-मेढ्रं, पत-पत्रं, दन्श-दंष्ट्रं। सदैव स्त्रियामादा। नह-नध्री।

३०७. हल-शूकरयोः पुवः।

पूञः पूङो वा करणे ष्ट्रन् भवति तच्चेत् करणं हल-शूकरयोरवयवः स्यात्।

हलस्य पोत्रं, शूकरस्य पोत्रं मुखमित्यर्थः। सर्वधातुभ्यः ष्ट्रन्निति (उणादौ) अस्य प्रपञ्चार्थम्।

३०८ अर्ति-लू-धू-सू-खनि-सहि-चरिभ्य इत्रन्।

एभ्यः करणे इत्रन् भवति। अरित्रं, लवित्रं, धवित्रं, षू (प्रेरणे) सवित्रं, खनित्रं, सहित्रं; चर गत्यर्थः—चरित्रम्।

३०९. पवः संज्ञायाम्।

पुङः पूञो वा [करणे] इत्रन् भवति संज्ञायां गम्यमानायाम्। पवित्रं यज्ञोपवीतं, पवित्रा नाम नदी।

३१०. ऋषि-देवतयोः कर्त्तरि।

पूर्वं इत्रन् भवति ऋषौ देवतायाञ्च कर्त्तरि; पुनातीति-पवित्रोऽयम् ऋषिः, पवित्रोऽग्निः। केचित् करणमनुवर्त्य यथासंख्यसम्बन्धमिच्छन्ति, विवक्षायां को विशेष इति।

३११ ञ्यनुबन्ध-मतिबुद्धि-पूजार्थेभ्यः क्तः।

मतिरिच्छा, बुद्धिर्ज्ञानं, पूजा सत्कारः। ञ्यनुबन्धेभ्यो मतिबुद्धिपूजार्थेभ्यश्च वर्तमाने क्तो भवति, भावे, कर्म्मणि, कर्त्तरि च यथासम्भवम्। ञिमिदा स्नेहने—मित्रः, ञिक्ष्विदाक्षिण्णः। मत्यर्थात्—राज्ञां मतः, राज्ञामिष्टः, बुद्ध्यर्थात्-राज्ञां बुद्धः, राज्ञां ज्ञातः, पूजार्थात्—राज्ञां पूजितः, राज्ञामर्च्चितः। अन्यत्रापि बहुलत्वात्—

"शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि।
रुष्टाश्च रुषितश्चोभावभिव्यवहृत इत्यपि॥
हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ।
कष्टं भविष्यतीत्याहुरमृताः पूर्व्वं स्मृताः॥"

तथा "सुप्तः, शयितः, आसितः, लिप्तः, स्निग्धः, तृप्त इत्यादयः। वर्त्तमाने भूतो भावी च क्रियाक्षणोऽस्त्येवविवक्षा गरीयसीति वचनम्॥"

३१२. उणादयो भूतेऽपि।

उणादयः प्रत्यया वर्त्तमाने भूतेऽपि साधवो भवन्ति। केचित् वर्त्तमाने—करोतीति कारुः। एवं वातीति—वायुः। केचिद् भूते—वृत्तं तदिति—वर्त्म, भसितं तदिति भस्म। प्रकृतिप्रत्ययावगमो व्युत्पत्तावपि रूढित एव।

३१३. भविष्यति गम्यादयः।

गमीत्येयमादयः शब्दा औणादिका भविष्यति काले साधवो भवन्ति। गमादिभ्यो भविष्यत् काल वृत्तिभ्य इन् स्यादित्यर्थः। ग्रामं गमी, ग्राममागामी, (भावी) स्थायी, श्वस्तनी विषयेऽपि—श्वो ग्रामं गमी, पदार्थश्वस्तने—श्वो ग्रामं गन्तेति प्राप्तम्।

३१४. वुण्-तुमौ क्रियायां क्रियार्थायाम् ।

क्रियायां क्रियार्थायामुपपदे भविष्यत्यर्थे वर्त्तमानाद्धातोर्वुण्तुमौ भवतः । पाचको व्रजति, पक्तुं व्रजति,-पक्ष्यामीति कृत्वा व्रजतीत्यर्थः । क्रियायामिति किं ? भिक्षिष्ये इत्यस्य जटा । क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति दण्डः । वुण् ग्रहणं तृजादि-निवृत्त्यर्थम् । तुम् भावमेवाभिधत्ते ।

३१५. भाववाचिनश्च ।

क्रियायां क्रियार्थायामुपपदे भविष्यत्यर्थे वर्त्तमानाद्धातोर्भाववाचिनश्च प्रत्यया भवन्ति । पाकाय व्रजति, पक्तये व्रजति, पचनाय व्रजति । तुमि नित्ये प्राप्ते वचन वासरूपविधिरत्र नास्तीति ।

३१६. कर्म्मणि चाण् ।

क्रियायां क्रियार्थायामुपपदे कर्म्मणि च भविष्यत्यर्थे वर्त्तमानाद्धातोश्चाण भवति । काण्डलावो व्रजति, गोदायो व्रजति, गोदायो व्रजति, गोसंख्यायो व्रजति, सामगायो व्रजति, सुरापायो व्रजति ।

३१७. शन्त्रानौ स्यसहितौ शेषे च ।

शन्तृङ्-सहचरित आन इह गृह्यते । क्रियायां क्रियार्थायां कर्म्मणि चोपपदे शेषे च भविष्यदर्थे वर्त्तमानाद्धातोः शन्तृङानशौ स्येन संहितौ भवतः । करिष्यन् व्रजति, करिष्यमाणो व्रजति, कटं करिष्यन् व्रजति, कटं करिष्यमाणो व्रजति । शेषे च— करिष्यन्, करिष्यमाणः, हे करिष्यन्, हे करिष्यमाण !

इति दौर्गसिंह्यां वृत्तौ कृत्सु चतुर्थ पादः समाप्तः ।

पञ्चमः पादः

३१८. पद-रुज-विश-स्पृश शोचां घञ् ।

एषां घञ् भवति । घानुबन्धश्चजोः कगाविति कत्व-गत्वार्थः, अनुबन्ध इञ्वद्-भावार्थः । पद्यते, पत्स्यते, अपादि, पेदे वा—पादः, एवं रोगः, वेशः, स्पर्शो नाम क्षयो व्याधिश्च; ओकः ।

३१९. सृ-स्थिरव्याध्योः ।

सृधातोः स्थिरे व्याधौ च कर्त्तरि घञ् भवति । सरति कालान्तरमिति—सारः, स्थिरोऽर्थः । अतीसारो व्याधिः—ह्रस्वस्य दीर्घता । सरन्त्यनेनेति—सारो बलं, विसरन्त्यनेनेति विसारो मत्स्यः—संज्ञाशब्दत्वात् करण एव सिद्धः । यद्येवं पद्यतेऽनेनेति पादो भविष्यति ? सत्यं प्रपञ्चार्थं पदिग्रहणम् ।

३२०. भावे ।

सर्वस्मादधातोर्भावे घञ् भवति । पाकः, पाकौ, पाकाः । भवत्यर्थः क्रिया सामान्यः, इह हि सिद्धताख्यः सत्त्वभूत इति द्विवचन बहुवचने भवतः ।

३२१. अकर्त्तरि च कारके सञ्ज्ञायाम् ।

कर्त्तृवर्ज्जिते कारके भावे च धातोः सञ्ज्ञायां गम्यमानायां घञ् भवति । प्रकुर्व्वन्ति तमिति—प्राकारः, प्राश्यत इति प्राशः, आहरन्ति तमिति आहारः, प्रसीदन्त्यस्मिन्नयनमनांसि इति—प्रासादः, दीर्घ्यन्ते एभिरिति—दाराः, जीर्यन्त्यनेनेति—जारः । अकर्त्तरीति किं ? नदतीति—नदः, शोणः । असञ्ज्ञायामपि—दायो दत्तः, लाभो लब्धः । कारकग्रहणं प्रसज्यनञ्-समास ज्ञापनार्थम् ।

३२२. सर्वस्मात् परिमाणे ।

परिमेयत्वात् परिमाणम् । परिमाणविषये वर्त्तमानात् सर्वस्माद्धातोर्घञ् भवति—कर्त्तृवर्ज्जिते कारके भावे च सञ्ज्ञायां गम्यमानायाम् । सङ्ख्या प्रस्थादिर्वा परिमाणम् । एकस्तण्डुलनिश्चायः, द्वौ शूर्पनिष्पावौ, प्रस्थनिश्चायः द्रोणावक्षायः । अलो बाधकत्वात् सर्वस्माद् भवति, सर्वस्मादिति ज्ञापयति—धात्वाश्रितः प्रत्ययो घञा बाध्यते, न त्वर्थाश्रित इति—तेन एका तिलोच्छ्रितिः, द्वे श्रुती तैलस्य—क्तिरेव, एकं श्रवणं, द्वे प्रस्थाने—युट् सिद्धः । कथमेको निश्चयः ? अप्यधिकारात् ।

३२३. इङाभ्याञ्च ।

इङ आकारान्ताच्च धातोर्घञ् भवति भावे कर्त्तरि च कारके संज्ञायामित्य-विशेषेऽयमधिकारो वेदितव्यः । अलोपवादः । अध्ययनम् अधीयते वा—अध्यायः, उपेत्याधीयते यस्मात्—उपाध्यायः, उपाध्याया, उपाध्यायी—इङा घञ् नदादौ विभाषयेति । आकारान्ताच्च—दायः, धायः ।

३२४. उपसर्गे रुवः ।

उपसर्ग उपपदे रौतेर्घञ् भवति । संरावः उपरावः । उपसर्ग इति किं ? रवः । सारांविणमित्यत्र इनुण् बाधकः ।

३२५. समि धुवः ।

सम्युपपदे दुनोतेर्घञ् भवति । संदावः । समीति किं ? दवः ।

३२६. युद्रुवोरुदि च ।

उद्युपपदे सनि च युद्रुभ्यां घञ् भवति । उद्यावः, उद्द्रावः । संयावः, सन्द्राव एवेति केचित् । उदि चेति किं ? यवः, द्रवः । अप्यधिकारात्—यावः, द्रावः । दाव इति च स्यात् । तथा शारो वायुः, शारः, शवलः, नीशारः, प्रावरणं—ह्रस्वस्य दीर्घता ।

३२७. श्रि-नी-भूभ्योऽनुपसर्गे ।

एभ्योऽनुपसर्गे घञ् भवति । श्रायः, नायः, भावः । अनुपसर्ग इति किं ? प्रश्रयः, प्रिणयः, प्रभवः । कथ प्रकृष्टो भावः, अनुगतो भावः—अनुभावः, विगतो भावः—वभावः । अप्यधिकारात् नय इति च ।

३२८. क्षु-श्रुभ्यां वौ ।

वावुपपदे आभ्यां घञ् भवति । विक्षावः, विश्रावः । वाविति किं ? क्षवः, संश्रवः ।

३२९. स्तृश्च प्रथनेऽशब्दे ।

प्रथनं विस्तीर्णता । वावुपदे स्तृणातेर्घञ् भवति प्रथनेऽभिधेये, तच्चेत् प्रथनं शब्दविषये न स्यात् । पटस्य विस्तारः । अशब्द इति किं ? वाक्यस्य विस्तरः । प्रथन इति किं ? तृणस्य विष्टरः ।

३३०. प्रे वायज्ञे ।

प्रे चोपपदे स्तृणातेर्घञ् भवति अयज्ञविषये । प्रस्तावः । यज्ञे तु—बर्हिः प्रस्तरः ।

३३१. छन्दो नाम्नि च ।

छन्दसां संज्ञाविषये स्तृणातेर्घञ् भवति । प्रस्तार—पंक्तिः, आस्तार पंक्तिः, विष्टार-पंक्तिः ।

३३२. **प्र-द्रु-स्तु-स्रुवः ।**

प्र उपपदे एभ्यो घञ् भवति । प्रद्रावः, प्रस्तावः, प्रस्रावः । कथं द्रावः ? अप्यधिकारात् । प्र इति किं ? द्रवः, स्तवः, स्रवः ।

३३३. **नियोऽवोदोः ।**

अवोदोरुपपदयोर्नियो घञ् भवति । अवनायः, उन्नायः । कथम् उन्नयः ? उद्गतानयः उन्नयः, अप्यधिकाराद् वा ।

३३४. **निरभ्योः पूल्वोः ।**

निरभ्योरुपपदयोर्यथासंख्यं पूल्वोर्घञ् भवति । निष्पावः, अभिलावः ।

३३५. **यज्ञे समि स्तवः ।**

सम्युपपदे स्तौतेर्घञ् भवति यज्ञविषये । समेत्य स्तुवन्ति यस्मिन्—संस्तावः, देशः । संस्तवोऽन्यः ।

३३६. **उन्योर्गिरः ।**

उन्योरुपपदयोगिरतेर्घञ् भवति । उद्गारः, निगारः । उन्योरिति किं ? गरः ।

३३७. **किरो धान्ये ।**

उन्नयोरुपपदयोर्धान्यविषये वर्त्तमान् किरतेर्घञ् भवति । उत्कारो धान्यस्य, निकारो धान्यस्य । धान्य इति किं ? पुष्पोत्करः, पुष्पनिकरः । किरतेरिति किं ? कॄञ् हिंसायां—धान्यनिकरः ।

३३८. **नौ-वृञः ।**

नावुपपदे वृञो धातोर्घञ् भवति धान्यविषये । नीवारा व्रीहयः—ह्रस्वस्य दीर्घता ।

३३९. **उदि श्रि-पुवोः ।**

उद्युपपदे श्रि पूङ्भ्यां घञ् भवति । उच्छ्रायः, उत्पावः । कथमुच्छ्रयः ? अप्यधिकाराद् वा ।

३४०. **ग्रहेश्च ।**

उद्युपपदे ग्रहेश्च घञ् भवति । उद्ग्राहः । भाषायामपीति मतम् ।

३४१. **अव-न्योराक्रोशे ।**

अव-न्योरुपपदयोराक्रोशे गम्यमाने ग्रहेर्घञ् भवति । अवग्राहस्ते वृषल ! भूयात्, निग्राहस्ते वृषल ! भूयात् । आक्रोश इति किम् ? अवग्रहः पदस्य, निग्रहः चौरस्य ।

३४२. प्रे लिप्सायाम् ।

प्र उपपदे लिप्सायां गम्यमानायां ग्रहेर्घञ् भवति । पात्रप्रग्राहेण चरति भिक्षुः । लिप्सायामिति किं ? प्रग्रहः ।

३४३. समि-मुष्टौ ।

सम्युपपदे मुष्टावर्थे ग्रहेर्घञ् भवति । संग्राहो मल्लस्य । मुष्टाविति किं ? संग्रहः । अङ्गुलीनां रचना विशेषो मुष्टिरिह गृह्यते । एकः शाकसंग्राह इति सर्वस्मात् परिमाण इति सिद्धम् ।

३४४. परौ यज्ञे ।

परावुपपदे यज्ञविषये ग्रहेर्घञ् भवति । उत्तरपरिग्राहः । यज्ञ इति किं ? परिग्रहः ।

३४५. वाऽवे वर्षप्रतिबन्धे ।

अव उपपदे ग्रहेर्घञ् भवति वा वर्षप्रतिबन्धे गम्यमाने । अवग्राहो वर्षस्य, अवग्रहो वा ।

३४६. प्रे रश्मौ ।

प्र उपपदे रश्मावर्थे ग्रहेर्घञ् भवति वा । प्रग्राहः, प्रग्रहः । रश्मिरिह रज्जुरुच्यते ।

३४७. वणिजाञ्च ।

वणिजाञ्च सम्बन्धिनि तुलासूत्रेऽर्थे प्र उपपदे ग्रहेर्घञ् भवति वा । तुलाप्रग्राहेण चरति, तुलाप्रग्रहेण वा चरति वणिकः ।

३४८. वृणोतेराच्छादने ।

प्र उपपदे वृणोतेराच्छादनेऽर्थे घञ् भवति वा । प्रावारः, प्रावरः । आङ्पूर्व्वोऽप्ययम् ।

३४९. आङिरुप्लुवोः ।

आङ्युपपदे रौतेः प्लवतेश्च घञ् भवति वा । आरावः, आरवः, आप्लावः, आप्लवः ।

३५०. परौ भुवोऽवज्ञाने ।

परावुपपदे भवतेर्घञ् भवति वा अवज्ञानेऽर्थे । परिभावः, परिभवः । परावितिकिं ? सम्भवः । अवज्ञान इति किम् ? सर्व्वतो भवनं परिभवः ।

३५१. चेस्तु हस्तादाने ।

हस्तादानविषये चिनोतेर्घञ् भवति । पुष्पप्रचायः । हस्तादानग्रहणं प्रत्यासन्नोपलक्षणं तेन वृक्षाग्रे फलप्रचयं करोति । अप्यधिकारात् स्तेये न स्यात्— हस्तेन फलप्रचयं करोति चौरः । तुशब्दो वा निवृत्त्यर्थः ।

३५२. शरीर-निवासयोः कश्चादेः ।

चिनोतेः शरीर निवासे चार्थे घञ् भवति आदेश्च को भवति । चीयतेऽसौ कायः शरीरम् निचीयतेऽस्मिन्निति—निकायो निवासः । अप्यधिकाराच्चिति—राश्योरपि—आचीयतेऽसौ—आकायश्चितिः, गोमयनिकायः । कथं काष्ठनिचयः ? बहुत्वमात्र-विवक्षयेति ।

३५३. संघे चानौत्तराध्र्ये ।

प्राणिनां समूहः संघ उच्यते । अनौत्तराध्र्ये संघे चार्थे चिनोतेर्घञ् भवति कश्चादेः । वैयाकरणनिकायः । अनौत्तराध्र्य इति किम् ? शूकरनिचयः ।

३५४. परि-न्योर्नीणोर्द्यूताभ्रेषयोः ।

परि-न्योरुपपदयोर्नीणोर्घञ् भवति यथासंख्यं द्यूतविषये अभ्रेषे चार्थे । अभ्रेषो-ऽचलनं यथा-प्राप्तकरणमित्यर्थः । परिणायेन शारीनाहन्ति—सर्व्वतो नयनेनेत्यर्थः । अभ्रेषे एषोऽत्र न्यायः ।

३५५. व्युपयोः शेतेः पर्य्याये ।

व्युपयोरुपपदयोः पर्य्यायविषये वर्त्तमानात् शेतेर्घञ् भवति । तव राजविशायः, तव राजोपशाय,—तव राजनि शयितु पर्य्याय इत्यर्थः । अस्मादेव ज्ञापकात् परिपूर्व्वा-दिणः क्रमेऽर्थे घञ् ।

३५६. अभिविधौ भावे इनुण् ।

अभिविधौ गम्यमाने धातोर्भावे इनुण् भवति । सांकोटिनं, सांराविणं वर्त्तते, क्रिययैवाभिव्याप्तिः, इनुणन्तात् स्वार्थेऽण् । युडपि दृश्यति—संकूटनम् ।

३५७. कर्मव्यतिहारे णच् स्त्रियाम् ।

क्रियाविनिमये गम्यमाने धातोर्णच् भवति स्त्र्यां भावे । व्यावक्रोशी, व्याव-भाषी,—णजन्तात् स्वार्थेऽण्, तत्र क्वचिदधिकारात् क्रियाव्यतिहारे न वृद्धिरागमः, कथं व्यतीहा, व्यतीक्षा, व्यवकृष्टिरिति ? अस्त्र्यधिकारत्वाद्वासरूपता ।

३५८. स्वर-वृ-दृ-गमि-ग्रहामल् ।

स्वरान्तात् वृ-दृ-ग्र-गमिग्रहिभ्यश्च अल् भवति । घञोपवादः । क्षयः, क्रयः, क्षवः, लवः । वृञ् वृङ् वा—वरः, दृङ्-दरः, गमः, ग्रहः । वृद्गोरेवेति नियमात् अन्येभ्य ऋकारान्तेभ्यो घञेव—कारः, हारः । दीर्घादलेव,—कॄ—करः, गॄ—गरः । भीतिर्भयमित्यलेव, न युद्रादयोऽपीति । वशः, रणः इति रुढित्वादलेव ।

३५९. उपसर्गेऽदेः ।

उपसर्ग उपपदेऽदेरल् भवति । प्रघसः, विघसः—घमसोर्घस्लृः । उपसर्ग इति किं ? घासः ।

३६०. नौ ण च ।

नावुपपदेऽदेरल् णश्च भवति । निघसः, न्यादः ।

३६१. मदेः प्र-समोर्हर्षे ।

प्रसमोरुपपदयोर्म्मदेरल् भवति हर्षेऽर्थे । प्रमदः कन्यानां, सम्मदः कोकिलानाम् । प्रसमोरिति किम् ? उन्मादश्छात्राणाम् ।

३६२. व्यधि-जपोश्चानुपसर्गे ।

अनुपसर्गे व्यधि-जपिभ्यां मदेश्चाल् भवति । व्यधः, जपः, मदः । अनुपसर्ग इति किम् ? आव्याधः, उपजापः, प्रमादः ।

३६३. स्वन-हसोर्व्वा ।

अनुपसर्गे आभ्यामण् भवति वा । स्वनः, स्वानः, हसः, हासः । अनुपसर्ग इति किम् ? प्रस्वानः, प्रहासः ।

३६४. यमः सन्न्युपविषु च ।

अनुपसर्गे सन्न्युपविषु यमेरल् भवति वा । यामः, यमः, संयमः, संयामः, नियमः, नियामः, उपयमः, उपयामः, वियमः, वियामः ।

३६५. नौ-गद-नद-पठ-स्वनाम् ।

नावुपपदे एभ्योऽल् भवति वा । निगदः, निगादः, निनदः, निनादः, निपठः, निपाठः, निस्वनः, निस्वानः । स्वन-हसोर्व्वेति वचनात् अनुपसर्ग इति नानुवर्त्तते ।

३६६. क्वणो वीणायाञ्च ।

नावुपपदेऽनुपसर्गे च वीणाविषये क्वणतेरल् भवति वा । क्वणः, क्वाणः, निक्वणः, निक्वाणः । चकारे सति वीणाग्रहणं सोपसर्गार्थम्—प्रक्वणः, वीणायाः प्रक्वाण इति ।

३६७. पणः परिमाणे नित्यम् ।

पणतेरल् भवति नित्यं परिमाणेऽर्थे । पणः—शाकादीनामपि परिमिता मुष्टिः पण उच्यते । परिमाण इति किं ? दास्याः पाणः ।

३६८. समुदोरजः पशुषु ।

समुदोरुपपदयोः पशुषु वर्तमानादजेरल् भवति । समजः, पशूनां समूह इत्यर्थः । उदजः, पशूनां प्रेरणमित्यर्थः । पशुष्विति किं ? समाजश्छात्राणाम्, उदाजः खगानाम् ।

३६९. ग्लहोऽक्षेषु ।

अक्षविषये वर्तमानाद् ग्रहेरलि लत्वं निपात्यते । ग्लहः अक्षाणाम् । ग्लहि—प्रकृत्यन्तरमित्येके—तदा प्रग्लाह इति घञि प्रत्युदाहरणम् ।

३७०. सर्तेः प्रजने।

प्रजने गर्भग्रहणे वर्त्तमानात् सर्त्तेरल् भवति। गवामुपसरः, उपसारोऽन्यः।

३७१. ह्वो हुश्चाभ्युपनिविषु च।

एषूपपदेषु ह्वयतेरल् भवति हुरादेशश्च। अभिहवः, उपहवः, निहवः, विहवः।

३७२. आङि युद्धे।

आङ्युपपदे ह्वयतेरल् भवति युद्धेऽर्थे हुरादेशश्च। आहूयन्ते यस्मिन् योद्धारः स आहवः संग्रामः। कथमाहूयन्ते पानाय गावो यस्मिन् स आहावः जलाधारः? अन्यत्रापीति वचनात्।

३७३. भावेऽनुपसर्गस्य।

अनुपसर्गस्य ह्वयतेरल् भवति भावे हुरादेशश्च। हवः। अनुपसर्गस्येति किं? किं? प्रह्वायः।

३७४. हन्तेर्वधिश्च।

अनुपसर्गस्य हन्तेरल् भवति भावे वधिरादेशश्च। हननं-वधः। अप्यधिकाराज्ञ्—घातः। अनुपसर्गस्येति किं? विघातः।

३७५. मूर्त्तौ घनिश्च।

मूर्त्तिः काठिन्यम्,। मूर्त्तावर्थे हन्तेरल् भवति घनिरादेशश्च। दध्नो घनः, घनं दधीत्यभेदात्।

३७६. प्राद्गृहैकदेशे घञ् च।

प्राद्हन्तेरल् भवति घञ् च घनिरादेशश्च गृहैकदेशेऽर्थे। प्रघाणः, प्रघणः—गृहस्य द्विधाकृतस्य द्वारप्रकोष्ठभ्यां यो बहिर्भूतः, तत्रापीति वचनाण्णत्वम्।

३७७. अन्तर्घणोद्घनौ देशात्याधानयोः।

एतावलन्तौ देशात्याधानयोर्यथासंख्यं निपात्येते। अन्तर्हन्यतेऽस्मिन्निति अन्तर्घनो देशः, ऊर्ध्वं हन्यतेऽस्मिन्निति स उद्घनः—यस्योपरि काष्ठानि हन्यन्ते तदत्याधानम्।

३७८. करणेऽयो-वि-द्रुषु।

एषूपदेशु हन्तेरल् भवति करणे घनिरादेशश्च। अयो हन्यतेऽनेनेति—अयोघनः, विहन्यतेऽनेनेति—विघनः, एवं द्रुघणः—संज्ञायां णत्वम्।

३७९. परौ घः।

परावुपपदे हन्तेर्डो भवति करणे घनिरादेशश्च। परि हन्यतेऽनेनेति—परिघः, लत्वे—पलिघः।

३८०. मौ निमिते।

मावुपपदे हन्तेर्डो भवति घनिरादेशश्च निमिते वस्तुनि। निर्विशेषेण हन्यन्ते ज्ञायन्ते वा = निघाः वृक्षाः, निघाः, शालयः सर्व्वतो निमिता आरोहतः परिणाहतश्च। निमित इति किम् ? निघातः।

३८१. समुदोर्गण-प्रशंसयोः।

समुदोरुपपदयोर्हन्तेर्डो भवति घनिरादेशश्च गणे प्रशंसायाञ्च यथासंख्यम्। संहननं संहन्यतेऽस्मिन्नवयवो वा संघ, उत्कृष्टं हन्यते ज्ञायते—उद्घो मनुष्यः प्रशस्त इत्यर्थः।

३८२. उपात् क आश्रये।

उपाद्हन्तेः को भवति आश्रये गम्यमाने घनिरादेशश्च। कुड्योपघ्नं वसति।

३८३. स्तम्बेऽच्च।

स्तम्ब उपपदे हन्तेरद् भवति, कप्रत्ययो घनिरादेशश्च। स्तम्बो हन्यतेऽनेनेति—स्तम्बघनः स्तम्बघ्नो दण्डः, स्तम्बघ्नो यष्टिः—पुंस्त्वमेव स्वभावात्। केचित् स्त्रिया-मादा—स्तम्बघ्ना यष्टिरिति। अप्यधिकारात्—स्था-स्ना-पिबति-व्यधि-हनिभ्यः कः स्यात्—आखूत्थं वर्त्तते। प्रस्नात्यस्मिन्निति—प्रस्नः। प्रपिबन्त्यस्यामिति—प्रपा। आविध्यतेऽनेनेति—आविधः, विहन्यतेऽनेनेति—विघ्नः। आयुध्यतेऽनेनेति—आयुध शस्त्रं ज्ञापकादेव।

३८४. ट्वनुबन्धादथुः।

ट्वनुबन्धाद् धातोरथुर्भवति भाव एव। टुवेपृ वेपथुः टुओश्वि—श्वयथुः टुदु—दवथुः टुवम्—वमथुः। वेपः, दव इति वासरूपत्वात्।

३८५. ड्वनुबन्धास्त्रिमक् तेन निर्वृत्तेः।

ड्वनुबन्धाद्धातोस्त्रिमग् भवति तेन धात्वर्थेन निर्वृत्तेऽर्थे। डुपचष—पाकेन निर्वृत्तं—पक्त्रिमं, डुकृञ्, करणेन निर्वृत्तं—कृत्रिमम्। निर्वृत्तमिति कर्त्तरि, कर्म्मणि वा क्तः। तेनेति यथायोगं तृतीया।

३८६. याचि-विच्छि-प्रच्छि-यजि-स्वपि-रक्षि-यतां नङ्।

एभ्यो नङ् भवति। याञ्चा, विश्नः, प्रश्नः, यज्ञः, स्वप्नः, रक्ष्णः, रत्नः।

३८७. उपसर्गे दः किः।

उपसर्ग उपपदे दासंज्ञकात् किर्भवति। आदिः, निधिः, विधिः, आधिः, सन्धिः। अप्यधिकारात्—अन्तर्धिः।

३८८. कर्म्मण्यधिकरणे च।

कर्म्मण्युपपदे दासंज्ञकात् किर्भवति, अधिकरणे च। बालधिः, जलधिः। उपसर्गव्यवधानेऽपि—पयोनिधिः।

३८९. स्त्रियां क्तिः ।

स्त्रीलिङ्गे भावे कर्त्तरि च कारके संज्ञायां क्तिर्भवति । वृत्तिः, वृद्धिः । इज्येत-अनेनेति इष्टिः, एवं श्रुतिः, स्तुतिः-करणेऽपि ।

३९०. साति-हेति-यूति जूतयश्च ।

एते क्ति प्रत्ययान्ता निपात्यन्ते स्त्रियाम् । सिनातेः सनोतेर्वा सातिः, हिनोतेः—हेतिः, यौतेः —यूतिः, जवतेः —जूतिः ।

३९१. भावे पचि-गा-पा-स्थाभ्यः ।

एभ्यो भावे स्त्रियां क्तिर्भवति । पचे षानुबन्धत्वादङि प्राप्ते पक्तिः, तथा—आतश्चोपसर्गे—संगीति । प्रपीतिः, संस्थितिः । अप्यधिकारात्—संस्था, व्यवस्था ।

३९२. व्रज-यजोः क्यप् ।

भावे स्त्रियामाभ्यां क्यप् भवति । व्रज्या, इज्या इष्टिरित्यपि भावे ।

३९३. समजा-स-निसद-निपति-शीङ-सु-विद-टि-चरि-मनि-भृञिणां संज्ञायाम् ।

एभ्यः संज्ञायां क्यप् भवति भावे स्त्रियाम् । समज्या, आस्या, निषीदन्ति अस्यामिति —निषद्या, निपतन्ति अस्यामिति निपत्या, शेरतेऽस्यामिति – शय्या,—अधिकरणेऽपि । सवनं—सुत्या, विद्या —करणेऽपि । अटेश्चेक्रीयितान्तादेवाभिधानात्—अटाट्या। परिपूर्व्वादेव चरेः—परिचर्य्या, मन्या, भृत्या, इत्या । अप्यधिकारात्—आसुतिः, भृतिः, समितिः । भाव इति किम् ? भार्य्या । संज्ञायामिति किम् ? संवित्तिः ।

३९४. कृञः श च ।

कृञः शो भवति क्ति क्यप् च । क्रियत इति—क्रिया । भावे च—कृतिः, कृत्या ।

३९५. सर्त्तेर्यश्च ।

अभिधानात् परिपूर्वात् सर्त्तेर्यो भवति परिसर्य्या । चकारात्—जागर्त्तेश्च—जागर्य्या ।

३९६. इच्छा ।

इषेरिच्छति निपात्यते । इच्छा ।

३९७. शंसि प्रत्ययादः ।

शंसुर्निष्ठायामनिडिति वचनम् । शन्सेः प्रत्ययान्ताच्च धातोरप्रत्ययो भवति स्त्रियाम् । प्रशंसा, पिपतिषा, पिपासा। दृशदो यिन्—दृशदा, अटाटा, कण्डूया । कण्डूतिरपीत्येके ।

३९८. गुरोश्च निष्ठासेटः ।

गुरोमतो धातोर्निष्ठायां सेटोःप्रत्ययो भवति । ईहा, ईक्षा, जागरा । गुरोरिति किं ? निग्रहीतिः । निष्ठासेट इति किं ? नीतिः, राद्धिः ।

३९९. षानुबन्ध-भिदादिभ्यस्त्वङ् ।

षानुबन्धेभ्यो भिदादिभ्यस्त्वङ् भवति । जृष — जरा, डुपचष्—पचा, क्षिष् — क्षिया,—घटादयः षानुबन्धाः — घटा, व्यथा, कृप कृपायामिति निर्देशात् — कृपा । उपलब्धिरिति ज्ञापकात्, क्षन्तिरित्यपि स्यात् । भिदादिभ्यो नामगणनिर्दिष्टेभ्य एव— भिदा—विदारणे, भित्तिरन्या, गुहा — सर्वतैकदेशे, गूढिरन्या, छिदा — द्विधाकरणे, छित्तिरन्या, आङ्पूर्वादर्त्तेः —आरा—शस्त्री, अत्तिरन्या, धृङ् प्रपाते—धारा, धृति- रन्याः, विद—विदा, क्षिप—क्षिपा, गुध्र —गोध्रा, हृञ्—हारा, कृञ्—कारा, लिख— लेखा, रत्वं वादेः रेखा । ऊन-चुद-पीड (रुज-मृग-वस) मृगयतिभ्य इनन्तेभ्यो यौ प्राप्ते वचनम्—ऊना, चड़ा—दीर्घत्वं दस्य उत्वं च निपातनात्, पीड़ा, मृगया (रुजा-मृगा- वसा) गुणवृद्धयादिकमर्थं—विशेषश्च गणपाठसामर्थ्यात् ।

४००. भीषि-चिन्ति-पूजि-कथि-कुम्बि-चर्च्चि-स्पृहि-तोलि दोलिभ्यश्च ।

एभ्य इनन्तेभ्योऽङ् भवति । भियो हेतुभये षष्चान्तः । भीषणं भीषा, चिति स्मृत्यां—चिन्ता, पूज पूजायां—पूजा, कथ वाक्य प्रबन्धे—कथा, कुम्बि छादने—कुम्बा, चर्च्च अध्ययने चर्च्चा, स्पृह ईप्सायाम्—स्पृहा, तुल—उन्मादने—तोला, दुल उत्क्षेपणे—दोला । कथं तुला ? तुलया सम्मित इति ज्ञापकात् ।

४०१. आतश्चोपसर्गे ।

उपसर्गे उपपदे आकारान्ताद् धातोरङ् भवति । सन्धा, संस्था, व्यवस्था, उपदा, उपधा । अन्तर् पूर्वाच्च वक्तव्यम्—अन्तर्धा । कथं—श्रद्धा ? आश्रद्धेति ज्ञापकात् । अप्यधिकारात्—प्रमितिः ।

४०२. ईषि-श्रन्थ्यासि-वन्दि-विदि-कारितान्तेभ्यो युः ।

एभ्यो युर्भवति । ईष गतिहिंसादानेषु—ईषणा, श्रन्थना, उपासना, वन्दना । आसिसहचरितो वेत्तिः—वेदना, कारणा । चुरादौ घट्टचलने—घट्टना । भौवादिकस्य घटतेः क्तेरभिधानात् ।

४०३. कीर्त्तीषोः क्तिश्च ।

कीर्त्तयतेरिषेश्च क्तिर्भवति युश्च । कीर्त्तिः, संकीर्त्तना, इष गतौ, इष आभीक्ष्ण्ये वा—अन्विष्टिः, अन्वेषणा, परीष्टिः, पर्य्येषणा । इषु इच्छायामिति सानुबन्धः— इष्टिः ।

४०४. रोगाख्यायां वुञ् ।

व्याधेरोगाख्यायां धातोर्वुञ् भवति । प्रवाहिका, प्रच्छर्दिका, विचर्च्चिका । अप्यधिकारात्—शिरसोऽर्द्दनं शिरोऽर्त्तिः ।

४०५. **संज्ञायायाञ्च ।**

संज्ञायायाञ्च विषये धातोर्वुञ् भवति । उद्यानपुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्यानपुष्पभञ्जिका क्रीड़ा । क्रीडायां नित्यसमास एव । पुष्पभञ्जिकेत्येतावती संज्ञा । एवं वीरणपुष्पप्रचायिका ।

४०६. **पर्य्यायार्हर्णेषु च ।**

एषु वर्तमानाद्धातोर्वुञ भवति । अद्य भवतः शायिका, अर्हति भवान् इक्षुभक्षिकाम्, ऋणे पायसभोजिकां मे धारयसि । चकारादुत्पत्तौ च—इक्षुभक्षिका मे उदपादि, न भवति च चिकीर्षा जिहीर्षा मे उपपद्यते । भावमात्रे च दृश्यते—का नाम शायिका अन्येष्वधीयमानेषु, का नाम आसिका अन्येषु गच्छत्स्विति ।

४०७. **प्रश्नाख्यानयोरिञ् च वा ।**

प्रश्ने आख्याने च गम्यमाने धातोरिञ् भवति वुञ् च । वा ग्रहणाद् यथा प्राप्तञ्च । कां त्वं कारिमकार्षी ? कां कारिकां ? कां कृतिं ? कां क्रियां ? कां कृत्यां ? सर्व्वां कारिमकार्षं, सर्व्वां कारिकां, सर्व्वां कृतिं, सर्व्वां क्रियां, सर्व्वां कृत्याम् ।

४०८. **नञ्यन्याक्रोशे ।**

नञ्युपपदे आक्रोशे गम्यमाने धातोरनिर्भवति । अकरणिस्ते वृषल ! भूयात् । एवं अजीवनिः । नञीति किं ? मृतिस्ते वृषल ! भूयात् । सम्पदादिभ्यः क्विप् भावे कारके च, अन्यत्रापिति—बहुलत्वात् स एव—सम्पत्, विपत्, प्रतिपत्, आपत्, सम्पत्तिरित्यपि स्यात् । सम्पदादिराकृतिगणोऽयम् । इक्श्तिपो धातुस्वरूपेऽर्थे ज्ञापकादेव सिद्धाः । अकारः, ककारः—इत्यौणादिकः, कारशब्देन वा समासः, यथा एवंकारः, ओंकारः स्फीत्कारः, स्फुत्कारः सीत्कारः, चीत्कारः, वषट्कारः, स्वाहारः । रेफ इत्यौणादिकः—रादिफः ।

४०९. **कृत्ययुटोऽन्यत्रापि ।**

कृत्या युट् च यस्मिन्नर्थे विहितास्ततोऽन्यत्रापि भवन्ति लक्ष्यतः । स्नानीयं चूर्णं, दानीयो ब्राह्मणः, समावर्त्तनीयो गुरुः, प्रवचनीय उपाध्यायः, करणादिषु भवन्त्यमी । भव्य-गेय-प्रवचनीयोपस्थापनीय—जन्याप्लाव्यापात्याः कर्त्तर्यपि भवन्ति । आङ्पूर्व्वयोः ग्लुङ्पत्योर्ध्यणपि । राजभिर्भुज्यन्ते राजभोजनाः शालयः, एवं राजाच्छादनासि वासांसि । अवसेवनम्, अवसेचनम् । अवश्रवणं, दानं मोचनमेते कर्म्मणि च । प्रस्कन्दनं, प्रपतनम्—इत्यपादाने । अपिशब्दो बहुलार्थं इति—ष्ठिवु-सिव्योर्दीर्घश्च वा—निष्ठीवनं, निष्ठेवनं, निषीवणं, निषेवणम । चकारात् करोतीति कारणम् ।

४१०. **नपुंसके भावे क्तः ।**

भावेऽर्थे नपुंसके क्तो भवति । शयितं, स्थितं, भवता कृतं, प्राप्तमनेनेतिविव-

क्षित कर्मत्वात् । युटा बाधितो नपुंसके क्तो यथा स्यादिति वचनम् । वासरूपत्वाच्चे-त्तर्हि घञादयोऽपि स्युरिति ।

४११. युट् च ।

नपुंसके भावे युट् च भवति । स्थानं गमनम् ।

४१२. करणाधिकरणयोश्च ।

करणे अधिकरणे च युट् भवति । इध्मव्रश्चनं, पलाशशातनम् । अधिकरणे च—गोदोहनी घटी, शक्तु (सक्तु)-धानी स्थाली ।

४१३. पुंसि संज्ञायां घः ।

करणाधिकरणयोः पुंसि संज्ञायां घो भवति । स्वरान्तात्—उरश्छाद्यतेऽनेनेति—उरश्छदः, कुर्वन्त्यनेनेति करः । शृण्वन्त्यनेनेति श्रवः, करणे । अधिकरणे च—नीयन्त्यस्मिन्निति नयः, एवं विनयः । लीयन्त्यस्मिन्निति—लयः एवं निलयः । विषिण्वन्त्यस्मिन्निति विषयः ।

४१४. गोचर-सञ्चर-वह-व्रज-व्यज-क्रमा-पण-निगमाश्च ।

एते घप्रत्ययान्ता निपात्यन्ते । गावश्चरन्ति अस्मिन्—गोचरः, प्रत्यासत्तिरुपलक्ष्यते । एवं सञ्चरः, वहत्यनेनेति—वहो वृषभस्य । व्रजन्ति अस्मिन्—व्रजः, विपूर्वोऽज्—व्यज्यन्त्यनेनेति—व्यजः, क्रामन्त्यनेनेति—क्रमः, आपणायन्तेऽस्मिन्निति आपणः । निगच्छन्त्यनेनेति—निगमः । चकारात् भजन्ति अस्मिन् इति भगः । निकषन्त्यस्मिन्निति—निकषः ।

४१५. अवे तृस्त्रोर्घञ् ।

अव उपपदे तृ—स्तृभ्यां घञ् भवति घापवादः । अवतरन्त्येन अस्मिन्निति वा—अवतारः, अवस्तृणात्यनेन अस्मिन्निति वा—अवस्तारः ।

४१६. व्यञ्जनाच्च ।

व्यञ्जनान्ताच्च धातोर्घापवादो घञ् भवति । लिखन्त्यस्मिन्निति लेखः, विदन्त्यस्मिन्निति वेदः, अपसृजन्त्यनेनेति—अपामार्गः—ह्रस्वस्य दीर्घता, आचरन्त्यस्मिन्निति—आचारः, एवं आचामः । चकारात् अध्यायः, न्यायः, उद्भावः' संहारः, आधारः । आहरन्त्यस्मिन्निति—आहारः, आधाय इति च ।

४१७. उदङ्कोऽनुदके ।

उदञ्चतेर्घञि उदङ्क इति निपात्येत अनुदकविषये । ऊर्द्ध्वमञ्चन्त्यनेनेति—उदङ्कः, घृतोदङ्कः । अनुदक इति किम् ? उदकोदञ्चनः—घे त्वविशेशाद्युट् ।

४१८. जालमानायः ।

आनाय इति निपात्यते जालञ्चेति । आनीयन्तेऽनेनेति —आनायो मत्स्यानाम् । आखन्यतेऽनेनेति आखनः घोऽपि दृश्यते । आखान इति घञपि । आखः—इत्यन्येऽपि चेति डः । करणेऽपि—आखरः, आखनिकः, आखनिकवक इति—डर-इक-इकवका औणादिका इति ।

४१९. ईषद्-दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।

कृच्छ्रं दुःखं दुषोऽर्थः । अकृच्छ्रं सुखमितरयोरर्थः । एषूपपदेषु कृच्छ्राकृच्छ्रार्थेषु धातोः खल् भवति भावे कर्म्मणि च । ईषदनायासेन क्रियते ईषत्करः कटो भवता । दुःखेनायासेन क्रियते—दुष्करः, सुखेनानायासेन क्रियते-सुकरः । कृच्छ्राकृच्छ्रार्थेष्विति किम् ? ईषल्लभ्यं धन-कृपणान्मनागित्यर्थः ।

४२०. कर्तृकर्म्मणोश्च भूकृञोः ।

ईषदादिषु कृच्छ्रार्थेषूपपदेषु कर्त्तृकर्म्मणोश्च भूकृञोः खल भवति यथा संख्यम् । खानुबन्धबलात् कर्त्तृकर्मणिरेवानन्तर्यम् । ईषदाढ्येन भूयते—ईषदाढ्यम्भवं भवता, दुराढ्यम्भवम्, ईषदनायासेनाढ्यं क्रियत इति ईषदाढ्यङ्करो भवान् । यदा तु ईषदाढ्य एव सन् किञ्चित् क्रियते तदा न भवति, करोतेरिहाभूतप्रादुर्भावार्थत्वात् । यथा-संख्यात् ईषदाढ्योऽनुभूयत इत्यत्र न स्यात् ।

४२१. आदभ्यो युवदरिद्रातेः ।

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु आकारान्तेभ्यो युर्भवति अदरिद्रातेः । ईषत्पानः, दुष्पाणः । अदरिद्रातेरिति किम् ? ईषद्दरिद्रः ।

४२२. शासु-युधि-दृशि-धृषि मृषां वा ।

ईषदादिषु उपपदेषु कृच्छ्राकृच्छ्रार्थेषु एषां युर्ववति वा । ईषच्छासनः, ईषच्छासः; दुःशासनः, दुःशासः; सुशासनः, सुशासः; एवम् ईषद्योधनः, ईषद्योधः; दुर्य्योधनः, दुर्य्योधः; सुयोधनः, सुयोधः; ईषद्दर्शनः, ईषद्दर्शः; दुर्दर्शनः, दुर्दर्शः; सुदर्शनः, सुदर्शः; ईषद्धर्षणः, ईषद्धर्षः; दुर्द्धर्षणः, दुर्द्धर्षः; सुधर्षणः, सुधर्षः; ईषन्मर्षणः, ईषन्मर्षः; दुर्म्मर्षणः, दुर्म्मर्षः; सुमर्षणः, सुमर्षः । वाग्रहणात् स्त्र्यधिकारात् पदेषु न वासरूपविधिरिति ।

४२३. इच्छार्थेष्वकर्त्तृकेषु तुम् ।

इच्छार्थेष्वकर्त्तृकेषु धातुषूपपदेषु धातोस्तुमेव भवति, न तु वुण्, वुण्तुमौ क्रियायां क्रियार्थायामिति वचनात् । इच्छति भोक्तुं, कामयते भोक्तुम् । एककर्त्तृके

ष्विति किम् ? भिन्नकर्तृकेविधिर्म्माभूत् —राज्ञो भोजनमिच्छति, इच्छन् करोतीत्यपि स्यात् । इच्छार्थेष्विति किम् ? पाचको व्रजति ।

४२४. काल-समय-वेलाशक्त्यार्थेषु च ।

एषूपोच्चारिपदेषु धातोस्तुमेव भवति । भोक्तुं कालः, कालो भोक्तुं, भोक्तुं समयः, समयो भोक्तुं, भोक्तुं वेला, वेला भोक्तुम् ! शक्तो भोक्तु समर्थो भोक्तुं, पर्याप्तो भोक्तुं, प्रभुर्भोक्तुम्, अलं भोक्तुम् । भवतेर्वं तेर्वा तादर्थस्य प्रतीयमानत्वात् — यथा भोक्तं मनः, गन्तुकामः, श्रोतुं श्रोत्रम्; द्रष्टं चक्षुः, [दृष्टुं चक्षुः], योद्धुं धनुः, वक्तुं [वक्तुं] जड़ः, उच्चारणन्तु वक्तुरायत्तमिति । तथा शक्त्यर्थात्—शक्नोति भोक्तुं, पारयति भोक्तुं, धृष्णोति भोक्तुं, जानाति भोक्तुं, ग्लायति भोक्तुं, घटते भोक्तुं, आरभते भोक्तुम्, आलभते भोक्तुम्, प्रक्रमते भोक्तुं, उत्सहते भोक्तुं, अर्हति भोक्तुं, अस्ति भोक्तुं, विद्यते भोक्तुं । क्रियायां क्रियायार्थायामिति तुम सिद्ध एव, वृणत्यभिधानात् द्रष्टव्यः ।

४२५. अर्हतौ तृच् ।

अर्हत्यर्थविशिष्टाद्धातोस्तृज् भवति । कन्यायाः खलु भवान् वोढ़ा, अध्येता खलु भवान शास्त्रस्य । प्रयोगतश्चेति अर्हे शक्तों च सप्तमी सा बाधिका यथा स्यात् इति वचनं—भवान् खलु कन्यामुद्वहते; अर्हः शक्त इत्यर्थः :

४२६. शकि च कृत्याः ।

शकनं शक्, शक्त्यर्थं विशिष्टाद्धातोरर्हव्यर्थं विशिष्टाच्च भवन्ति । भवता खलु कन्या वोढव्या, वहनीया, वाह्या उह्येतेति च ।

४२७. प्रैष्यातिसर्ग—प्राप्तकालेषु ।

प्रैष्यादिषु गम्यमानेषु धातोः कृत्या भवन्ति । प्रेषितस्त्वं—भवता ग्रामो गन्तव्यः, गमनीयः, गम्यः । अतिसर्गोऽनुमतिः—गुरुणानुज्ञातस्त्वं—भवता कर्त्तव्यः, करणीयः, कृत्यः, कार्य्यः । प्राप्तस्ते कालः कटकरणे— कर्त्तव्यः, करणीयः, कृत्यः कार्य्यः, कटो भवता; ऊर्द्धवं मुहूर्त्तत्वात् कर्त्तव्य इत्यपि वक्तव्यम् । प्रैष्यादिषु पञ्चमी सप्तम्युक्ता सा बाधिका यथा स्यादिति वचनम् ।

४२८. आवश्यकाधमर्णयोर्णिन् ।

अवश्यम्भावे गम्यमाने अधमर्णे च कर्त्तरि धातोर्णिन् भवति । अवश्यंदायी, अवश्यंकारी । अधमर्णे व शतंदायी, सहस्रंदायी मे शतं भवान् ।

४२९. तिक् कृतौ संज्ञायामाशिषि ।

आशीर्विषये संज्ञायां गम्यमानायां धातोस्तिकक्तौ भवतः । तनुतात्-तन्तिः, सनुतात्-सन्तिः, वध्यात्-हन्तिः, देवाय एनं देयात्-देवदत्तः, यज्ञे एनं देयात्-यज्ञदत्तः ।

वीरोऽस्य भूयात्-वीरभूः, मित्रभूः । अग्निरस्य भूयात्-अग्निभूतिः, देवभूतिः, संज्ञाशब्दा एते यथाकथञ्चित् व्युत्पाद्या इति ।

४३०. धातुसम्बन्धे प्रत्ययाः ।

धात्वर्थानां सम्बन्धे विशेषणविशेष्यभावलक्षणे स्वं कालं त्यक्त्वा विशेष्यस्य धात्वर्थस्य काले कृत्संज्ञकाः प्रत्ययाः साधवो भवन्ति, न तु त्यादयः साध्यविहितत्वात् । सूत्रस्त्विदं सुखार्थमेवेति । अग्निष्टोमयाजी पुत्रोऽस्य जनितेति-अग्निष्टोमयाजीति-भूते णिनिः; जनितेत्यनेन सम्बन्धे भविष्यति काले साधुर्भवति । एवं कृतः कटः श्वो भविता, भावि कृत्यमासीत्-भविष्यति विहितो णिनिरतीते सिद्धः । प्रकरणबलात् कृतो लब्धाः, प्रत्ययग्रहणं सामान्यार्थम्—गोमानासीत्, गोमान् भविता—गोमानेति वर्तमाने मन्तुरासीदित्यनेन सम्बन्धे अतीते सिद्धः । भवितेत्यनेन च भविष्यति ।

इति दौर्गसिंह्यां वृत्तौ कृत्सु पञ्चमः पादः समाप्तः ।

षष्ठः पादः (कृत्-प्रकरणम्)

४३१. **अलं खल्वोः प्रतिषेधयोः क्त्वा वा ।**

अलं-खलुशब्दयोः प्रतिषेधार्थयोरुपपदयोर्धातोः क्त्वा भवति वा । अलं कृत्वा, खलु कृत्वा, अलं भोजनेन, खलु भोजनेन । अलं खल्वोरिति किं ? मा कार्षीः । प्रतिषेधार्थयोरिति किम् ? अलङ्कारो निष्कस्य, खलु दानं कन्यायाः—निश्चयेऽत्र खलु शब्दः ।

४३२. **मेङः ।**

मयतेः क्त्वा वा भवति । अपूर्वकालार्थं वक्तव्यम् । अपमाय, अपमित्य, याचते-यपीत्वं नेष्यते । न याचेः क्त्वा अनभिधानाच्च । अपमातुं याचते, यचित्वा अपमयत इति वक्तव्यम् ।

४३३. **एककर्तृकयोः पूर्वकाले ।**

एककर्त्तृकयोर्धात्वर्थयोर्म्मध्ये यः पूर्वक्रियाकालस्तस्मिन् वर्तमानाद्धातोः क्त्वा भवति । शक्ति शक्तिमतोरभेदविवक्षयैककर्त्तृकता । भुक्तत्वा व्रजति । द्विवचनस्या-तन्त्रत्वात् परापेक्षया वा—भुक्तत्वा पीत्वा व्रजति । एककर्त्तृकयोरिति किम् ? भुक्तवति गुरौ शिष्यो व्रजति । पूर्व्वकाल इति किम् ? पचति च पठति च । कथम-क्षिणी निमील्य हसति, मुखं व्यादाय स्वपितीति ? मुहूर्त्तादिकालस्य विवक्षितत्वात् । कथं मृतं दृष्ट्वा दुःखं भवति, प्रियं दृष्ट्वा सुखं स्यात् ? भिन्नकर्तृकत्वाच्चिन्त्यमेतत् ।

४३४. **परावरयोगे च ।**

परस्यावरेण योगेऽवरस्य च परेण योगे सति धातोः क्त्वा भवति । अप्राप्य नदीं पर्वतः, परनदीयोगेनावरदेशस्थः पर्वतो विशिष्यते । अतिक्रम्य पर्वतं नदी, अवरपर्वत-योगेन परदेशस्था नदी विशिष्यते । भवतेः सर्वत्र सम्भवात् सर्वकर्त्तृकता पूर्वकालता च दुःखप्रतिपत्तिगम्येति वचनम् ।

४३५. **णम् चाभीक्ष्ण्ये द्विश्च पदम् ।**

एक कर्त्तृकयोर्धात्वर्थयोः पूर्वकाले वर्तमानाद्धातोर्णम् भवति क्त्वा चाभीक्ष्ण्ये पदञ्च द्विर्भवति । भोजं भोजं व्रजति, भुक्तत्वा, भुक्तत्वा व्रजति । द्विश्च पदमिति सुखार्थमेव –लुनीहि लुनीहीति लोकतो दर्शनात् । यदयं भुंक्ते ततो व्रजति-यच्छन्द प्रयोगे ततः शब्देनैव क्रमस्याभिधानात् क्त्वा न भवति । आभीक्ष्ण्याभावाच्च णम् न

स्यात् । यदयं पुनःपुनर्भुङ्क्ते ततो व्रजति—पुनः पुनः शब्देनाभीक्ष्ण्याभिधानात्, यदयं भुक्त्वा व्रजति ततोऽधीत इति भोजनगमनयोः क्रमेः क्त्वा गमनाध्यययोस्तु क्रमस्य ततः शब्देनाभिधानात् ।

४३६. विभाषाऽग्रे प्रथम-पूर्वेषु ।

एषूपपदेषु विभाषया धातोर्णम् भवति । अग्रे भोजं व्रजति, अग्रे भुक्त्वा व्रजति । प्रथमं भुक्त्वा व्रजति । पूर्वं भुक्त्वा व्रजति । पूर्वं भुङ्क्ते ततो व्रजतीति ततःशब्देन क्रमस्याभिधानात् ।

४३७. कर्मण्याक्रोशे कृञः खमिञ् ।

कर्म्मण्युपपदे कृञः खमिञ् भवति आक्रोशे गम्यमाने । चौरंकारमाक्रोशति, करोतिरिहोच्चारणे, आक्रोशन क्रियैव कर्म्म । आक्रोश इति किम् ? साधु कृत्वा स्तौति । खानुबन्धो मागमार्थः ।

४३८. स्वादौ च ।

स्वाद्वर्थे स्वादुः । तस्मिन्नुपपदे कृञः खमिञ् भवति । स्वादुङ्कारं भुङ्क्ते, लवणङ्कारं भुङ्क्ते, सम्पन्नकारं भुङ्क्ते, । स्वादारिति किं ? रूपमिदमदीर्घंवततां गमयति, तेन स्वादूकृत्य स्वादीं कृत्वा यवागूं भुङ्क्ते ।

४३९. अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत् ।

एषूपपदेषु कृञः खमिञ् भवति सिद्धाप्रयोगश्चेत् करोतिर्वर्त्तते । यस्मादन्यथादयः शब्दाः प्रकारमाचक्षते, उक्तार्थेऽपि प्रयोगाविर्भावाय करोतिः प्रयुज्यते । अन्यथाकारं भुङ्क्ते, एवङ्कारं भुङ्क्ते, कथंकारं भुङ्क्ते, इत्थंकारं भुङ्क्ते । सिद्धाप्रयोगश्चेति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ।

४४०. यथातथयोरसूया-प्रतिवचने ।

ओस्येत्वं सूत्रत्वात् । असूया-अक्षमा, तदर्थं प्रतिवचम् । यथातथयोरुपपदयोः कृञः खमिञ् भवति असूयाप्रतिवचने गम्यमाने सिद्धाप्रयोगश्चेत् करोतिर्भवति । यथाकारमहं भोक्ष्ये. तथाकारमहं भोक्ष्ये किन्त्वाने न ? असूयाप्रतिवचन इति किं ? यथा कृत्वा अहं भोक्ष्ये तथा त्वं द्रक्ष्यसि । सिद्धाप्रयोग इति किं ? यथा कृत्वा शिरो भोक्ष्ये किन्त्वानेन ।

४४१. दृशो णम् साकल्ये ।

साकल्यविशिष्टे कर्म्मण्युपपदे दृशो णम् भवति । कन्यादर्शं वरयति—यां यां पश्यति, तां तां सर्व्वा वरयतीत्यर्थः । विदेर्वक्तव्यम्—ब्राह्मणवेदं भोजयति—यं यं

ब्राह्मणं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । साकल्य इति किं ? कञ्चिद् ब्राह्मणं दृष्ट्वा भोजयति ।

४४२. **यावति-विन्दु जीवोः ।**

यावदित्यनिर्दिष्टार्थवाची । यावदित्युपपदे विन्दतेर्जीवतेश्च णम् भवति । यावदवेदं भुङ्क्ते—यावद् यावन्तं वा लभते तावत्तावन्तं भुक्ते इत्यर्थः, यावज्जीवमधीते—यावज्जीवति तावदधीत इत्यर्थः ।

४४३. **चर्म्मोदरयोः पूरेः ।**

पूरिरिनन्तः सकर्म्मकः । चर्म्मोदरयोः कर्म्मणोरुपपदयोः पूरयतेर्णम्भवति । चर्म्मपूरं ददाति, उदरपूरं भुङ्क्ते ।

४४४. **वर्षप्रमाणे ऊलोपश्च वा ।**

कर्म्मण्युपपदे वर्षप्रमाणे गम्यमाने पूरयतेर्णम् भवति पूरयतेरूलोपश्च वा भवति । गोष्पदपूरं वृष्टो देवः, गोष्पदप्रं वृष्टो देवः ।

४४५. **चेलार्थे क्नोपे ।**

चेलार्थे कर्मण्युपपदे क्नोपयतेर्णम् भवति वर्षप्रमाणे गम्यमाने । चेलक्नोपं वृष्टो देवः, वस्त्रक्नोपं वृष्टो देवः, वसनक्नोपं वृष्टो देवः ।

४४३. **निमूल-समूलयोः कषः ।**

निमूलसमूलयोः कर्म्मणोरूपपदयोः कषतेर्णम् भवति । निमूलकाषं कषति, समूलकाषं कषति—निमूलं समूलं कषतीत्यर्थः ।

४४७. **शुष्क-चूर्ण-रुक्षेषु पिषः ।**

एषु कर्म्मसूपपदेषु पिषतेर्णम् भवति । शुष्कपेषं पिनष्टि, एवं चूर्णपेषं पिनष्टि, रुक्षपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः ।

४४८. **जीवे गृहेः ।**

जीवे कर्मण्युपपदे ग्रहेर्णम् भवति । जीवग्राहं गृह्णाति—जीवं गृह्णातीत्यर्थः ।

४४९. **अकृते कृञः ।**

अकृते कर्मण्युपपदे कृञो णम् भवति । अकृतकारं करोति—अकृतं करोतीत्यर्थः ।

४५०. **समूले हन्तेः ।**

समूले कर्मण्युपपदे हन्तेर्णम् भवति । समूलघातं हन्ति-समूलं हन्तीत्यर्थः ।

४५०. **करणे ।**

करणवाचिन्युपपदे हन्तेर्णम् भवति । पादघातं भूमिं हन्ति पादेन हन्तीत्यर्थः ।

मुष्टिघातं चौरं हन्ति - मुष्टया हन्तीत्यर्थः। परमपि हिंसार्थाच्चैककर्मकादिति वचनं बाधते करणस्य व्यक्तित्वात्।

४५२. हस्तार्थे ग्रह-वर्त्ति-वृताम्।

हस्तार्थे करणवाचिन्युपपदे एषां णम् भवति। हस्तिग्राहं गृह्णाति—हस्तेन गृह्णातीत्यर्थः। एवं करग्राहं गृह्णाति। हस्तेन वर्त्तयति·—हस्तवर्त्तं वर्तयति। हस्तेन वर्त्तते —हस्तवर्त्तं वर्त्तते।

४५३. स्वार्थे पुषः।

स्वान्यात्मात्माय-ज्ञाति-वित्तानि। स्वार्थाभिधेयेषु करणेषूपपदेषु पुषो णम् भवति। स्वेन पोषयति, पुष्यति, पुष्णाति वा—स्वपोषं पोषति, एवमात्मपोषम्, आत्मीयपोषं, गोपोषं, महिषीपोषं, पितृपोषं, मातृपोषं, वित्तपोषं, रैंपोषम्।

४५४. स्नेहने पिषः।

स्निह्यते सिच्यनेऽनेनेति स्नेहनमुदकादि, स्नेहन– वाचिनि करणे उपपदे पिषो णम् भवति। उदकेन पिनष्टि—उदपेषं पिनष्टि। एवं तैलपेषं, घृतपेषं। उदकस्योदः पेष –वासवाहनादिषु निपात्यते।

४५५. बन्धोऽधिकरणे च।

अधिकरण उपपदे बध्नातेर्णम् भवति। चक्रे बन्धः·– चक्रबन्धं बन्धः, गुप्तिबन्धः, हस्तबन्धं बन्धः।

४५६. संज्ञायाञ्च।

अधिकरणेऽनधिकरणे च नाम्न्युपपदे वध्नातेर्णम् भवति संज्ञायां गम्यमानायां। क्रौञ्चे क्रौञ्चेन वा बन्धः—क्रौञ्चबन्धं बन्धः एव मयूरिकाबन्धः, अट्टालिकाबन्धं बन्धः। बन्धविशेषाणामियं संज्ञा।

४५७. कर्त्रोर्जीवपुरुषयोर्नशिवहिभ्याम्।

जीवपुरुषयोः कर्त्रोरुपपदयोर्नशि-वहिभ्यां णम् भवति यथासंख्यम्। जीवनाशं नष्टः—जीवो नष्ट इत्यर्थः, पुरुषवाहं वहति—पुरुषो वहतीत्यर्थः। कर्त्रोरिति किं? जीवने नष्टः, पुरुषेनोढः।

४५८. ऊर्ध्वे-शुषि-पूरोः।

ऊर्दध्वे कर्त्तृवाचिन्युपपदे शुषेः पूरेश्च णम् भवति। ऊर्ध्वशोषं शुष्कः, ऊर्द्ध्वपूरं पूर्णः। ऊर्द्ध्व सन् शुष्क इत्यर्थः। अन्यथाकारं भुङ्क्ते इत्यादिषु किमर्थं णमो विधानं? व्याप्यत्वात् द्वितीया भविष्यति, यथा ओदनपाकं शेते। ग्रहेर्नघञिति कर्त्तव्यमेव। गोष्पदं प्रातीति गोष्पदप्रमिति क्रियाविशेषणत्वात्, तदयुक्तं तरांतमा-

ञ्चेष्यते अव्ययत्वात्, पूर्वकालोऽपि यथा विधानं प्रतिपाद्य एव। तथा च—विकल्पाधिकारे क्त्वापि दृश्यते, अन्यथाकारं भुज्यते ओदन इति द्वितीया स स्यादुक्तार्थत्वात्, यथा ओदनः पक्त्वा भुज्यते इति कृदव्ययो हि भावेऽभिधानात्, प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते।

४५९. **कर्म्मणि चोपमाने।**

कर्त्तरि कर्म्मणि चोपमानवाचिन्युपपदे धातोर्णम् भवति। चूड़क इव नष्टः चूड़कनाशं नष्टः। कर्म्मणि च सुवर्णमिव निहितं सुवर्णनिधायं निहितम्, एवम् ओदनपाचं पक्वः उपमान इति किं ? चूड़को नष्टः, सुवर्णं निहितम्।

४६०. **कषादिषु तैरेवानुप्रयोगः।**

कषादिषु णमो विषयभूतेषु तैरेव कषादिभिरनुप्रयोगः कर्त्तव्यो नान्यैरिति, अनुप्रयोगश्च पूर्व्वकालतामभिदधात्येव। निमूलकाषं कषति—निमूलं कषतीत्यर्थः। कषादिष्विति कि ? चेलक्नोपं वृष्टोदेवः।

४६१. **तृतीयायामुपदंशे।**

तृतीयान्त उपपदे उपपूर्वाद्दन्शेर्णम् भवति। मूलकेनोपदंशं भुङ्क्ते, मूलकोपदंशं भुङ्क्ते। मूलकादिकरणतया भुजिना युक्तमपि उपदंशिना व्याप्तमित्युपपदं स्यात्। वाधिकारात् मूलकेनोपदश्य भुङ्क्ते।

४६२. **हिंसार्थाच्चैककर्मकात्।**

तृतीयान्त उपपदे हिंसार्थाद्धातोरनु प्रयोगेण समान—कर्म्मकात् णम् भवति। दण्डेनोपघातं, दण्डोपघातं गाश्चालयति। एककर्म्मकादिति किं ? दण्डेनाहत्य भूमिं गोपालको गां सादयति।

४६३. **सप्तम्याञ्च प्रमाणासत्त्योः।**

तृतीयान्ते सप्तम्यन्ते चोपपदे धातोर्णम् भवति प्रमाणविषये आसत्तौ च। सम्बन्धविवक्षायां न यथासंख्यम्। द्व्यङ्गुलेनोत्कर्षं, द्व्यङ्गुल उत्कर्षं, द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति। केशैग्राहं, केशेषु ग्राहं, केषग्राहं युध्यन्ते।

४६४. **उपपीड़-रुध-कर्षश्च।**

तृतीयान्ते सप्तम्यन्ते चोपपदे धातोर्णम् भवति। पार्श्वाभ्यामुपपीड़ं पार्श्वयोरुपपीड़ं, पार्श्वोपपीड़ं शेते, व्रजेनोपरोधं व्रजनुपरोधं व्रजोपरोधं गाः सादयति, पाणिनोरपकर्षं पाणावुपकर्षं, पाण्युपकर्षं धाना भक्षयति।

४६५. **अपादाने परीप्सायाम्।**

परि समन्तादाप्तुमिच्छा परीच्छा त्वरेत्यर्थः। अपादाने उपपदे धातोर्णम् भवति

परीप्सायां गम्यमानायाम्। शय्याया उत्थायं शय्योत्थायं धावति, रन्ध्रादपकषं पयः पिबति। परीप्सायामिति किम्? समन्तादुत्थाय गच्छति।

४६६. **द्वितीयायाञ्च।**

द्वितीयान्ते चोपपदे धातोर्णम् भवति परीप्सायां गम्यमानायाम् लोष्ट्रानि ग्राहं लोष्टग्राहं युद्ध्यन्ते—एवं नाम त्वरवन्ते, यदायुधमपि नाद्रियन्ते।

४६७. **स्वाङ्गेऽध्रुवे।**

स्वमङ्गं स्वाङ्गम्। स्वाङ्गसंज्ञकेऽध्रुवे द्वितीयान्ते चोपपदे धातोर्णम् भवति। भ्रुवौ विक्षेप भ्रूविक्षेपं जल्पति, अक्षिणी काणम् अक्षिकाणं हसति। अध्रुव इति किम्? उत्क्षिप्य शिरः कथयति, यस्मिन्नङ्गे छिन्ने प्राणी न म्रियते।

४६८. **परिक्लिश्यमाने च।**

परि समन्तात् क्लिश्यमाने स्वाङ्गे च द्वितीयान्ते उत्पदे धातोर्णम् भवति। उरांसि प्रतिपेषम्, उरः प्रतिपेषं युध्यन्ते—कृत्स्नमुरः पीडयित्वा युध्यन्त इत्यर्थः।

४६९. **विशि-पति-पदि-स्कन्दां व्याप्यमाना सेव्यमानयोः।**

व्याप्यमाने आसेव्यमाने च द्वितीयान्ते उपपदे एभ्य धातुभ्यो णम् भवति। श्रुतत्वाद्विश्यादिक्रियाभिः साकल्येन द्रव्याणामेव सम्बन्धः व्याप्तिर्वीप्सा, अतो द्रव्यस्यैव द्विर्वचनम्। आसेवा तात्पर्यम्, आभीक्ष्ण्यं तच्च क्रियाया एवेति विश्वादीनां णमन्तानां द्विर्वचनं भवति। गेहं गेहमनुप्रवेशमास्ते, गेहमनुप्रवेशमनुप्रवेशमास्ते, गेहं गेहमनु प्रपातमास्ते, गेहमनुप्रपादमनुप्रपादमास्ते, गेहंमन्वस्कन्दमन्वस्कन्दमास्ते। समास एव वीप्साभीक्ष्ण्यार्थमभिधत्ते शब्दशक्तित्वात्—गेहानुप्रवेशं गेहानुप्रपातं गेहानुप्रपादं गेहानुस्कन्दमास्त इति। व्याप्यमानासेव्यमानयोरिति किं? गेहमनुप्रविश्य भुङ्क्ते। आभीक्ष्ण्ये णम् सिद्धः, उपपदसमास विभाषार्थमिदम्।

४७०. **तृष्यस्वोः क्रियान्तरे कालेषु।**

कालेषु द्वितीयान्ते षूपपदेषु क्रियान्तरे गम्यमाने तृष्यस्वोर्णम् भवति। द्व्यहंतर्षं द्व्यहतर्षं गाः पाययति। द्व्यहमभ्यासम् द्व्यहाभ्यासं गाः पाययति। अद्य यत्पपानं यच्च द्व्यहेऽतीते भविष्यति, तन्मध्यवर्त्तिना वर्णनेभ्यसनेन च गवां पानक्रियां व्यवधीयते। तृष्यस्वोरिति किं? द्व्यहमुपोष्य भुङ्क्ते क्रियान्तर इति किम्? अहरभ्यस्य इषून् गतः—अभ्यसनेन इषवः कालाश्च व्याप्यन्ते न गतिर्व्यवधीयते। कालेष्विति किं? योजनस्या गाः पाययति। क्रियाग्रहणं सुखार्थम्।

४७१. **नाम्न्यादिशि-ग्रहो।**

नाम्नि स्वरूपे द्वितीयान्ते उपपदे आदिशग्रहेश्च णम् भवति। नाम्न्यादेशं नामादेशं ददाति। नामानि ग्राहं नामग्रहमाह्वयति।

४७२. **कृञोऽव्ययेऽयथेष्टाख्याने क्त्वा च।**

यथेष्टमिति वीप्सायामव्ययीभावः। अव्यये उपपदे कृञो णम् भवति क्त्वा च अयथाख्याने गम्यमाने। ब्राह्मण। पुत्रस्ते जातः, नीचैः कारं, नीचैः कृत्य, नीचैः कृत्वाचष्टे, उच्चैर्न्नाम प्रियमाख्येयम्। ब्राह्मण! कन्या ते गर्भिणी, किन्तर्हि वृषली उच्चैः कारं, उच्चैः कृत्य, उच्चैः कृत्वाचष्टे, नीचैर्नाभप्रियमाख्येयम्। अयथेष्टाख्यान इति किम्? ब्राह्मण। पुत्रस्ते जातः, उच्चैः कृत्वाचष्टे। समासविकल्पार्थं क्त्वा ग्रहणम्।

४७३. **तिर्यच्यपवर्गे।**

तिर्यक् शब्द उपपदे कृञो णम् भवति क्त्वा चापवर्गे गम्यमाने। तिर्यक्कारं, तिर्य्यक्कृत्य, तिर्यक्कृत्वा गतः—समाप्य गत इत्यर्थः। अपवर्ग इति किम्? तिर्यक्कृत्वा काष्ठं गतः।

४७४. **स्वाङ्गे तसि।**

स्वाङ्गसंज्ञके तस्प्रत्ययान्ते उपपदे कृञो णम् भवति क्त्वा च। मुखतः कारं मुखतः कृत्य मुखतः कृत्वा अस्ति। स्वाङ्ग इति किं? सर्वतः कृत्वा आस्ते। अव्ययाधिकारात् मुखे तस्यास्तीति मुखतः कृत्वा गतः।

४७५. **भुवस्तूष्णीमि च।**

स्वाङ्ग संज्ञके तस् प्रत्ययान्ते तूष्णीम् शब्दे चोपपदे भुवो णम् भवति क्त्वा च। मुखतोभावं, मुखतोभूय, मुखतोभूत्वा आस्ते, तूष्णीम्भावं तूष्णीम्भूय, तूष्णीम्भूत्वा आस्ते। कथं नानाकारं, नानाकृत्य नानाकृत्वा भुङ्क्ते, विनाकारं, विनाकृत्य, विनाकृत्वा गत इति? क्रियाविशेषणमेव नाम्नां युक्तार्थत्वात् समासोऽपि सिद्धः एव, नानाकृत्वा काष्ठानि गत इति सापेक्षत्वान्न समासः। एवं नानाभावं, नानाभूय, नानाभूत्वा गत इति, तथा अन्वग्भावम् अन्वग्भूय, अन्वग्भूत्वा गत इति, अनुकूल्ये एव समासाभिधानं तेनान्वग्भूत्वा तिष्ठेति शङ्कः।

४७६. **कर्त्तरि कृतः।**

कर्त्तरि कारके कृत्संज्ञकाः प्रत्ययाः वेदितव्याः। करोतीति—कर्त्ता, कारकः, पचः, नन्दनः। निराकांक्षेषु वाक्येषु परिभाषेयं, शेषभूता, ल्युटः करणेऽनाघ्रातत्वात् न पाक्षिकी प्रवृत्तिः।

४७७. **भाव-कर्म्मणोः कृत्य-क्त-खलार्थाः।**

पूर्वस्यापवादोऽयम्। भावे कर्म्मणि च कृत्य क्त—खलर्थाश्च वेदितव्याः। शयितव्यं भवता, भोक्तव्य ओदनो भवता। आसितं भवता, कृतः कटो भवता, ईषत् पानः सोमो भवता। अर्थादकर्मकेभ्यो भावे सकर्म्मकेभ्यः कर्म्मणीति।

४७८. **आदिकर्म्मणि क्तः कर्त्तरि च ।**

आदि क्रियायां य क्तो विहितः स कर्त्तारि वेदितव्यः । चकारात् यथा-प्राप्तञ्च । प्रकृतः कटं भवान्, प्रकृतः कटो भवता । प्रसुप्तो भवान्, प्रसुप्तं भवता, प्रशब्द आदिक्रियाद्योतकः । बहूनां क्रियाक्षणानामादिक्रिया—क्षणोऽस्तीते इति भविष्यति कट कटशब्दस्तादर्थ्यात् ।

४७९. **गत्यर्था-कर्म्मक-श्लिष-शीङ्-स्था-स-वस-जन-रुह-जीर्यतिभ्यश्च ।**

गत्यर्थेभ्योऽकर्म्मकेभ्यः श्लिषादिभ्यश्च कर्त्तरि क्तो भवति यथा प्राप्तञ्च । गतो ग्रामं भवान्, गतो ग्रामो भवता, प्राप्ता ग्रामं भवान्, प्राप्तो ग्रामो भवता, गत-मनेन, प्राप्तमनेन । अकर्मकेभ्यः—शयितो भवान्, शयितं भवता । श्लिषादयः सोपसर्गाः, श्लिष आलिङ्गनार्थ—अश्लिष्टो गुरुं भवान्, अश्लिष्टो गुरुर्भवता, अधिशयितः खटां (खट्वां) भवान्, अधिशयिता खटा (खट्वा) भवता, उपस्थितो गुरुं भवान्, उपस्थितो गुरुर्भवता, उपासितो गुरुं भवान्, उपासितो गुरुर्भवता, वस निवासार्थः—अनूषितो गुरुं भवान्, अनूषितो गुरुर्भवता, अनुजातो माणवको माणविकाम्, अनुजाता माणवका माणवकेन, आरुढ़ो वृक्षं भवान्, आरुढ़ो वृक्षो भवता, अनुजीर्णो वृषलीं भवान्, अनुजीर्णा वृषली भवता ।

४८०. **दाशगोघ्नौ सम्प्रदाने ।**

एतौ निपात्येते सम्प्रदानेऽर्थे । दाशृ दाने, दाशते यस्मै स दाशः, गां हन्ति यस्मै आगतायातिथये—स गोघ्नोऽतिथिः, निपातनादच्-टकौ, अर्घार्हा ऋत्विगादय एव, तद् योग्यतयाप्युच्यन्ते ।

४८१. **भीमादयोऽपादाने ।**

एते निपात्यन्तेऽपादाने । बिभेत्यस्मादिति—भीमः, भीष्मः । चरुः, प्रस्कन्दनः, प्रपतनः, समुद्रः, स्रुवः—एत औणादिका यथाकथञ्चिद् व्युत्पाद्याः ।

४८२. **भाम्याामन्यत्रोणादयः ।**

भाम्यां सम्प्रदानापादानाभ्यामन्यत्र कारके उणादयो भवन्ति । कृत्वादुणादय कर्त्तरि प्राप्ताः कर्म्मादिष्वपि कथ्यन्ते । करोतीति—कारुः, वातीति वायुः, कृत्यत इति कृषिः, तन्यत इति-तन्तुः ।

४८३. **क्तोऽधिकरणे ध्रौव्य-गति-प्रत्यवसानार्थेभ्यः ।**

ध्रुवो निश्चलः स च क्रियाविशेषणं, तस्य भावो ध्रौव्यम्, अचलात्मक क्रियात्मकत्वात् ध्रौव्यार्था अकर्म्मका उच्यते । प्रत्यवसानं भोजनं । ध्रौव्यार्थेभ्यो गत्यर्थेभ्यः प्रत्यवसानार्थेभ्यश्चाधिकरणे क्तो वेदितव्यः यथाप्राप्तञ्च । इदमेषामासितम्,

आसितमेभिः, आसितो भवान्, इदमेषां यातम्, इह तैर्यातम्, ग्रामस्तैर्यातः, ग्रामन्ते याताः। अधिकरणं कर्म्म कर्त्ता च यथासम्भवं क्तेनोक्तमिति लिङ्गार्थमात्रे प्रथमैव। इदमेषां भुक्तं, पीतम्, इह तैर्भुक्त ओदनः, पीतं पयः। भोजनार्थात् कर्त्तर्य्यपि स्यादिति व्यवहितः पाठः। कथं भुक्ता विप्राः प्रीता गाव इति। अन्यत्रापि चेति वचनात् तद् योगात् अर्शादित्वाद् वा। देवश्चेद् वृष्टः, सम्पन्नाः शालयः इति शालि-हेतवः सम्पन्ना इत्यतीतता।

४८४. युवुझामनाकान्ताः।

एषां स्थाने अन अक अन्त इत्येते आदेशा भवन्ति यथासंख्यम्। नन्दनः, पाचकः, गण्डयन्तः, मण्डयन्तः—गण्डि-मण्डि-जि-नन्दिभ्यो झ वा। कथं भुज्यः, मृत्युः? भुजिमृङ्भ्यां युक्त्युकौ औणादिकस्य बहुलत्वात्, कृदधिकाराच्च। ऊर्णाः सन्त्यस्य ऊर्णायुः।

४८५. समासे भाविन्यनञः क्त्वो यप्।

नञोऽन्यस्याव्ययस्य क्त्वान्तेनैव समासे भाविनी क्त्वा प्रत्ययस्य यपादेशो भवति। प्रणम्य, आपृच्छ्य, प्रदीव्य, उपेत्य, अधीत्य। भाविग्रहणमुपदेशयवर्थं, तेन पञ्चमोपधा प्रभृतीनां दीर्घादयो न स्युः, तोऽन्तश्च स्यात्। खाट्कृत्य, कन्याम् अलंकृत्य, सत्कृत्य, असत्कृत्य, अन्तर्हत्य, कणेहत्य, मनोहत्य। पयः पिबति—यावत्, पिबति तावत् तृप्त [तावत् पिबति यावत् तृप्त] इत्यर्थः। पुरस्कृत्य, अस्तंकृत्य, अच्छगत्य, अच्छव्रज्य, अच्छोद्य, अदः कृत्य, चिन्तयति, तिरोभूय, तिरस्कृत्य, उपाजेकृत्य, अन्वाजेकृत्य, साक्षात्कृत्य, मध्येकृत्य, पदेकृत्यः निवचनेकृत्य उरसिकृत्य, मनसिकृत्य, हस्तेकृत्य, पाणौकृत्य, प्राध्वंकृत्य, उपनिषत्कृत्य, जीविकाकृत्य। अनुकरणञ्च कृता भूषणादरनादरेष्वलंसदसत्। अग्रहणेऽन्तस्तृप्तौ, च कणेमनसी पुरोऽस्तञ्च॥

अच्छ च गत्यर्थवदितिरनुपदेशोऽदस्तिरोऽन्तर्द्धौ।
सतिर उपाजेऽन्वाजे साक्षात्प्रभृतीनि च कृञा वा॥
मध्ये पदे निवचने, अनत्याधान उरसि मनसि।
नित्यं हस्ते पाणावुद्वाहे बन्धने प्राध्वम्॥
उपनिषदौपम्ये जीविका च पूर्वे समस्ताश्च।

समास इति किम्? तिरः कृत्वा, उपाजे कृत्वा। अनञ इति किम्? अकृत्वा, पर्य्युदासोऽयम्, तेन ससंख्यान्न स्यात्—परमकृत्वा।

४८६. चजोः कगौ घुड् घानुबन्धयोः।

चजोः कगौ भवतः धुटि घानुबन्धे च प्रत्यये परे। निमित्तेन तु सम्बन्धस्या-

विवक्षितत्वात् न यथासंख्यम् पक्ता, भोक्ता, पाकः, भोगः, मुग्नः, रुग्णः इति नित्यमपि पात्वं बाधित्वा अन्तरङ्गत्वात् चवर्गस्य किरस्ति । अघानुबन्धे कृति व्यावृतिः स्यादिति धुड्ग्रहणम् ।

४८७. **न्यङ्क्वादीनां हश्च घः ।**

न्यङ्कु इत्येवमादीनां चजोः कगौ भवतः दृश्च घो भवति । नावञ्चेरुः— न्यङ्कु । भृ मृ-नृ-चरि-त्सरि-तनि-मस्जि-शीङ्भ्य उः—मद्गुः । प्रथि-म्रथि भ्रस्जां सम्प्रसारणं सलोपश्च—भृगुः । स्फायी-तन्चि-वन्चीत्यादीनां रक्-तक्रम्, वक्रम् । असुन् उच्यतेऽस्मिन्निति—ओकः । श्यतिषङ्ग, अवसर्गः—सञ्जेः सृजेश्च पचाद्यच् । श्वपाकः, मांसपाकः, कपोतपाकः, उलूकपाकः कर्मण्यण्, दूरे पच्यते स्वयमेव, फले पच्यते स्वयमेव—दूरेपाकः, फलेपाकः—पचाद्यच्, गणनिपातनादुपधाया दीर्घत्वं सप्तम्याश्चालुक् क्षणेपाक इति केचित् फलेपाकः । मेहतीत्यच्—मेघो जलद एव । अवदाघः निदाघः, अर्हते अर्घं - घञि संज्ञायाम्; अन्यत्र अवदाहः, निदाहः, अर्हः ।

४८८. **न कवर्गादि व्रज्यजाम् ।**

कवर्गादिव्रजेरजेश्च चजोः कगौ न भवतः । कूजः, खर्जः, गर्जः, प्रवाजः, आज्यं घृतम्, वञ्चेर्गताविति वक्तव्यम्,—वञ्च्यत इति वञ्च्यं गता वणिजः— गन्तव्यं गता इत्यर्थः । गताविति किम् ? वङ्क्यं काष्ठ—वञ्चिरत्र कौटिल्य ।

४८९. **घ्यण्यावश्यके ।**

अवश्यम्भावे गम्यमाने घ्यणि चजोः कगौ न भवतः । अवश्यपाच्यम्, अवश्य-भाज्यम् । आवश्यक इति किम् ? पाक्य आदेनः ।

४९०. **प्रवचर्चि रुचि-याचि-त्यजाम् ।**

अनावश्यकार्थवचनम्, एषां चजोः कगौ न भवतः घ्यणि परे । प्रवाच्यः पाठविशेषः— तद्वान् ग्रन्थोऽप्युच्यते इति शब्दविषयता । ऋच-स्तुतौ-अर्च्यः । रोच्यः, याच्यः, त्याज्यः ।, कथं शोच्यः ? हेत्विनन्तात् यः ।

४९१. **वचोऽशब्दे ।**

वचेर्घ्यणि को न भवति अशब्दविषये । वाच्यम्, अशब्द इति किम् ? वाक्यं पदसमुदायः । वक्त्रवाक्यरचनः-रमणीय इत्यपि स्यात् ।

४९२. **निप्राभ्यां युजः शक्ये ।**

निप्राभ्यां परस्य युजेः शक्येऽर्थे घ्यणि को न भवति । नियोक्तुं शक्यः— नियोज्यो भृत्यः । एवं प्रयोज्यो भृत्यः । शक्य इति किम् ? नियोक्तुमर्हति—नियोग्यः, प्रयोग्यः प्रभुः ।

४९३. भुजोऽन्ने ।

भुजो भक्ष्यार्थे घ्यणि गो न भवति भोज्यमन्नम् । भोज्यं पयः । अन्न इति किम् ? भोग्या भूः, भोग्यः कम्बलः ।

४९४. भुजन्युब्जौ पाणिरोगयोः ।

भुज-न्युब्जौ घञन्तौ पाणिरोगयोर्यथासंख्यं निपात्येते । भुज्यतेऽनेनेति-भुजः पाणिः, न्युब्जितः, शेतेऽस्मिन्निति न्युब्जः । रोगविशेषे—व्यञ्जनाच्चेति घञ् । पाणीरोगयोरिति किम् ? भोगः न्युद्गः गत्वे दोपध इष्यते ।

४९५. दृग-दृश-दृक्षेषु समानस्य ।

समानस्य दृगादिषु सो भवति, वचनात् क्विप्टक्-सकश्च । सदृक्, सदृशः, सदृक्षः । योगविभागात् शब्दादिषु च,—सपक्षः, सज्योतिः—यथेष्टं समासः । पक्षेज्योतिर्जनपद-रात्रि-नाभि बन्धु-तीर्थ-पत्न्यः शब्दादयः । रूपादौ वा—सरूपः, समानरूपः । रूपनामगोत्रस्थानवर्णवचन-वयो-धर्म्म-जातियोदरोदर्य रूपादि । सब्रह्मचारीति नित्यम् ।

४९६. इदमी ।

इदमीर्भवति दृगादिषु । ईदृक्, ईदृशः ईदृक्षः, अभेदबलाद् सर्वस्य ।

४९७. किम् की ।

किम् दृगादिषु कीर्भवति । कीदृक्, कीदृशः, कीदृक्षः । इदं किं ? परिमाणमस्य-इयान्-कियान्-डियन्तु सद्य आद्यत्वात् ।

४९८. अदोऽमूः ।

अदसोऽमूर्भवति दृगादिषु । अमूदृक्, अमूदृशः, अमूदृक्ष । केचिन् अमूकादृक्, अमूकादृशः, अमूकादृक्षः, इति—तदा यत्न एव ।

४९९. आसर्वनाम्नः ।

सर्वनाम्नो दृगादिष्वा भवति । तादृक्, तादृशः, तादृक्षः, भवादृगिति—अन्तरङ्गत्वात् न लोपः । अन्यादृगिति—मा सर्वनाम्न इति वचनादन्यशब्दादपि दृशः क्विप्-टक्-सकः । यत्तदेतत् परिमाणमस्य—यावान् तावान् एतावानिति सद्य आद्यत्वात् परिमाणे वन्तुरात्वञ्चेति ।

५००. विश्वग्देवयोश्चान्त्यस्वरादेरद्र्यञ्चतौ क्वौ ।

विश्वग्देवयोः सर्वनाम्यश्चान्त्यस्वरादेरवयवस्य अञ्चतौ क्विन्ते परेऽद्रिरादेशो भवति । विष्वगञ्चतीति-विष्वद्र्यङ्, देवद्र्यङ् सर्व्वद्र्यङ्, यद्र्यङ्, तद्र्यङ्, अद्र्यङ् अमुद्र्यङ् ।

५०१. सह-स-स्तिरसां सध्रि-समि-तिरयः ।

एषां सध्रि-समि-तिरित्येते आदेशा भवन्ति यथासंख्यम् अञ्चतौ क्विबन्ते परे । सहाञ्चतीति-सध्र्यङ्, समञ्चतीति—सम्यङ्, तिरोऽञ्चतीति—तिर्य्यङ् ।

५०२. रुहेर्घो वा ।

रुहेर्हकारस्य धकारो भवति वा क्वौ परे । विरोहतीति—वीरुत्, वीरुधौ, वीरुधः । वीरुट्, वीरुहौ, वीरुहः—नेर्ह्रस्वस्य दीर्घता । व्यवस्थितविभाषया विपूर्वस्यैव, तेन-भूरुट्, भूरुहौ, भूरुहः ।

५०३. मो नो धातोः

धातोर्मकारस्य नकारो भवति क्वौ परे । शमु-प्रशान्, तमु-प्रतान् । नोदन्त इत्यस्य च लोपः, क्वौ स्थानिवद्भावाल्लिङ्गान्तनकारस्य लोपो न भवति । धातुग्रहणं वानिवृत्त्यर्थम् ।

५०४. वमोश्च ।

वमो परयोर्धातोर्मकारस्य नो भवति । जगन्वान् । गन्मा—सर्वधातुभ्यो मन् ।

५०५. स्वरे धातुरनात् ।

नकारान्तः स्वरे परे धातुरेव भवति । अनात्, आकारो न निवर्त्तत इत्यर्थः । प्रशामौ, प्रतामौ, जग्मुषः, जग्मुषा । तदाश्रित एव स्वरे । तेन—प्रशान् अत्रेति । स्वर इति किं ? प्रशान्भ्याम् । ये चेष्यते—प्रशाममिच्छति—प्रशाम्यति, प्रशामे हितं—प्रशाम्यम् ।

५०६. अत्तीण्-घसैकस्वरातामिड्वन्सो ।

अत्तीण्घसैकस्वरादन्तानामेव वन्साविड्भवत्यादिः । स्रादिनियमेन परोक्षावद् भावादिट् सिद्धो नियम्यते । आरिवान्, ईयिवान् लक्षिवान्, आदिवान्, पेचिवान्, ददिवान्, पपिवान्, दरिदाञ्चकृवान्, इत्यामा भाव्यम् । अत्तयादि ग्रहणादेव वन्सौ द्विर्वचने सति । एकस्वरा ग्रहीतव्या नैकत्वं वचनादिणः । एषामिति किम् ? बभज्वान्, जजागर्व्वान् ।

५०७. गम-हन-विद-विश-दृशां वा ।

अप्राप्ते विभाषेयम् । एषां वन्साविड् भवति वा । जग्मिवान्, जगन्वान्, जघ्निवान्, जघन्वान्, विविद्वान्—वहुभिः सविकरणै साहचर्यात् लाभार्थस्य विदेर्ग्रहणम् । विविशिवान्, विविश्वान्, ददृशिवान्, ददृश्वान् ।

५०८. दाश्वान्-साह्वान्-मीढ्वांश्च ।

एते वन्सु प्रत्ययान्ता निपात्यन्ते—

"द्विर्वचनमनिटत्वञ्च सहेर्दीर्घो मिहेरपि ।
टत्वञ्च खल्वतन्त्रत्वात् सर्वाणि वचनानि च ॥

५०९ न श्र्युवर्ण-वृ्ताां कानुबन्धे ।

श्रयतेरुवर्णान्तस्य वृञ्-वृङोॠकारान्तस्य च कानुबन्धेऽसार्वधातुके नेड् भवति । श्रितः, श्रितवान्, श्रित्वा । युतः, युतवान्, युत्वा । रुतः, रुतवान्, रुत्वा । लूनः, लूनवान्, लूत्वा । वृतः, वृतवान्, वृत्वा । कीर्णः, कीर्णवान्, कीर्त्वा—वचनादविकृतेऽपि स्यात् । शश्रियितः लोलुवितः इतिसिद्धये एकस्वरमनुवर्त्तयन्त्येके, तेषामूर्णोतेर्वक्तव्यमेव—प्रोर्णुतः, प्रोर्णुतवान् ।

५१०. घोषवत्योश्च कृति ।

घोषवति तौ च कृत्संज्ञके नेड्भवति । ईश्वरः, दीप्रः, शर्म्मा, दीप्तिः, जागर्त्तिः, वृद्धिः । तिक् च—तन्तिः सन्तिः । कथं निग्रहीतिः, निपठितिः,निकुचितः, उपस्निहितिः, आलोचितिः ? मण्डूकप्लुतिवाधिकाराद् ग्रहादेरिड् भवति । अपचितिरिति पूजायां निष्कृतौ चेष्यते । कथं शस्त्रम् । आगमस्यानित्यत्वात् । पत्रमिति—युग्यं पत्र इति निर्देशात् ।

५११. वेषु-सह-लुभ-रुष-विषान्ति ।

एषान्तकारादावसार्व्वधातुके वेड् भवति । एष्टा, एषिता, सोढा, सहिता, लोब्धा, लोभिता; रोष्टा, रोषिता, वेष्टा, वेषिता । 'उद्' अनुबन्धः किम् ? इष गतौ, इष आभीक्ष्ण्ये वाएषिता नित्यम् ।

५१२. रधादिभ्यश्च ।

तीति न वर्त्तते पृथग्वचनात् । टानुबन्धलिङ्गात् रधादिभ्यश्च परस्यासार्व्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिड् भवति वा । रत्स्यति, रधिष्यति, नङ्क्ष्यति, नशिष्यति । आवृत्करणं रधादिः । ररन्धिव, ररन्धिम इति स्रादिनियमान्नित्यमिट् ।

५१३. स्वरिति-सूति-सूयत्यूदनुबन्धात् ।

स्वरतेः सूतेः सूयतेरुदनुबन्धाच्च परस्यासार्व्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिड् भवति । स्वर्त्ता, स्वरिता, सोता, सविता । सुवतेस्तु नित्यं—सविता, निगोढ़ा, निगूहिता । विधोता, विधविता—धुञा धूञा च सिद्धम् । भविष्यतीति परत्वाद् विकल्पो न स्यात् व्यवस्थितवावचनात् । तथा स्वृ-सूङोश्च कानुबन्धे नित्यं स्यात्—स्वृत्वा सूत्वेति । अपतिनिष्कुषोरिति प्रतिषेधात् निष्कुषोऽन्वेडस्तीति गम्यते । असार्व्वधातुकस्य व्यञ्जनादेरयकारादेरेति – निकोष्टा, निष्कोषिता ।

५१४. उदनुबन्धे-पू-क्लिशां क्त्वि ।

उदनुबन्धात् पुवः क्लिशश्च क्त्वाचाप्रत्यये इड् भवति वा । शमु—शान्त्वा,

शमित्वा, पूञ् पूङ् वा—पूत्वा, पवित्वा, क्लिश्—क्लिष्ट्वा, क्लिशित्वा। ऊदनुबन्धस्य क्लिशेश्च प्राप्ते विभाषा, पुवः कानुबन्धेऽप्राप्त एव।

५१५. जॄव्रश्चोरिट्।

जॄव्रश्चिभ्यां क्त्वि इड् भवति। जरीत्वा, जरित्वा, व्रश्चित्वा। लाक्षणिकत्वात् जॄष—जीर्त्वा। व्रश्चेर्वचनान्नित्यमिडिति पुनरिड्ग्रहणम् उत्तरत्र वानिवृत्त्यर्थम्।

५१६. लुभो विमोहने।

विमोहने लुभेः क्त्वीड् भवति। लुभित्वा। गार्ध्ये तु—लुभिता, लुब्ध्वा।

५१७. क्षुधि-वसोश्च।

चकारेण लुभो विमोहने इत्यनुकृष्यते उत्तरार्थम्। क्षुधि—वसोश्च क्त्वा इड् भवति। क्षुधित्वा, उषित्वा। प्रतिषेधबाधकमिदम्।

५१८. निष्ठायाञ्च।

क्षुधि-वसिभ्यां विमोहने लुभेश्च निष्ठायामिड् भवति। क्षुधितः, क्षुधितवान्, उषितः, उषितवान् लुभितः, लुभितवान्, गार्ध्ये तु व्यावृत्त्या विभाषापि बाध्यते—लुब्धः, लुब्धवान्।

५१९. पू-क्लिशोर्वा।

पुवः क्लिशश्च निष्ठायामिड् भवति वा। पवितः, पवितवान्, पूतः, पूतवान्। क्लिशश, क्लिशु—क्लिशित, क्लिशितवान्, क्लिष्टः क्लिष्टवान्।

५२०. न-डी-श्वीदनुबन्धवेटामपतिनिष्कुषोः।

एभ्यो धातुभ्यः पतिनिष्कुष-वर्जितेभ्यो निष्ठायां नेड् भवति। उड्डीनः, उड्डीनवान्। शूनः, शूनवान्। दीपी—दीप्तः, दीप्तवान्। ओलस्जी, लग्नः, लग्नवान्, लस्जेरादनुबन्धत्वादिड्भावे नत्वं स्यादीदनुबन्धः किमिति चेत्। सविकल्पं वा ज्ञापकं स्यादिति, तथा डीश्वी च कर्त्तव्यौ। विकल्पेटाञ्च गुहू—गूढः, गूढवान्, शमु—शान्तः, शान्तवान्। अपतिनिष्कुषोरिति किं? पतितः, पतितवान्, निष्कुषितः, निष्कुषितवान्। कथं दरिद्रितः, दरिद्रितवान्? एकस्वरोऽत्र स्मर्तव्यः—अपातिनिष्कुंषोरिति पर्युदासाद् वा।

५२१. आदनुबन्धाच्च।

आदनुबन्धाच्च धातोर्निष्ठायां नेड् भवति। ञिमिदामित्रः, मित्रवान्,—

जिक्ष्विदा—क्षिण्णः, क्षिण्णवान्। चकारोऽनुक्तसमुच्चयार्थः, तेन जपिवमिभ्यां वा—जप्तः, जपितः, वान्तः, वमितः। व्याङ्भ्यां श्वसः—विश्वस्त, विश्वसितः, आश्वस्तुः, कर्त्तरि कर्म्मणि चायं प्रतिषेधः भावादिकर्म्मणोर्व्वेति वक्ष्यति।

५२२. **भावादिकर्म्मणोर्व्वा।**

आदनुबन्धाद्धातोर्भावे आदिक्रियायाञ्च निष्ठायामिड् भवति वा। मिन्नं, मेदितमनेन, प्रमिन्नः, प्रमेदितो भवान्। वेटत्वात् सिद्धे योगविभागे ज्ञापयति—यदर्थस्य विभाषा, तदर्थस्यैव प्रतिषेध इति, तेन—गमहनविदविशदृशां वेति साहचर्यात् लाभार्थस्य विदेग्रहणे ज्ञानार्थस्य प्रतिषेधो न स्यात्—विदितः, विदितवान्।

५२३. **क्षुभि-वाहि-स्वनि-ध्वनि-फणि-कषि-घुषां क्ते नेड् मन्थ-भृश-मनस्तमोऽनायास-कृच्छ्राविशब्दनेषु।**

एषु मन्थादिष्वर्थेषु क्ते नेड् भवति यथासंख्यम्। क्षुब्धः, मन्थः—चलितो मन्थ इत्यर्थः, मन्थ इति द्रवद्रव्यालोड़िताः सक्तव उच्यन्ते। बाह्य प्रयत्ने—बाढं भृशं—अनावृत्यातिशयोऽभ्युपगमश्च गृह्यते, न तु शीघ्रार्थः। स्वान्तं मनः—बाह्येष्व विवक्षिप्त-मित्यर्थः। ध्वान्तं तमः। फणगतौ—फान्टम्। अनायासनिर्य्यातत्वात् सद्यो भिषजोद्धृतौषधं द्रवद्रव्यमेवेष्यते। कष-शिष—कष्टः अग्निः, कष्टः पर्व्वतः—कृच्छ्रहेतुत्वात् कृच्छ्रं गमनमुच्यते। कृच्छ्रं दुःखं, सति मुख्ये गौणेऽप्यभिधानम्। घुषिर् शब्दे इति भ्वादौ—घुष्टा रज्जुः। घुष्टं शरीरम्। घुषिर विशब्दन इति चुरादौ विशब्दने तु स्यादिट्। अवघुषितं वाक्यमाह, विशब्दन इति प्रतिषेधाच्चुरादाविन् स्याद् विभाषयेति, तेनेदं सिद्धम्। "महीपालवचः श्रुत्वा जुघुषुः पुष्यमानवा" इति अनेकार्थत्वात् भौवादिक एव वा विशब्दनेऽपीति; स्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः। मन्थादिष्विति किं? क्षुभितः, वाहितः, स्वनितः, ध्वनितः, क्षणितः, कषितः, घुषितः। तथा भिन्नाधिकरणेऽपि—क्षुभितं मन्थेन, वाहितं भृशेन, स्वनितं मनसा, ध्वनितं तमसा, फाणितम् अनायासेन, कषितं कृच्छ्रेण, घुषितं शरीरेण। कथम् उद्घुष्टं कोकिलयेति? प्रकृत्यर्थं विशेषणात्। कथं क्षुब्धः समुद्र इति? उपमानाद् भविष्यति।

५२४. **लग्न-म्लिष्ट-विरिब्धाः सक्ताविस्पष्ट-स्वरेषु।**

लग्नादयः क्तान्ता सक्तादिष्वर्थेषु यथासंख्यं निपात्यन्ते। लगे—लग्नं सक्तम्। लगितमन्यत्। म्लेच्छ-म्लिष्टम्, अविस्पष्टम्। म्लेच्छितमन्यत्। रेभृ विरिब्धः स्वरः। स्वरो ध्वनिश्च। विरेभितमन्यत्। अन्ये तु विरिभितमिति प्रत्युदाहरन्ति रिभि सौत्रं धातुं मत्वेति। धृष्टो विश्वस्त इति धृषेरादनुबन्धत्वात् शसोश्च उदनुबन्धत्वात् वेडिति प्रतिषेधः प्रागलभ्य एव रुढ़ः। अन्यत्र धर्षितो विश्वसित इति अभिधानात् नत्रोऽनित्यत्वात् वा।

५२५. परिवृढ-दृढौ प्रभुबलवतोः ।

एतौ प्रभुबलवतोरर्थयोर्यथासंख्यं निपात्येते । परिपूर्वस्य बृंहतेरिड्भावो नलोपश्च, तथा दृंहेश्च, बृहेद्दृंहौ प्रकृत्यन्तरे तयोरपीत्येके । परिवृढः प्रभुः, दृढो बलवान् स्थूलोऽपि दृढो बलवाने वाभिधीयते । कथं परिवृढश्च गतः ?— परिवृढादिन् समासाभावात् यप् न स्यात् ? सत्यं तत्करोतीति सिद्धे संग्राम युद्ध इति गणपाठो ज्ञापयति—नाममात्रादिन्निति । अपचायितः, अपचित इति चायिना चिञा च पूजावृत्तिना सिद्धम् । कथं वृत्तं पारायणं विप्रेण, वृत्तो गुणश्छात्रेण इति ? अन्तर्भूतेनर्थवृत्तेर्भविष्यति, इनन्तस्यापि वृतितो गुणोऽनेनेति भवितव्यमिति मतम् । अन्ये तु इनोऽध्ययने वृत्तमिति निपातयन्ति ।

५२६. सन्निविभ्योऽर्देः ।

सन्निविभ्यः परस्यर्दिते क्ते नेड् भवति । समर्णः, न्यर्णः, व्यर्णः । निष्ठायामनिपातेष्वित्यन्ये ।

५२७. सामीप्येऽभेः ।

अभेः परस्यार्देतेः क्ते नेड् भवति सामीप्येऽर्थे । अभ्यर्णा सेना, सामीप्य इत्यर्थः । अनतिदूर इत्येके अभिधानात् ।

५२८. वा रुष्यम-त्वर-संघुषास्वनाम् ।

एभ्य क्ते नेड् भवति वा । रुष्टः, रुषितः —रेषुसहलुभरुषेत्यादिना वेट्त्वात् प्रतिषेधः प्राप्तः । अम गतौ न त्वम रोग इति —इनन्तत्वात्—अभ्यान्तः, अभ्यमितः, तूर्णः, त्वरितः —आदनुबन्धाच्चेति प्रतिषेधः प्राप्तः । संघुष्टं, संघुषितं वाक्यमाह । संघुष्टौ, संघुषितौ, दम्पौ —संपूर्वस्य घुषेरविशब्दने ऽपि परत्वादयमेव । आङ्पूर्वस्य स्वनः—आस्वान्तः, आस्वनितः मृदङ्ग । आस्वान्तं, आस्वनितं मनः । परत्वात् मनोऽभिधानेऽप्यमेव ।

५२९. हृषेर्लोमसु ।

लोमसु वर्तमानात् हृषेः क्ते नेड् भवति वा । हृष्टानि, हृषितानि, लोमानि । हृष्टं, हृषितं लोमभिः । हृष्टः, हृषिताः, केशाः । हृषु आलीक्ये इत्यस्य उदनुबन्धत्वात् निष्ठायामनिट्, हृष तुष्टाविति अयन्तु सेट्, उभयोरपि विभाषेयम् । लोमानि अङ्गजानि मूर्द्धजानि च गृह्यन्ते, तथा "त्यक्तलोमनखं स्पृष्ट्वा शौचः कर्त्तव्यं विति स्मृतिः । हृषिर्लोमसु वर्तमानो लोमकर्त्तृकः । लोमस्विति किं ? हृष्टश्छात्र इत्यलीकार्थस्य, हृषितश्छात्र इति तुष्टार्थस्य । लोमस्वित्युप लक्षणं, तेन विस्मयप्रतिघातयोश्च वा स्यात् —हृष्टः, हृषितः, छात्रो विस्मित इत्यर्थः । हृष्टाः हृषिताः दन्ताः प्रतिहता इत्यर्थः ।

५३०. **दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्ताश्चेनन्ताः ।**

एते इनन्ता निपात्यन्ते वा । दान्तः, दमितः, शान्तः, शमितः, पूरी दैवादिकश्चौरादिकश्च—पूर्णः, पूरितः । दसु—दस्तः, दासितः, स्पश - स्पष्टः, स्पाशितः । छद् खट्ट संवरणे—छन्नः, छादितः । मारणतोषणनिशामनेषु ज्ञा मानुबन्धश्च—ज्ञप्तः, ज्ञपितः । इटप्रतिषेधे इनो लुग् निपात्यते, ज्ञपेर्व्वेट्त्वात् नित्यमिट् प्रतिषेधे प्राप्ते ।

५३१. **रान्निष्ठातो नोऽपॄ-मूर्च्छि-मदि-ख्या-ध्याभ्यः ।**

रेफात् परस्य निष्ठातकारस्य नकारो भवति नतु पॄ—मूर्च्छि-मदि-ख्या-ध्याभ्यः । शीर्णः, शीर्णवान् । गुरी—अवगूर्णः, अवगूर्णवान्, यदि रश्रुतिरपि स्यात् कृतमिति णत्वं न स्यात् ऋकारावयवेन व्यवधानात् । चरितमित्यत्र निष्ठावयेवनेटा व्यवधानात् । कृतस्यापत्यं कार्त्तिरित्यसिद्धं बहिरङ्गमन्तरङ्गेन इति । प्रतिषेधः किं ? पॄ – पूर्त्तः, मूर्च्छा—मूर्त्तः । मदि-ख्या-ध्याभ्यः पराभ्यां प्राप्ते – मत्तः, ख्यातः, ध्यातः ।

५३२. **दाद्दस्य च ।**

दकारात् परस्य निष्ठातकारस्य नकारो भवति दस्य च नो भवति । भिन्नः भिन्नवान् ।

५३३. **आतोऽन्तस्थासंयुक्तात् ।**

अन्तस्थासंयुक्तादाकारान्तात् परस्य निष्ठातकारस्य नकारो भवति । ग्लानः, ग्लानवान्, विश्राणः, विश्राणवान् । धात्वधिकारात्— निर्य्यातः, निर्य्यातवान् ।

५३४. **ल्वादेरोदनुबन्धाच्च ।**

लूनादिभ्य ओदनुबन्धेभ्यश्च परस्य निष्ठातकारस्य नकारो भवति । लूनः—लूनवान् । ज्या—जीनः, जीनवान् । रुजो रुग्णः, रुग्णवान् । भुजो—भुग्नः, भुग्नवान् । स्वादय ओदनबन्धाः—षूङ् प्राणिप्रसवे—सूनः, सूनवान्, दूङ् — दूनः, दूनवान् । गणकृतस्यानित्यत्वात् पूञे नाशे—पूना यवागूर्विनष्टा इत्यर्थः । नाश इति किं ? धूतं धान्यं, कम्पितमित्यर्थः । दुग्वोर्दीर्घश्च—विदूनः, विदूनवान्, विगूनः, विगूनवान् । चकारोऽनुक्तसमुच्च्यार्थः तेन ऋल्वादिभ्यश्च क्तेः—कीर्णिः, गीर्णिः, लूनिः, पूनः, धूनिः । ल्यी चेति यावत् ल्वादिस्ततो वृत्करणात् । हा-ज्या-ग्लाभ्यश्च—हानिः । जानिः, ग्लानिः ।

५३५. **वृश्चेः क च ।**

व्रश्चेः परस्य निष्ठातकारस्य नकारो भवति कादेशश्चान्ते, व्रश्चेरेव श्रुतत्वात् सोपधस्य व्रश्चेर्धुटयन्त लोपे सति षत्वबाधकं कत्वं स्यात्—वृक्नः, वृक्नवान् ।

५३६. क्षेर्दीर्घात् ।

दीर्घान्तात् परस्य क्षेर्निष्ठातकारस्य नकारो भवति । क्षीणः, क्षीणवान् । दीर्घादिति किं ? क्षितायुर्जाल्मः, क्षितकस्तपस्वी ।

५३७. श्योऽस्पर्शे ।

अस्पर्शे वर्तमानात् श्यायतेर्निष्ठातकारस्य नकारो भवति । शीनं घृतं, शीनवत् घृतं । अस्पर्श इति प्रसज्योऽयं नञ् । शीतं वर्त्तते, शीतं जलं । गुणभूतोऽपि स्पर्शो नत्वप्रतिषेधस्य सम्प्रसारणस्य च निमितं भवति नतु रोगे, तेन-प्रतिशीनमिति नत्वं स्यादेव ।

५३८. अनपादानेऽञ्चेः ।

अनपादाने वर्त्तमानादञ्चेर्निष्ठातकारस्य नकारो भवति । समक्नः, समक्नवान् संसक्तः इत्यर्थः । अनपादान इति किम् ? उदक्तमुदकं कूपाद् उद्धृतमित्यर्थः । व्यक्तमिति अञ्चेरुपम् । अञ्चितः, अञ्चितवानिति इटा व्यवधानात् । पूजायामञ्चतेरिडभावो नलोपश्च नेष्यते ।

५३९. अविजिगीषायां दिवः ।

अविजिगीषायां वर्त्तमानात् दिवो निष्ठातकारस्य नकारो भवति । आद्यूनः, आद्यूनवान् । अविजिगीषायामिति किं ? द्यूतं वर्त्तते । विजिगीषया अक्षपातः क्रियते । सिनोतेः कर्म्मकर्त्तरि ग्रासे वक्तव्यं—सिनो ग्रासः स्वयमेव बद्ध इत्यर्थः ।

५४०. ह्री-घ्रा-त्रोन्द-नुद-विन्दां वा ।

एभ्यो निष्ठातकारस्य नकारो भवति वा । ह्रीणः, ह्रीणवान्, ह्रीतः, ह्रीतवान्, घ्राणः, घ्राणवान्, घ्रातः, घ्रातवान्, त्राणः, त्राणवान्, त्रातः, त्रातवान्, उन्दी-समुन्नः, समुन्नवान्, समुत्तः समुत्तवान्, नुद—नुन्नः नुन्नवान, नुत्तः, नुत्तवान् । विद विचारे—विन्नः विन्नवान् वित्तः, वित्तवान् । व्यवस्थित विभाषया नित्यं संज्ञायां देवत्रातः । तथा—

विचारार्थाद्विभाषैव ज्ञानार्थान्नित्यमिड् यतः ।
भोगादन्यत्र लाभार्थात् सत्तार्थाच्च विदेः सदा ॥

५४१. क्षै-शुषि-पचां म-क-वाः ।

एभ्यो निष्ठातकारस्य यथासंख्यं म-क-वा भवन्ति । क्षामः, क्षामवान्, शुष्कः शुष्कवान्, पक्वः, पक्ववान् । द्वयोर्विभाषयोर्मध्ये यो विधिः स नित्य एव ।

५४२. **वा प्रस्त्यो मः ।**

प्रपूर्वस्य स्त्यायतेर्निष्ठातकारस्य मो भवति वा। प्रस्तीमः, प्रस्तीमवान्, प्रस्तीतः, प्रस्तीतवान्, मत्वान्नित्यं सम्प्रसारणमेवेति ।

५४३. **निर्व्वाणोऽवाते ।**

निर्वाण इति निपात्यते वातविषयेश्चेद्धात्वर्थो न भवति, निर्व्वाणोऽग्निः दीप्त्युपरमे वर्त्तते, निर्व्वाणो भिक्षुः रागादि प्रशमनेऽत्र। अवात इति किम् ? निर्व्वाणो वातः निरोधोऽत्र । कथं निर्व्वाणो दोपः वातेन ? अत्र वातः करणं नत्वाधारः, निर्व्वातं वातेनेति भावेऽपि वात एव कर्त्ता ।

५४४. **भित्तर्णवित्ताः शकलाधमर्णभोगेषु ।**

भित्तादयः क्तान्ताः शकलादिष्वर्थेषु यथासंख्यं निपात्यन्ते । भित्तं शकलमिति पर्य्यायः । ऋ गतौ ऋणं शोध्यम्, ऋणोऽधमोऽधमर्णः, तद्विषये निपातनम् । अधमर्ण-ग्रहणं कालान्तरदेयविनिमयोपलक्षणं, तेन उत्तमर्णविषयेऽपि स्यात् । वित्तं द्रव्यं । भुज्यते इति भोग उच्यते । वित्तमिव वित्तमुपचारात् प्रतीतेऽप्यभिधीयते ।

५४५. **अनुपसर्गात्-फुल्ल-क्षीब-कृशोल्लाघाः ।**

एते क्तान्ता निपात्यन्ते न चेदुपसर्गात् परा भवन्ति । दल ञिफला विशरणे, निष्ठातकारस्य लत्वं-फुल्लः । क्तवन्तोरपि लत्वमित्येके—फुल्लवान् । क्षीबृ कृशिभ्या-मुत्पूर्व्वाच्च लाघेः परस्य निष्ठातकारस्य लोप इड्भावश्च—क्षीबः, कृशः, उल्लाघः । अनुपसर्गादिति किं ? प्रफुल्लः, प्रक्षीबितः, प्रकृशितः, प्रोल्लाघितः । कथं संप्रफुल्लः उत्प्रफुल्लः । फुल्लविकसन इत्यस्या सिद्धम् ? परिकृश इति केन सिद्धम् ? वचनन्तु रूपान्तरं स्यादिति ।

५४६. **अवर्णादूटो वृद्धिः ।**

धातोरधातोर्व्वा अवर्णात् परस्य ऊटो वृद्धिर्भवति । शव—शौः, शावौ, शावः । धावु-धौतः, धौतवान् । अवनमूतिः – पटस्योतिः—पटौतिः, जनानवतीति जनौः जनावौ जनावः । ऊट इति किम् ? अद्योढा, कदोढा । औरिति सिद्धे वृद्धिग्रहणं मङ्गलार्थम् ।

इति दौर्गसिंह्यां वृत्तौ कृत्सु षष्ठः पादः समाप्तः ।

— इति शम् —

कृन्मञ्जरी

— नमो गणेशाय —

नत्वा महेशं शिवया समेतं संसारदावानलमोक्षहेतुम् ।
संक्षेपतः श्रीशिवरामशर्म्मा कृन्मञ्जरीं बालमुदे तनोति ।।

तव्यानीयौ क्यप् ण्यणौ यः पञ्चैते कृत्संज्ञकाः ।
भावे कर्म्मणि चैते स्युर्लक्ष्यतोऽन्यत्र कुत्रचित् ।। १ ।।
वुण्तृचौ कर्त्तरि प्राप्तौ पचादेरच् तथैव च ।
नन्द्यादेर्युस्तथैव स्यात् ग्रहादेर्णिश्च कर्त्तरि ।। २ ।।
कडशाः कर्त्तरि प्रोक्ता णकारश्च तथैव हि ।
अक्-वुष्-थका-स्तथा ण्युट्च भवन्तिकर्त्तृकारके ।। ३ ।।
आशिष्यकस्तथा प्रु-स्रु-सृ-ल्वां स्यात् साधुकारिणि ।
अन् प्रत्ययः कर्त्तरि स्यात् शीलिकाम्यादिकात्तु णः ।। ४ ।।
कर्मण्यातश्च यः कः स्यान्नाम्नि स्थश्चेति कर्त्तरि ।
टकचटाः कर्त्तरि प्रोक्ता इ-खि-खश्-खास्तथैव च ।। ५ ।।
नग्रादिषु च यः ख्युट् स्यात् करणे कारके स हि ।
भुवः खिष्णुखुकञौ च भवेतां कर्त्तृकारके ।। ६ ।।
भजादिभ्यस्तु यो विण् स्यात् सोऽपि स्यात् कर्त्तृकारके ।
विच् क्विपौ कर्त्तरि प्रोक्तौ टक्सकौ कर्म्मणि स्मृतौ ।। ७ ।।
णिनिश्च कर्त्तरि प्रोक्तस्तथा खश्चात्मने भवेत् ।
इष्वकनिप्डास्तथा प्रोक्ता विद्वद्भिः कर्त्तृकारके ।। ८ ।।
क्वसुस्तथा क्तवन्तुश्च शन्तृङस्य शन्तृङेव च ।
कर्त्तर्यपि भवन्त्येते तथा ताच्छीलिका अपि ।। ९ ।।
क्तस्त्वधिकरणे प्रोक्तः क्तः कर्त्तर्यपि जायते ।
गत्यर्थादिविधानेन तथा स्यादादिकर्म्मणि ।। १० ।।
आनकानौ तथा स्यातां प्रत्ययौ भावकर्म्मणोः ।
कर्त्तर्यपि तथा स्यातामात्मनेपदिनौ च तौ ।। ११ ।।

एतौ चोभयभाषेभ्यः प्रत्ययौ कर्त्तरि स्मृतौ ।
स्त्रियां क्तिश्चैव भावे, स्यादकर्त्तरि च कारके ॥ १२ ॥

तद्बाधकौ क्यवङौ च तथैव परिकीर्त्तितौ ।
स्त्रियां शंसिप्रत्ययादयस्था गुरुमतोऽपि च ॥ १३ ॥

कृञः शचेत्यनेनैव यः शः स्यात् स तु कर्म्मणि ।
युट् तुम्क्त्वा चैव भावे स्युर्युट् स्यात् कर्त्तरि च क्वचित् ॥ १४ ॥

करणे च तथाधारे भावे युट् प्रत्ययस्तथा ।
युखलौ च खलार्थश्च भवेयुर्भावकर्मणोः ॥ १५ ॥

क्लीबे भावे च क्तः प्रोक्तः सर्वतो धातुतो बुधैः ।
घञ् स्याद्भावे तथा नाम्नि कर्त्तृभिन्ने च कारके ॥ १६ ॥

तद्बाधकोऽलपि च णम् भावेऽत्र कथितो बुधैः ।
णजनिश्च तथायुश्च नङ्भावे कथितो बुधैः ॥ १७ ॥

विशेषवचनात् किः स्यात् भावे कर्म्मादिकेऽपि च ।
एते संक्षेपतः प्रोक्ता अन्ये ज्ञेया विचक्षणैः ॥ १८ ॥

इति श्रीशिवरामशर्म्मकृताकृन्मञ्जरी समाप्ता ।

चक्करीत-रहस्यम्

(लुप्तचेक्रीयितधातु विवरणम्)

। नमो गणेशाय ।

प्रणम्य महादेवं चक्करीतरहस्यकम् ।
श्री कविकण्ठहारोऽहं वावद्मि वदतांवरः ॥ क ॥

परिभाषाटीकायां माधवदासकविचन्द्र-भिषजा यत् ।
गुरुगुरुणा चोत्तरपरिष्टि यदभिहितमविरुद्धम् ॥ ख ॥

रसवत्पद्यशब्दानुशासनयुगले चाभिहितं वीक्ष्य ।
तत्सर्व्वं संक्षेपात् पदानि वावद्मि चक्करीतानाम् ॥ ग ॥

नो जाग्रति कलापतन्त्रविदुरो यद्वावदीति स्फुटत् ।
भाषायामिह चक्करीतमखिलं नैवं दरीदृश्यते ॥
भाषायामपि मंमनीति विदितो वक्तव्यवादी तत-
स्तत् सर्व्वं विवरीवरीमि रसवत् तन्त्रादिभिः सम्मतम् ॥ घ ॥

चक्करीताभिधो धातुश्चेक्रीयितलुकीष्यते ।
सप्तम्या वैषयिक्या च तस्य द्विर्वचनं भवेत् ॥ १ ॥

चेक्रीयिते च योऽभ्यासस्तत्र यद् यद् विधीयते ।
तत् सर्वं चक्करीतस्याभ्यासे रीविषये रिरौ ॥ २ ॥

ईड्डुद्वृद्धिनिमित्ते च चक्करीताद् विभाषया ।
चक्करीतादनो लोपो विकरणाभिधस्यतु ॥ ३ ॥

स्वरे चास्य गुणो न स्यादुपधायाश्च नामिनः ।
चोक्रुशीति प्रयोगोऽयं गुणिनि सार्व्वधातुके ॥ ४ ॥

असार्व्वधातुके तद्वच्चकाराद् यङ्लुकीष्यते ।
बेभिदिता प्रयोगोऽयं स्याद् बेभिदाञ्चकार च ॥ ५ ॥

चेक्रीयिते च यत्कार्यमुक्तं चरफलोस्तथा ।
तत्सर्व्वं चक्करीतस्य वदन्त्यपि मनीषिणः ॥ ६ ॥

तद्वत् स्वपि-स्यमि व्येत्रां चंचूर्ति चंचूरीति च ।
पंफुल्ति पंफुलीत्येव सोषुप्ति सोषुपीति च ॥ ७ ॥
सेसेन्ति सेसिमीत्येव वेवेति वेवयीति च ।
ग्रह्यादीनाञ्च सौत्राणां संप्रसारणमिष्यते ॥ ८ ॥
जरीगृहीति जर्गढि जरीगृहीति कैश्चन ।
नास्माभिस्तेन तेषान्तु जाग्राढ़ि जाग्रहीति च ॥ ९ ॥
जागृढ़ो जागृहत्यत्रागुणत्वात् संप्रसारणम् ।
कृताभ्यासविधेराद्य-प्रकृतेश्च भुवो वचिः ॥ १० ॥
समुदायाश्रितानेलस्वरत्वादनिटामपीट् ।
चायप्यायोस्तथा धात्वोर्यथासंख्यं क्विपि स्मृतौ ॥ ११ ॥
प्रकृतिग्रहणेनैव चर्करीतग्रहो भवेत् ।
अद्यतन्यां भुवो वस्तु परैश्चान्यैरुविष्यते ॥ १२ ॥
बोभवेति परोक्षायामाम्भुवो न व्यवस्थया ।
श्तिव् (प्) गणैकस्वरैरुक्ते अनुबन्धे च नेष्यते ॥ १३ ॥
नात्मनेपदमिच्छन्ति केचित्तु भावकर्म्मणोः ।
आत्मनेपदमिच्छन्ति परेऽत्र भावकर्म्मणोः ॥ १४ ॥
चेक्रीयितलुगन्ताच्च नात्मनेपदमन्ततः ।
शेषत्वाच्चर्करीताच्च परस्मैपदमेव च ॥ १५ ॥
चर्करीतादिना यण्वृद्धिर्वा तत्र केचन ।
हनेरिनि हतोघातो घतश्चेति प्रयोगतः ॥ १६ ॥
अन्ये तु व्यञ्जनादेव,—नेकस्वरचुरादितः ।
इनन्तादृयङमिच्छन्ति तल्लोपमापि मेनिरे ॥ १७ ॥
क्षुभि गाहिस्वनीत्यत्रानिट् घुषिर विशब्दने ।
विशब्दन इनोऽभावात् विकल्पेनश्चुरादितः ॥ १८ ॥
एतस्माद् व्यञ्जनादेर,—नैकस्वराद् यङिष्यते ।
तल्लोपमपि वाञ्छन्ति परे चान्ये प्रयोगतः ॥ १९ ॥
रामचन्द्रनृपद्वारि कलापाध्यापने रतः ।
कण्ठहारकविः सोऽहं विवृणोमि रहस्यकम् ॥ २० ॥

इति वैद्यकुलतिलक-त्रिलोचनकवीन्द्रतनय-श्रीकण्ठहारविरचितं
चर्करीतरहस्यं समाप्तम् ॥

ओं तत्सत् । शिवमस्तु ॥

उणादिवृत्तिः

नमस्कृत्य शिवं भूरि-शब्दसन्तानकारणम् ।
उणादयोऽभिधास्यन्ते बालव्युत्पत्तिहेतवे ।।

१. कृ-वा-पा-जि-मि-स्वदि-स्वाध्यशूद्दृसनि-जनि-चरि-चटिभ्य उण् । कारुः, वायुः, पायुः, जायुः मायुः, गोमायुः, स्वादु, साधुः, आशुः, दारु, सानु, जानु, चारुः, चाटुः ।

२. किंजरयोः श्रिण्भ्याम् । किंशारुः, जरायुः ।

३. बहि-रहि-तलि-पंशिभ्य ऊण् । बाहुः, राहुः, तालुः, पांशुः ।

४. कुके वचो घुण् । कुक्कुटः ।

५. भृ-मृ-तृ-चरि-त्सरि-तनि-मस्जि-शीङ्भ्य उः । भरुः, मरुः, तरुः, चरुः, त्सरुः, तनुः, मद्गुः, शयुः ।

६. पटघसि-वसि-हृनि-मनि-त्रपीन्दि-कन्दि-वन्दि-वह्यणिभ्यश्च । पटुः, असवः, वसु, हनुः, मनुः, त्रपुः, इन्दुः, कन्दुः, बन्धुः, बहुः, अणुः ।

७. स्यन्देः, संप्रसारणं धश्च । सिन्धुः ।

८. मनि-जनि-नमां मधजतनाकाश्च । मधु, जतु, नाकुः ।

९. रज्जु-तर्कुं-वल्गु-फल्गु-शिशु-रिपु-पृथु-लघवः । रज्जुः, तर्कुः, वल्गुः, फल्गुः, शिशुः, रिपुः, पृथुः, लघुः ।

१०. प्रथे षिवन् संप्रसारणञ्च । पृथिवी ।

११. इषि धृषि-भिदि-गृधि-मृदि-पृभ्यः कुः । इषुः, धृणुः, भिदुः, गृधुः, मृदुः, पुरुः ।

१२. कृ-ग्रो-ॠंत उर् च । कुरुः, गुरुः

१३. अर्त्तेरुर् च । उरुः ।

१४. भ्रस्जे सलोपश्च । भृगुः ।

१५. नावञ्चे । न्यङ्कुः ।

१६. अपष्ठ्वादय । अपष्ठु, दुष्ठु, सुष्ठु, हरिद्रुः, शतद्रुः, शङ्कुः, धनुः, मयुः, पशुः देवयुः, कुमारयुः, जटायुः, मृगयुः ।

१७. आङ्परयोः खनिशृभ्यां डुः । आखुः, परशुः ।

१८. उपे गः । उपगुः

१९. मन्द्यङ्कि-वासि-मथि-चतिभ्य उरः । मन्दुरा, अङ्कुरः, वासुरा, मथुरा, चतुरा ।

२०. मुकुर-दर्दुर-विसुरा-सुराः । मुकुरः, दर्दुरः, विधुरम् । असुरः ।

२१. शावशेराप्तौ । श्वशुरः ।

२२. अविमह्योष्टिषः । अविषः, महिषः ।

२३. रुहेर्वृद्धिश्च । रौहिषः ।

२४. किल्बिषाव्यथिषो । किल्बिषं, अव्यथिषः ।

२५. तिमि-रुधि-मदि-मन्दि चन्दि-वन्दि-रुचि-शुषिभ्यः किरः । तिमिरम्, रुधिरं, मदिरा, मन्दिरं, चन्दिरः, बधिरः, रुचिरं, शुशिरम् ।

२६. अजिरादयश्च । अजिरम्, शिशिरः, शिविरं. स्थविरः, खदिरः ।

२७. शलि-मण्डि-भलि-भल्लिभ्य ऊकञ् । शालूकः, मण्डूकः, भालूकः ।

२८. सितनिगमि-मसिश्च्यविधाञ् न्कुशिभ्यस्तुन् । सेतुः, तन्तुः, गन्तुः, आगन्तुः, मन्तु, सक्तुः, ओतुः, धातुः, क्रोष्टुः ।

२९. कनि-मनि-जनि-पति-वसिहिभ्यश्च । कन्तुः, मन्तुः, जन्तुः, पत्तुः, वस्तु, वास्तुः । हेतुः ।

३० केत्वादयश्च । केतुः, ऋतुः, आप्तुः, पितुः, एधतुः, वहतुः, जीवतुः ।

३१. स्तनि-हृषि-घुषि-गदि-मदिभ्य इन इत्नुः । स्तनयित्नुः, हर्षयित्नुः, घोषयित्नुः, गदयित्नुः, मदयित्नुः ।

३२. मृग्रोरुतिः । मरुत्, गरुत् ।

३३. कृषि-चमि-तनि-धनि-वधि-सर्जि-खर्जिभ्य ऊः । कर्षूः, चमूः, तनूः, धनूः, वधूः, सर्जूः, खर्जूः ।

३४. त्रो दोऽहन्तश्च । तद्दूः ।

३५. दरिद्रातेर्य लोपश्च । दद्रुः,

३६. कच्छ्वादयश्च । कच्छूः, दिधीषूः, जम्बूः, कम्बूः; आडूः, अलावूः । कर्कन्धूः, कषेरुः, कामूः ।

३७. हृ-सृ-तडि-रुहि-युषिभ्य इतिः। हरित्, सरित्, तडित्, रोहित्, योषित्।

३८. शमेढः। शंढः

३९. अनुनासिकान्तात् डः। अण्डं, रण्डा, बण्डः, भण्डः, मण्डः, काण्डः, खण्डम्। रांडः, दण्डः, षण्ढाः,

४०. वरण्डादयश्च। वरण्डम्, करण्डाः, कुण्डं, पिण्डं, मुण्डम्।

४१. कमेरठः। कमठः।

४२. शकि-शमि-वहिभ्योऽल्। शकलं, शमलं, वहलम्।

४३. वृषलादयश्च। वृषलः, देवलः, केवलः, कललं, पललम्।

४४. कनेष्ठः। कण्ठः।

४५. पति-चण्डिभ्यामालञ्। पातालम्, चण्डालः।

४६. कुलि-पीङ्भ्यां कालः। कुलालः, पियालः।

४७. शीङो वालवलञौ। शैवालं, शैवलः।

४८. इल्वलादयश्च। इल्वलाः, पल्वलम्, शुक्लः, तण्डुलम्। शिथिलः, चषालः, माला।

४९. सारेरङ्ग। सारङ्गः।

५० भृङ्गभृङ्गाङ्गानि। भृङ्गम्, भृङ्गः, अङ्गम्।

५१. मुदि गृभ्यां गकगौ। मुद्गः, गर्गः।

५२. शृ-दृभ्यामदिः। शरत्, दरत्।

५३. दृङः शोऽन्तोऽगुणश्च। दृशत्।

५४. युष्यसिभ्यां मदिक्। त्वम्, अहम्।

५५. अर्त्ति-हु-सु-क्षु-छ्वृ-क्ष्वि-ली-नी-सि-पदि-भाषा-स्तुभ्यो मः। अर्मः, होमः, सोमः, क्षौमम्। धर्म्मः, क्षेमम्, लेमः, नेमः, सेमः, पद्मम्, भीमः, यामः, स्तोमः।

५६. ग्रसेराच्च। ग्रामः।

५७. इन्धि-युधि-श्या-धूहिभ्यो मक्। इध्मं, युध्मं, श्यामः, धूमः, हिमः।

५८. घर्म्म-सीम-ग्रीष्माधमाः। घर्म्मः, सीमा, ग्रीष्मः, अधमः।

५९. युजि-रुजि-तिजां मक्। युग्मं, रुक्मम्, तिग्मम् तीक्ष्णम्।

६०. भियः सान्तो वा। भीम, भीष्मः।

इति उणदिवृत्तौ प्रथमः पादः समाप्तः

द्वितीयः पादः

६१. अशि-नटि-खटि-विशिभ्यः क्वः । अश्वः, नट्वः, खट्वा, विश्वम् ।

६२. शर्व-जिह्वा-ग्रीवाः । शर्वः, जिह्वा, ग्रीवा ।

६३. वृषि-तक्षूक्षिराजि-धन्वि-प्रतिदिवि-युभ्यः कनिः । वृषा, तक्षा, उक्षा, राजा, धन्वा, प्रतिदिवा, युवा ।

६४. नञि जहातेः । अहः ।

६५. पूषादयश्च । पूषा, अर्य्यमा, मज्जा, कुक्कुरः, प्लीहा, मातरिश्वा, यूषा, दोषा ।

६६. कृहृभ्यामेणुः । करेणुः, । हरेणुः ।

६७. दा-भा-री-वृकेभ्यो नुः । दानुः, भानुः, रेणुः, वर्णुः ।

६८. सु-विषिभ्यां यण्वत् । सूनु, [सूनुः], विष्णुः ।

६९. धेन्वादयश्च—धेनुः, जह्नुः स्थास्नुः, वेणुः ।

७०. रमि-काशि-कुषि-पातृ-रुचि-रिचि-गुभ्यस्थक् । रथः, काष्ठं, कुष्ठं, पाथ, तीर्थं, रिक्थं, सिक्थं, गूथम् ।

७१. अवे भृञः । अवभृथः ।

७२. न्युदोः शीङ्गाभ्याम् । निशीथः, उद्गीथः ।

७३. पृष्ठ-यूथ-प्रोथाः । पृष्ठं, यूथं, प्रोथः ।

७४. स्फायि-चि-वचि शकि-क्षिपि-क्षुदि-रूदि-मन्दि-चन्दि-उन्दिभ्यो रक् । —स्फारः, तक्रं, वक्रं, [शक्रः], क्षिप्रं, क्षुद्रम्, रुद्रः, मन्द्रः, चन्द्रः, उद्रः ।

७५. सु-सू-धाञ्—गृधि-श्विति-वृति-छिदि-मुदि-तृपि-दण्डि-शुभिभ्यश्च । सुरा, सूरः, धीरः, गृध्रः, श्वित्रं, वृत्रः, छिद्रं, मुद्रा, तृप्रः, दभ्रः, शुभ्रः ।

७६. तम्यमजीनां दीर्घश्च । ताम्रो, आम्रः, जिरः ।

७७. शूद्रादयश्च । शूद्रः, उग्रः, वज्रं, विप्रः, भद्रं, गौरः, भेरी, इरा, पृथिवी, सुरा, वारि ।

७८. व्रश्चि-कृषिभ्यां किकः । वृश्चिकः, कृषिकः ।

७९. मूषिक-सीमकौ । मूषिकः, सीमकः ।

८०. क्रियः इकः । क्रयिकः ।

८१. श्या-हृल-अवि-द्रु-द्रुहिम्य इनः । श्येनः, हरिणः, अविनः, द्रविणं, द्रुहिण, दक्षिणः ।

८२. वृजिनाजिनेरिण-विपिन-तुहिन-महिनानि । वृजिनं, अजिनं, ईरिणम् । विपिनं, तुहिनं, महिनम् ।

८३. क्विब्-वचि-प्रच्छि-श्रि-द्रु-श्रु-प्रु-ज्वां दीर्घश्च । वाक्, शब्दप्राट्, श्रीः, द्रूः, श्रूः, कटप्रूः, जूः ।

८४. परौ व्रजेश्च । परिव्राट् ।

८५. तनोतेः कयः । तनयः ।

८६. हृञो दोऽन्तश्च । हृदयम् ।

८७. रातेर्डैः । राः ।

८८. गमेर्डोः । गमः गोः ।

८९. ग्ला-नुदिभ्यां डौः । ग्लौः, नौः ।

९०. भ्रमेर्डूः । भ्रूः ।

९१. दमेर्डोस् । दोः ।

९२. सर्त्तेरयूः । सरयूः ।

९३. शीङो घुक् । शीधुः ।

९४. भुजि-मृङ्भ्यां युक्त्युकौ । भुज्युः, मृत्युः ।

९५. कृ-पृ-वृ-निधाञ्भ्यो नः । कर्णः, पर्णम्, वर्णः, निधानम् ।

९६. धृषो धिषश्च । धिषणः ।

९७. हनो जघश्च । जघनम् ।

९८. दिवेर्ऋन् । देवा [देवर] ।

९९. नञि च नन्दे दीर्घश्च । ननान्दा ।

१००. यतेश्च । याता ।

१०१. नियो डान् बन्धवच्च । ना ।

१०२. स्वस्रादयश्च । स्वसा, नप्ता, नेष्टा, त्वष्टा, क्षत्ता, होता, पोता, प्रशास्ता, पिता, माता, दुहिता, जामाता, भ्राता ।

१०३. ऋ-तृ-सृ-दृ-धम्यश्यविवृति यहिभ्योऽनिः । अरणिः: तरणि,, सरणिः, धरणिः, धमनिः, अशनिः, अयनिः, वर्त्तनिः, ग्रहणिः ।

१०४. अर्च्चि-शुचि-रुचि-हु-सृपि-छादि-छर्दिभ्य इस् । अर्च्चिः, शोचिः, रोचिः, हविः, सर्पिः, छदिः, छर्दिः ।

१०५. ज्योतिरादयश्च—ज्योतिः, आदित्यः, बर्हिः ।

१०६. ऋ-पृ-वपि-चक्षि-जनि-तनि-धनिभ्य उस् । अरुः, परुः, वपुः, चक्षुः, जनुः, तनुः, धनुः ।

१०७. एतेरिज्वच्च । आयुः ।

१०८. चति-कटि-शृ-वृञ्भ्यष्ट्वरः । चत्वरम्, कट्वरम्, शर्व्वरी, वर्व्वरः (मूर्खः)

१०९. नौ सदे । निषद्वरः ।

११०. छिद्वरादयश्च । छिद्वरं, छद्वरम्, धीवरः, तीवरः, पीवरः, चीवरं, गह्वरं, नीवरः ।

१११. इणजिकृषिभ्यो नक् । स्वामी, जिनः, कृष्णः ।

११२. वधेर्व्रधिश्च । वध्न, व्रघ्नः ।

११३. धाञ्-वसि-द्रुभ्यो नः । धानाः, वस्नं, द्रोणः ।

११४. रास्ना-शास्ना-स्थूणा-वीणाः । रास्ना, शास्ना, स्थूणा, वीणा ।

११५. पातेः पः । पापम् ।

११६. नीपादयश्च । नीपः, यूपः, सूपः,कूपः, यूयम्, तल्पम्, शष्पम्, वाष्पम् ।

११७. इण-भी-का-पा-शल्य-र्ञ्चि-कृ-दा-धा-राभ्यः कः । एकः, भेकः, काकः, पाकः, शल्कः: अर्कः, कर्कः, दाकः, धाकः, राकः ।

११८. मूकादयश्च । मूकः, यूकः, अर्भकः, पृथुकः, वृकः सृकः, भूकम् ।

११९. शके-रुन्युन्त्यनोन्ताः । शकुनि, शकुन्तिः, शकुनः, शकुन्तः ।

१२०. ऋ-वृ कृत-यमि-दार्य्यर्जिभ्य उनः । अरुणः, करुणा, तरुणा, वरुणः, यमुना, दारुणः, अर्ज्जुनः ।

१२१. पिशुन-फाल्गुनौ । पिशुनः, फाल्गुनः ।

१२२. कृ-धू-वा-मदिभ्यः सरक् । कृसरः, धूसरः, वासरः, मत्सरः ।

१२३. भी-शीङ्भ्यामानकः । भयानकः, शयानकः ।

१२४. शिङ्घेरालकः । शिङ्घालकः ।

१२५. वातेरायसः । वायसः ।

१२६. सूतेश्च कः । सूचकः ।

१२७. इषेः कीकः । इषीका ।

१२८. तिन्तिडीकादयश्च । तिन्तिडीका, किंकिणीका, जर्जरीका, पर्परीका, मृत्तिका ।

१२९. घृ-सि-दूङ्भ्यः क्तः । घृतम्, सितः, दूतः ।

१३०. जर्त्त-तात-पलित-सुरत-लोष्ठाः । जर्त्तः, तातः, पलितः, सुरतम्, लोष्ठः ।

१३१. स्पृहेराय्यः—स्पृहयाय्यं ।

इति दौर्गसिंह्यामुणादिवृत्तौ द्वितीयः पादः समाप्तः ।

तृतीय: पाद:

१३२. वृणोतेरेन्यः । वरेण्यः ।

१३३. अर्त्तेरन्यः । अरण्यम् ।

१३४. हो हिरिश्च । हिरण्यम् ।

१३५. पर्ज्जन्य-पुण्ये । पर्ज्जन्यः, पुण्यम् ।

१३६. अभि-नक्षि-कडिभ्योऽत्र । अमत्रं, नक्षत्रं, कडत्रं: कलत्रम् ।

१३७. भृञोऽतः । भरतः ।

१३८. पृषिरञ्जिभ्यां यण्वत् । पृशतः रजतम् ।

१३९. समाङ्पर्य्युपनव्सु वसेरथः । आवसथः, संवसथो ग्रामः, परिवसथः, उपसवथः, अवसथः ।

१४०. जृवृङ्भ्यामूथः । जरूथः, वरूथः ।

१४१. अति-चमि-रभि-युभ्योऽसः । अतसी, चमसः, रमसः, यवसः ।

१४२. वेतस-वहस-दिवस-पनसाः ।

१४३. कृ-शृ-गर्द्दि-रासि-वल्लिभ्योऽभः । करभः, शरभः, गर्दभः, रासभः, वल्लभः (वल्लभा)

१४४. ऋषि-वृषिभ्यां यण्वत् । ऋषभः, वृषभः ।

१४५. सर्व्वधातुभ्य इः । रविः, कविः, दरिः (गुहा), दरी, ध्वनिः, बलिः ।

१४६. गृ-नाम्युपधाच्च किः । गिरिः, रुचिः, क्रोषः, घृणिः ।

१४७. गण्डि-मण्डिभ्यां ऋच् । गन्डयन्तः, मन्डयन्तः ।

१४८. जि-विशि-वसिभासि वहि-नन्दि-हिमि-साधिभ्यश्च । जयन्तः, वेशन्तः, वसन्तः, भासन्तः, वहन्तः, नन्दयन्तः, हेमन्तः, साधयन्तः ।

१४९. कौतेररक्—कुररः ।

१५०. अङ्गि-मदि-मन्दि-कडि-मृजिभ्य आरः । अङ्गारः, मदारः, कडारः, मार्ज्जारो ।

१५१. शृङ्गार-भृङ्गार-कुञ्जराः ।

१५२. सर्त्तेरपः सोऽन्तश्च । सर्षपः ।

१५३. विटपादयश्च । विटपः, कुणपः, दलपः, कुटपः ।

१५४. वृत्रस्तिकः । वर्त्तिका ।

१५५. कृति-भिदि-लभि-तुलि-नतिभ्यो यण्वत् । कृत्तिकाः, भित्तिका, लम्भिका, तूलिका, नत्तिका (नत) ।

१५६. इष्वशिभ्यां तकः । इष्टका, अष्टका ।

१५७. दृग्रोर्भः—दर्भः, गर्भः ।

१५८. इणो यण्वत् । इभो हस्ती ।

१५९. विपतिभ्यां तनः । वेतनम्, पत्तनम् ।

१६०. सञ्ज्वसिभ्यां थिक् । सक्थिः, अस्थिः ।

१६१. सारेरथिः—सारथिः ।

१६२. अङ्ग्यातिभ्यामुरीथी । अङ्गुली, अतिथि ।

१६३. नीदलिभ्यां मिः । नेमिः, दल्मिः (शत्रुः) ।

१६४. ऊर्म्मिभूमिरश्मयः । ऊर्म्मिः, भूमिः, रश्मिः ।

१६५. इषेः सुक् ।— इक्षुः ।

१६६. अवि-तृ-स्तृ-तन्त्रिभ्य, ईः । अवीः,तरीः, स्तरीः, तन्त्रीः ।

१६७. वातप्रमीः ।

१६८. कृ-गृ-जागृभ्यः क्विः । कृविः, गृविः, जागृविः ।

१६९. छव्यादयश्च । छविः, दर्व्विः, स्थविः, दिविः, देविः (पक्षि-विशेष)

१७०. खजेराकः । खजाकः (पक्षिविशेषः) ।

१७१. वलाका-पिनाक-पताका-श्यामक-शलाकाः ।

१७२. अर्त्तेरत्निः । अरत्निः ।

१७३. अञ्जेरलिः । अञ्जलिः ।

१७४. मृकणिभ्यामीचिः—मरीचिः कणीचिः ।

१७५. रातेस्त्रिः । रात्रिः ।

१७६. दुषेरिकः । दूषिका ।

१७७. कतभ्यामीषः । करीषः, तरीषः ।

१७८. शिरीषादयश्च । शिरीषः, पुरीषं, ऋजीषं, वरीषः, अनुवरीषः ।

१७९. कॄ-शॄ-शौटिभ्य ईरः । करीरः, शरीरं, शौटीरः ।

१८०. क्षीरोशीर-गभीर-गम्भीराः । क्षीरः, उशीरः, गभीरः, गम्भीरः ।

१८१. अगि-श्रु-श्रि-युहिभ्यो निः । अग्निः, श्रोणिः, श्रेणिः, योनि-वह्निः ।

१८२. सृणि-वेन्नि-वृष्णि-पार्ष्णि-चूर्णयः ।

१८३. पातेर्डतिः । पतिः ।

१८४. भूस्वद्यङ्घ्रिभ्यः क्रिः । भूरि, सूरिः, अद्रिः, अङ्घ्रिः ।

१८५. पृणातेः कुशः । पुरुषः ।

१८६. हन्तेरुषः । हनुषः ।

१८७. मञ्जूषादयः । मञ्जूषा, गण्डूषः, पीयूषम्, अटरूषा ।

१८८. शकादिभ्योऽट् । —शकटम् ।

१८९. जटामर्कटौ । जटा, मर्कटः ।

१९०. बहुलादिभ्य इत्रोत्रौ । बहित्रं, लोत्रं ।

१९१. खर्जपिञ्जादिभ्य उरोलौ । खर्जूरः, कर्पूरः, मसूरः, पिञ्ज (सौत्रो), लाङ्गुलः ।

१९२. सर्त्तेर्व्वं । सर्व्वः ।

१९३. उल्बादयः । उल्बः, निम्ब, शुल्वं, बिम्बं ।

१९४. शवि-कमिभ्यां दः । शब्दः, कन्दः ।

१९५. कुन्तादयश्च । कुन्दं, मन्दं, वृन्दं, अब्द ।

१९६. पी-मीभ्यां रुः । पेरुः, मेरुः ।

१९७. जम्वादयश्च । जत्रुः, शत्रुः, शिग्रुः ।

१९८. योवागूः । यवागूः ।

इति उणादिवृत्तौ तृतीयः पादः समाप्तः ।

चतुर्थः पादः

१९९. जनि-मनि-दसिभ्यो युः । जन्युः, मन्युः, दस्युः ।

२००. ह्री-कृशिभ्यां ष्णुकानुकौ । ह्रीष्णु, धृष्णुः, कृशानुः ।

२०१. मने किरते उच्च । मुनिः ।

२०२. अहिकप्योर्नलोपश्च । अहिः, कपिः ।

२०३. शृ-वसि-वपि-राजि-वृ-हनि-नभिभ्यः इञ् ।शरिः, वासिः, वापिः, राजिः, वारि, घातिः, नाभिः ।

२०४. अजि-जन्यति-पणिभ्यश्च । आजिः, जनिः, आतिः, रश (सौत्र) राशिः, पाणिः ।

२०५. वेञो डिः । विः ।

२०६. नौ च । नीविः ।

२०७. सख्यादयश्च । सखि, सुहृत्, अश्रिः, प्रहिः ।

२०८. दृ-वसिभ्यां क्तिः । दृतिः, वस्तिः ।

२०९. वसि-वह्यमिभ्योऽतिः । वसतिः, वहतिः, अमतिः ।

२१०. हन्तेर्यंश्च । अहंतिः ।

२११. क्षिपि-लिखि-लिङ्ग-भ्रमिभ्यो वुक् । क्षिपकः, लिखकः, लिङ्गक, भ्रमकः ।

२१२. हो द्विश्च । अद्रकः ।

२१३. कृषेर्वृद्दिवा । कार्षिकः, कृतकः ।

२१४. कृवादिभ्योऽकः । करकः, करका, सरकः, मरकः फलकः ।

२१५. शमे खः । शङ्ख, [दमु उपशमे] दम्भः ।

२१६. मुहेर्मुरा देशश्च । मूर्खः ।

२१७. शिखा । शिखा ।

२१८. गमेर्गः । गङ्गा ।

२१९. जनेर्घ । जङ्घा ।

२२०. कचेश्छ । कच्छः ।

२२१. कृ-तृ-कृपेः कीटः । किरीटः, तिरीटः, कृपीटम् ।

इति उणादिवृत्तौ चतुर्थः पादः समाप्तः ।

पञ्चमः पादः

२२२. शमेष्ठः । शष्ठः ।

२२३. गमेर्धः । गन्धः ।

२२४. सुचेः स्मः । सूक्ष्मम् ।

२२५. अदिभुवो डुतः । अद्भुतम् ।

२२६. रुहिहृष्यादिभ्य इतः । रोहितः, लोहितः, हरितः, शुक्लः ।

२२७. मृ-गृ-वाऽस्यमि-दमि-लुप्भ्यस्तः । मर्त्यः, गर्त्तं, वायुः, हस्त[हसने], अन्तः, दन्तः, लोतम्, पोतः ।

२२८. माच्छाशशिभ्यो यः । माया, छाया, शश्यम्(शस्यम्)

२२९. सन्ध्यादयश्च । सन्ध्या, वन्ध्या, जाया ।

२३०. रुचिभुजिभ्यां किष्यः । रुचिष्यः, भुजिष्यः ।

२३१. मदे स्य । मत्स्यः ।

२३२. मद्यसिवासिभ्यः सरन् । मत्सरः, वत्सरः, संवत्सरः ।

२३३. देवि-वठि-भ्रमि-वासिभ्योऽरः । देवरः, वठरः, [वज्रकः], भ्रमरो, वासरः ।

२३४. शृणातेः करः । शर्कराः ।

२३५. पुषो यण्वत् । पुष्करं, पद्मम् ।

२३६. स्तृणातेड्ट् । स्त्री ।

२३७. कठि-चकिभ्यामोरः । कठोरः, चकोरः ।

२३८. घुणघुणोर्डोरः । घोरं ।

२३९. सर्वधातुभ्य ष्ट्रन् । भ्रस्ज्-भ्राष्ट्रः, भस-भस्त्राः, पा-पात्रम्, पात्री, मा-मात्रं, अम-अमत्रम्, वे-वेत्रम् ।

२४०. उष्ट्रः । उष्ट्रः ।

२४१. मि चिभ्यां त्रक । मित्रम्, चित्रम् ।

२४२. पूञो मनस्ह्रस्वश्च । पुमान् ।

२४३. कुटेर्मलः । कुड्मलं ।

२४४. व्रश्चे सक् । वृक्षः ।

२४५. भृवमकुम्यः शक । भृशः, वंशः, कुशः ।

१४६. कीनाशाङ्कुशौ । कीनाशः, अङ्कुशः ।

२४७. वृ-दृ-वदि-हनि-मनिकस्यशिकमिभ्यः सः । वर्षः, दर्षः, वत्सः, हंस, मांसम्, कत्सः, अक्षम्, कसः ।

२४८. स्रुवश्चिक्—स्रक् ।

२४९. चतेर्व्वार् । चत्वारः ।

२५०. गमेरिनिः । गमी ।

२५१. आङि णिनिः । आगामी ।

२५२. भूस्थाभ्याञ्च । भावी, स्थायी ।

२५३. परमेष्ठी । परमेष्ठी ।

२५४. वशेः कनस् । उशना ।

२५५. सर्वधातुभ्योऽसुन् । वेधाः, अयः, पयः, तपः, मनः, चेतः, रहः, वयः ।

२५६. पूरोवयः पयः सुधाञोऽगुणः । पुरोधाः, वयोधा, पयोधाः ।

२५७. चन्द्रे मातेः । चन्द्रमाः ।

२५८. अनेहोऽप्सरोऽङ्गिरसः । अनेहाः, अप्सरः, अङ्गिराः ।

२५९. उषिरञ्जिशृभ्यो यण्वत् । उषः, रजः, शिरः ।

२६०. यजेः शश्च । यशः ।

२६१. उषेर्जश्च । ओजः ।

२६२. वचेःषोऽन्तश्च । वक्षः ।

२६३. स्रुरीभ्यां तोऽन्तश्च—स्रोतः, रेत ।

२६४. शीङ्ः फोऽन्तश्च—शेफः ।

२६५. छादेर्नश्च दात् पूर्व्वः—छन्दः ।

२६६. अमेर्भोऽन्तश्च—अम्भः ।

इति उणादिवृत्तौ पञ्चमः पादः समाप्तः ।

परिशिष्टम्

(षत्वस्य)

१. उपसर्गात् सुनोति-सुवति स्यति स्तौति स्तोभतीनामड्न्तरोऽपि ।

२. स्था-सेनि-षेधति-सिच-सन्ज्-स्वञ्जामड्भ्यासान्तरश्च ।

३. सदेरप्रतेः ।

४. प्रतेरपि स्तन्भेः ।

५. अवादौर्ज्जित्यनिकटाश्रयेषु ।

६. वेश्च स्वनो भोजने ।

७. परिनिविभ्यः सेवतेः ।

८. सितसय सिवु सह सुटामनन्तरः ।

९. व्यनुपर्य्यभिनिभ्यः स्यन्दतेरप्राणिनि ।

१०. परेः स्कन्देः ।

११. वेरनिष्ठायाम् ।

१२. स्फुरिस्फुलोर्निनिविभ्यः ।

१३. नित्यं वेः स्कम्भेः ।

१४. उपसर्गं प्रादुर्भ्यामस्तेर्यस्वरेषु ।

१५. सुविनिर्दुर्भ्य सुपः ।

१६. समसूत्योश्च ।

१७, निसस्तप्यनभ्यावृत्तौ ।

१८. बह्वृच प्रकृत्युत्तरद पादेः ।

१९. सिचश्चेक्रियिते ।

२०. निप्रतिभ्यां स्तब्धस्य ।

२१. उपसर्गात् स्तम्भुसिवुसहां चणि ।

२२. स्यति सुवोरभ्यासे ।

२३. स्ये च सुञः ।

२४. सोढश्च ।

२५. सेधतेर्गतौ ।

२६. सदिस्वज्जां परोक्षायामभ्यासात् ।

२७. इनि-स्विदि-स्वदि सहां सनि ।

(णत्वस्य परिशिष्टम्)

१. उपसर्गण्णोपदेशस्य ।

२. अनितेरन्तस्यापि ।

३. अभ्यासाच्च ।

४. हिन्वानिमीनाम् ।

५. हनः ।

६. वमोर्वा ।

७. अयनस्य चादेशेऽन्तरः ।

८. सिंसि-निक्षि-निन्दां वा कृति ।

९. नेर्तद-गद-पत-पद-दा मेङ्-माङ्-स्यति-हन्ति-यति-वाति-हेति-प्साति-
वपति-वहति-शाम्यति चिनोति-दोग्धिषु ।

१०. अकथादावुपदेशेऽषोन्त वा ।

११. स्वरात् कृतः ।

१२. निर्विण्णम् ।

१३. वेनः ।

१४. व्यञ्जनादेर्नाम्युपधात् ।

१५. नानुषङ्गिणः ।

१६. इनश्च-भ-भू-पूङ्-कमि-गमि-ख्या-प्यायि-वेपः ।

१७. हो घि हनः ।

१८. पदे षः ।

१९. अतद्धितेऽनाङ् पदेनान्तराये ।

२०. लृ वर्णेन ।

२१. नशो ड-ष-तदादेशेषु ।

२२. क्षुभ्नादेश्च ।

सूत्रसूची

(अकारादिवर्णानुक्रमेण)

स = सन्धिः आ = आख्यात च = चतुष्ट्य (सुवन्त) कृ = कृदन्त

"कृत्प्रत्ययानां सूची"

(अकारादिवर्णानुक्रमेण)